S.V. University Oriental Series No. 10

General Editor : THE DIRECTOR, S.V.U.O.R. INSTITUTE

BĀLABHĀRATAM

OF

AGASTYA PAṆḌITA

EDITED BY :

Dr. K.S. RAMAMURTHI
S.V.U.O.R. Institute, Tirupati

PUBLISHED BY :

THE DIRECTOR
S.V.U.O.R. Institute. Tirupati

SRI VENKATESWARA UNIVERSITY
ORIENTAL RESEARCH INSTITUTE
TIRUPATI

1983

S.V. University Oriental Series No. 10

साधारणसम्पादकः — अध्यक्षः

अगस्त्यपण्डितविरचितम्

बालभारतम्

सम्पादकः

डा. कोपल्ले श्रीराममूर्तिः

प्रकाशकः, अध्यक्षः

श्रीवेङ्कटेश्वरविश्वविद्यालयप्राच्यपरिशोधनालयः

तिरुपति

१९८३

प्रथमं संस्करणम्

मुद्रणस्थानम् :
श्रीवेङ्कटेश्वरविश्वविद्यालयीयमुद्रणालयम्
तिरुपति – २

S.V. University Oriental Series No. 10

General Editor : THE DIRECTOR, S.V.U.O.R. INSTITUTE

BĀLABHĀRATAM

OF

AGASTYA PAṆḌITA

EDITED BY :

Dr. K.S. RAMAMURTHI
S.V.U O.R. Institute, Tirupati

PUBLISHED BY :

THE DIRECTOR
S.V.U.O.R. Institute, Tirupati

SRI VENKATESWARA UNIVERSITY
ORIENTAL RESEARCH INSTITUTE
TIRUPATI

1983

First Edition — 500 Copies

Printed at
S.V. University Press
Tirupati - 2

INTRODUCTION

Kākati Pratāparudra's II sword and pen commanded equal respect. His court seems to have been busy with men of letters. It is said that there are about two hundred poets in his court. He is a scholar and a poet by himself. He wrote two sanskrit plays *Uṣārāgodayam* and *Yayāticaritra*. Vidyānātha the author of the famous *Pratāparudrayaśobhūṣaṇam*, Narasimha of the *Kādambarīkalyāṇam*, Sākalyamallana of *Udārarāghavam*, Achintyendrakavi who prepared the *Anumakoṇḍaśāsanam*, Rāvipāṭi Tripurāntaka who composed the *Premābhirāmam*. Narasimhadāsa who wrote the *Siddhodvāham* a kāvya which is inscribed on slabs and Jāyapasenāni the author of the *Nṛtta-ratnāvali* are a few noteworthy poets in his court. Gaṅgādevī who wrote the *Mathurāvijaya* comes of the Kākati family.[1]

Agastya Paṇḍita the author of the present work the *Bāla-bhāratam*, is said to have flourished during the period of Pratāpa-rudra Deva II of Warrangal.[2] Though he is said to have been the author of some Seventy four works, we are able to trace so far only three works viz., the *Kṛṣṇacaritam*, the *Nalakīrtikaumudī-kāvya* and the *Bālabhāratam*.

Out of these the *Bālabhāratam* is a *mahākāvya* in twenty cantos, available in full whereas the *Nalakīrtikaumudī* is available in two cantos only and the *Kṛṣṇacaritam*, a prose work is almost complete excepting two or three pages at the beginning.

From these extant works, we cannot gather any biographical data of Agastya Paṇḍita, as he did not seem to have cared to mention it. But from Narasiṁha and Viśvanātha, the authors of *Kādambarīnāṭakam*, and *Saugandhikāpaharaṇam*, respectively, we understand that Agastya the maternal uncle of these two scholars, enjoyed the patronage of Pratāparudra II of the

1. B.V. Ramaraju · Orugallu sāhitīsaurabhālu : Āndhraprabha sacitra-vārapatrikā : 17-3-'82

2. Krishnamacharya : The History of Sanskrit Literature : Para 214.

Kākatīya family at Warrangal between A.D. 1294–1325. Excepting this no other detail is known to us. But from the statements of Gaṅgādevī[1] Viśvanātha[2] and Rājacūḍāmaṇi Dīkṣita,[3] we note that Agastya enjoyed popularity as a poet and occupied an important place in the galaxy of scholars. He seems to have had another nephew by name Gaṅgādhara who was also extolled by Gaṅgādevī in her *Mathurāvijayam.*[4] A perusal at the titles of his other works also reveals the fact that Agastya handles themes from the topics of epics and *Purāṇas* which have been current in the people from times immemorial. This may be due to his reverence for vyāsa.

Of the three works so far came into light two titles i e. the *Kṛṣṇacaritam* and the *Nalakīrtikaumudī* were edited by my friend Prof. T. Venkatacharya of the University of Toranto, Canada. The learned scholar, in his valuable introduction to the *Kṛṣṇacaritam*, gave about eleven points to prove that Vidyānātha, the author of the *Pratāparudrayaśobhūṣaṇam* a work on rhetoric and Agastya Paṇḍita are two different persons and not identical as a section of the scholars opined on the basis of a verse (II–57) found in the *Pratāparudrayaśobhūṣaṇam*[5]

---

1. चतुस्सप्तति काव्योक्तिव्यक्तवैदुष्यसंपदे ।
अगस्त्याय जगत्यस्मिन् स्फृहयेत्को न कोविद: ॥

The Mathurāvijaya — I. 14.

2. वाचस्तस्यकवेरुदारमधुरा इत्यत्र चित्रं किमु
प्रख्यात: सकलासु दिक्षु गुणिषु श्रेयान् अगस्त्यस्सुधी: ।
वेधश्चन्द्रमुखीकराङ्गुलिदलासङ्गक्कणद्वल्लकी-
वाजोयुक्तिसहोक्तिदर्शितसुधाजन्मा स यन्मातुल: ॥

The Saugandhikāpaharaṇam—V. 4. Prashāvanā, Kāvyamāla, No 74, 1934.

3. जडाशयानां हृदयं जगत्यां यस्योदयाद्यातितमां प्रसादम् ।
स एव सारस्वतमर्मवेदी विभाति मौलौ विदुषामगस्त्य: ॥

The Rukmiṇīkalyāṇam — I - 18.

4. स्तुमस्तमपरं व्यासं गङ्गाधरमहाकविम् ।
नाटकच्छद्मनादृष्टां यश्चक्रे भारतीं कथाम् ॥ The Mathurāvijaya — I. 15.

5. T. Venkatacharya : The Kṛṣṇacaritam Intro. pp. X - XIV.

To this I like to add one more point that if the term Vidyānātha were to be a title acquired by Agastya, either Viśvanātha his nephew and an younger contemporary or Gaṅgādevī the student of Viśvanātha should have expressly mentioned it on the occasion of eulogising Agastya in their works. As nothing of such sort is seen from the pen of his kith and kin we can feel that Vidyānātha and Agastya are not identical.

To determine the date of Agastya we have to solely depend upon external evidences as nothing connected with his date is found in his works so far extant. In this connection the statement of Viśvanātha, the teacher of Gaṅgādevī seems to be most authentic. Viśvanātha in his play *Saugandhikāpaharaṇam* says that he wrote the work at the behest of the king Pratāparudra II (of the Kākati family at Warrangal) and he was the nephew of the great poet Agastya through his mother.[1] From this we understand that Viśvanātha enjoyed the patronage of the king Pratāparudra but his uncle Agastya, whether in the court of Pratāparudra or not, was a senior and attained fame during that period which fact was evidenced by Gaṅgādevī, and Rājachūḍamaṇi Dīkṣita also. Hence we can safely place Agastya Paṇḍita in the first half of the thirteenth century.

Agastya's *Kṛṣṇacaritam* is a small prose work, and the *Nalakīrtikaumudī* is a fragment containing two contos (II and IV) consisting of 182 verses in all. The third work the *Bālabhāratam* is a *mahākāvya* containing twenty contos. Here the author narrates the entire kernel of the *Mahābhārata* stripping off the *upākhyānas* Aufrecht's *catalogues catatalogorum* gives the following works as belonging to Agastya —

(1) *Bālabhāratam*
(2) *Maṇiparīksā* or *Ratnaprīkṣā*
(3) *Lakṣmīstotram.*
(4) *Lalitāsahaśranāmam*
(5) *Śivasamhitā*
(6) *Śivāṣṭakam* and
(7) *Sakalādhikāra.*

---

1. Ref. ft. note 4 on page 1.

Events depicted

CANTO I

Genealogy of the Kuru family that has sprung up from the Moon ; Love of the king Santanu ; the vow of Devavrata who thence known as Bhīṣma; coronation of Citrāṅgada and his death, coronation of Vicitravīrya; his marriage with Ambikā and Ambālikā; refusal of Bhīṣma to marry Ambā; and the death of Vicitravīrya.

CANTO II

The birth of Dhṛtarāṣṭra, Pāṇḍu and Vidura; care bestowed upon them by Bhīṣma; Coronation of Dhṛtarāṣṭra; appointment of Pāṇḍu as the head of the army; marriages of Dhṛtarāṣṭra with Gāndhāri and Pāṇḍu with Kunti and Mādri; Kunti's service to the sage Dūrvāsa and his boon; Karṇa's birth by the Sun—God; abandoning of Karṇa by Kunti; Karṇa's adoption by Sūta; Pāṇḍu's visit to Śataśṛṅga and his stay there with his two wives; curse on Pāṇḍu who killed the deer; Pāṇḍu's advice to Kunti to beget children; birth of Dharmaja; Gāndhārī's anxiety, Vyāsa preserving the hundred and one parts of the foetus; birth of Duryodhana and his brothers; birth of Bhīma, Arjuna, Nakula and Sahadeva: their *upanayanam* and education; Pāṇḍu's sports with Mādri and his death; Mādri's *sahagamanam* ṛiṣis' despatching Kunti and her sons to Dhṛtarāṣṭra.

CANTO III

Kauravas throwing Bhīma into the Ganges; Bhīma's safe return; poisoning Bhīma; Bhīma's entry into Pātāla and gaining strength with the help of Vāsuki; Kṛupa teaching *astravidyā* to all the Kauravas; Bhīṣma's contemplation to give higher education to all the children; Droṇa's arrival; Droṇa's narration of his auto-biography in the court; appointment of Droṇa as the teacher; test in *dhanurvidyā*; Arjuna's recognition; exhibition of *astravidyā* Karṇa's challange and objection; Duryodhana installing Karṇa as the king of Aṅga; request of Droṇa for *Gurudakṣiṇā*; Arjuna bringing Drupada as a captive; fulfilment of Droṇa's desire; Drupada getting boons for a son who can chap off the head

of Droṇa and a daughter through whom he can make friends with Pāṇḍavas; Drupada performing sacrifice; birth of Dṛṣṭadyumna and Kṛṣṇā (Draupadī); Dhṛtarāṣṭra's contemplation to make Dharmaja heir - apparent; Duryodhana's opposition; Dharmaja's acceptance to stay in Vāraṇāvati.

CANTO IV

Construction of a lac-house at Vāraṇāvati; vigilence of Vidura; setting fire to the house at midnight while the Pāṇḍavas were asleep; escape of Pāṇḍavas through the tunnel caused at the the instance of Vidura; news of the death of Pāṇḍavas; Pāṇḍavas entering the forest; Bhīma's meeting with Hiḍimbā; her love for Bhīma; Hīḍimba's death; Hidimbā's request for marriage; Bhima's refusal; Dharmaja's permission for the marriage; Bhima's sports and the birth of Ghatotkaca; entering of the Pāṇḍavas into the town Vetrakiya in the guise of Brahmins; Kunti consoling the weeping Brahmin couple. Her promise to send her son Bhīma to Baka in the place of the son of this Brahmin couple; Bhīma killing Baka; meeting of Pāṇḍavas with Vyāsa; defeating a Gandharva on their way to Pāñcāla; their lodging in the house of a kulāla; attending *svayamvara* of Draupadī; Dhṛṣṭadyumna's description of the kings that gathered there.

CANTO V

The description of the *svayamvara* assembly; the futile trails of all the kings to win Draupadī. Arjuna's success; the decision of the Kṣatriyas to fight the Brahmin who shot at the mobile fish; taking away of Draupadī by Arjuna after vanquishing all the other princes to the house of Kulāla; Kuntī's advice to share the object equally without knowing its nature; Drupada's secret mission to know the person who shot at; arrival of the Pāṇḍavas at the court of Drupada and revealing their identity; Drupada's predicament on knowing that all the five would marry Draupadī; Vyāsa narrates the origin of Draupadī and convinces Drupada; Draupadī's marriage; Pāṇḍavas arrival to Dhṛtarāstra with Draupadī; their stay in Hariprasta; Narada's arrival and his advice to the Pāṇḍavas.

CANTO VI

Request of a Brahmin to restore his cows; Arjuna entering the inner apartment hurriedly to take his bow etc., observing Dharmaja and Draupadī; Arjuna's pilgrimage according to the understanding; Arjuna's marriage with Ulūcī; birth of a son; arriving at Manipura; marrying Chitrāṅgada; birth of Babhruvāhana; Arjuna reaching Gokarṇa; entering Dvāravati in the guise of a sannyasin; the love-lorn condition of Arjuna and Subhadra; festival at Girisa; marriage of Arjuna with Subhadra; Vṛṣṇi's contemplated attack on Arjuna and the advice of Kṛṣṇa to desist from it; Arjuna reaching Dharmaja with Subhadra; birth of Abhimanyu; description of the season Grīṣma; Khāṇḍavadahana; Agni presenting Gāṇḍīva, Akṣayatūṇīra and the white horsed chariot to Arjuna; war between Indra and Arjuna; Nārada's arrival; devine voice announcing the arrival of Takṣaka at Kurukṣetra; announcing the relationship between Kṛṣna and Arjuna; Indra and others leaving for their respective places.

CANTO VII

The construction of Mayasabhā; Nārada's arrival and his message to perform Rājasūya; Kṛṣṇa's advice to kill Jarāsandha: departure of Kṛṣṇa, Bhīma and Arjuna to Giripura to fight with Jarāsandha; the death of Jarāsandha; performance of Rājasūya sacrifice; death of Sisupāla; visit of Suyodhana and others to Mayasabha: Suyodhana's insult; Suyodhana conferring with Śakuni; invitation to Pāṇḍavas to a dice-game; Dharmaja's defeat; Draupadī's insult; Bhīma and Arjuna proclaiming their vows; Dhṛtarāṣṭra's interference; defeat of Pāṇḍavas for a second time in the game; Pāṇḍava's departure for the forest.

CANTO VIII

The killing of Kimmīra by Bhīma and the Pāṇḍava's stay in Dvaitavana; Arjuna's penance for Pāsupatāstra; Fight between Śiva and Arjuna; Śiva presenting pāsupata to Arjunā; Yudhiṣṭira and others greeting Arjuna; stay in Badarikāśrama; Bhīma's conquest for the saugandhika flower; Indra's request to Arjuna to rootout Nivātakavaca and Kālakeyūrās; Gods honouring

Arjuna : Arjuna's entry into svarga along with Indra; Ūrvasī's love for Arjuna and her curse.

CANTO IX

Duryodhana's Ghoṣayātra; his defeat; Duryodhana's ladies approaching Dharmaja for help; Arjuna got released Duryodhana from the captivity of Citrasena; Duryodhana's trial for *prāyopaveśa,* advice of elders; Samsaptaka's promise of help to Duryodhana; his departure for his capital; Pāṇḍavas departure to Kāmyaka forest; Jayadratha kidnapping Draupadī; Pāṇḍavas pardening Jayadratha; Jayadratha's penance for a boon to conquer Arjuna; advice of the Sun-God to Karṇa not to part with kavaca and kuṇḍala; his advice to take the śakti from Indra; the Yakṣapraśna's and the revival of Pāṇḍavas to life.

CANTO X

Pāṇḍava's living in incognito in the thirteenth year in the court of Virāṭa; Dharmaja in the guise of a sanyasin, Bhīma as a cook; Arjuna as a dance-teacher, Nakula and Sahadeva as the trainer of horses and protector of cows respectively Draupadī as Sairandhri in the harem; Kīcaka's love for Draupadi and the death of all the Kīcakas; suspician of Duryodhana about the identity of the killer of Kīcakas; his plan to steal the cows of Virāṭa.

CANTO XI

Virāṭa receiving the report about the stealing of the cows; boasting of Uttara; suggestion of Uttarā his sister to engage Bṛhannala; Bṛhannala takes Uttara to the battle field; Uttara's timidity on seeing the kurus and his request to Bṛhannala to take him back to the palace; Arjuna's encouragement; taking him to the tree on which gāṇḍīva etc., were kept safe and explaining Uttara the real position; Arjuna's magic missile and Uttara's victory; Duryodhana consulting gurus with regard to the time stipulated to the Pāṇḍavas; Bhīṣma clarifies his doubt and advises him to give back the kingdom of Pāṇḍavas; Duryodhana's refusal. Arjuna's advice to Uttara not to mention his name to his father; Their return to the capital; Pāṇḍavas enter-

ing the court of Virāṭa the next day, in their true colours; Uttara revealing the secret of his victory; Arjuna introducing his brothers; Bhīma introducing Arjuna; Virāṭa's offer of his daughter to Arjuna; Arjuna taking her as daughter-in-law; marriage of Uttarā and Abhimanyu.

CANTO XII

Dharmaja conferring with Kṛṣṇa and others to claim their share of the kingdom; Suyodhana and Arjuna waiting on Kṛṣṇa; Arjuna choosing Kṛṣṇa and Suyodhana the remaining army of yadus; preparation for the battle; Kṛṣṇa's departure to Hastina for a treaty; welcome to Kṛṣṇa and his stay with Vidura; Kṛṣṇa's direct negotiation; Dhṛtarāṣtra's inability to convince his son; Duryodhana's plot to bind Kṛṣṇa; exhibition of Viśvarūpa by Kṛṣṇa.

CANTO XIII

Kuntī's meeting with Karṇa on the banks of Ganges; Her request to him to join Pāṇḍavas; refusal of Karṇa; Karṇa promises not to kill any one excepting Arjuna; Armies in Kurukṣetra; commencement of war by Bhīṣma; Karṇa was pronounced Artharatha by Bhīṣma; Karṇa's vow in anger not to step into battle field till the fall of Bhīṣma; Bhīṣma's biography and the story of Ambā; her birth in the house of Drupada; her marriage; miracle of gandharva; maintenance of Drupada's honour;

CANTO XIV

Armies on both sides are ready; Kṛṣṇa and Arjuna enter the battle field; Arjuna's dejection; Kṛṣṇa's encouragement exhibiting Viśvarūpa; Bhīṣma's ten days war; Arjuna keeping Sikhaṇḍi before him to fight; Bhīṣma giving up fight; Bhīṣma waiting till uttarāyaṇa on the bed of arrows;

CANTO XV

Appointment of Droṇa as commander in chief; Padmavyūha; Arjuna's fight with samsaptakas; Abhimanyu entering the Padmavyūha; obstruction to others; heros killing Abhimanyu;

grief of Pāṇḍavas and Subhadra; Arjuna's suspicion of a calamity; information given to Arjuna; Arjuna's vow to kill Jayadratha before the evening of the next day; Kṛṣṇa taking Arjuna to Kailāsa in the dead of night.

CANTO XVI

Kṛṣṇa and Arjuna meeting Śiva, Śiva giving Arjuna a bow and an arrow explaning how to use it; commencement of the battle; Drona's fearful fight. Protection to Jayadratha; Kṛṣṇa's miracle; false darkness; Rumour that Arjuna failed; Jayadratha peeping out; Arjuna discharges arrow which cuts off his head and shing of the Sun; Kṛṣṇa's advice; falling of Jayadrada's head in the hands of his father; his death when he throws it out; discharging of Karṇa's śakti against Ghatotkaca; Ghatotkaca's death; Grief of the Pāṇḍavas; Kṛṣṇa's consolation; Dharmaja uttering words of double entendre; Misconstruing it Drona gives up fight; Dṛṣṭadyumna cuts off his head; Aśvatthāma's vow to kill Dhṛṣṭadyumna and Pāṇḍavas.

CANTO XVII

Karṇa succeeding Droṇa as the commander-in-chief; Duryodhana's request to Śalya to be the driver of Karṇa; Śalya's anger; Duryodhana passifying Śalya; Śalya's condition that Karṇa should not speak against him; fight between Karṇa and Arjuna; Arjuna killing Karṇa when his chariot got stuck up.

CANTO XVIII

Śalya becomes the Commander-in-chief; twins killing Śakuni; Duryodhana entering a pond; Bhima's seareh for Duryodhana, Bhīma's insinuation; his search for Duryodhana in the pond; Duryodhana's emergence from the pond; battle with Bhīma at Sarasvati vana; Bhīma striking at the thigh of Duryodhana with his club at the sign of Kṛṣṇa; fall of Duryodhana; Balarāma's anger at this and Kṛṣṇa's pacification; Aśvatthāma meeting Duryodhana along with Kṛpa and Kṛtavarma; Duryodhana's narration; Aśvatthāma's vow to avange this; Aśvatthāma entering into the tents of Pāṇḍavas; kills the

upapāṇḍavas at the dead of night; his fight with the guards; his report to Dhuryodhana; Dhuryodhana's death; Aśvatthāma leaving for the cottage of Vyāsa; Pāṇḍavas witnessing the horrible situation; locating Aśvatthāma in the hermitage of Parāsara; Vyāsa's request to stop this battle; Kṛṣṇa's promise to bring back Uttara's son to life; Aśvatthāma's dwelling in darkness till his death; the return of the Pāṇḍavas.

CANTO XIX

Dhṛtarāṣṭra's grief over the death of his sons; Pāṇḍavas consoling Dhṛtarāstra and other; Dhṛtarāstra wishes to see Bhīma; Kṛṣṇa plans to get a statue of Bhīma; Dhṛatarāṣṭra's embraces which crashes it; Dhṛtarāṣṭra's grief and Kṛṣṇa's consolation; Vyāsa's interference with Gāndhārī when she was about to curse Dharmaja; Gāndhāri's curse to Yādavas and Kṛṣṇa to die in a forlorn place; performance of funeral rites; Bhīsma's advice to Pāṇḍavas and his death; bringing back Parīkṣit to life by Kṛṣṇa; Dharmaja's Aśvamedhayāga; Arjuna follows the korse; Arjuna's helplessness before Babhruvāhana; Ulūci serving Arjuna; Arjuna completing the trip returns to Dharmaja.

CANTO XX

Pāṇḍavas care to Dhṛtarāṣṭra and others; Bhīma's pinpricks to Dhṛtarāṣṭra; Dhṛtarāṣṭra's wish to retire to forest with his wife; Kuntī, Vidura and Samjaya follow them; Vyāsa helping Dhṛtarāṣṭra to see his sons in svarga; their death; arrival of the ṛiṣis with Nārada to Dvāraka; Yadavas making fun of them; the curse of the ṛṣis; Sāmba begetting pistle; advice of Kṛśṇa; Kṛṣṇa takes the yādavas to picknic; their drunken state; Kṛṣṇa's rest under a tree; Kirāta striking Kṛṣṇa; his blessings to the kirāta; Kṛṣṇa's advice to Sātyaki and Arjuna; Kṛṣṇa's death; Dvāraka's grief over Kṛṣṇa's death; Arjuna's helplessness to protect the wives of Kṛṣṇa; grief of the Pāṇḍavas; Parīkṣit's installation on the throne; Pāṇḍavas mahāprasthāna; Dharmaja followed by the dog reaches the destination; Dharmaja's reluctance to enter the plane without the dog; Yama's appreciation of Dharmaja's erudiiion; Dharmaja entering svarga.

Works on the theme :

Many works belonging to different authors have come down to us, in different literary forms on the same theme of the *Mahābhārata*. The following are a few of them —

1. *Bhāratacampū* by Anantabhaṭṭa.
2. *Bhāratamañjarī* by Kṣemendra.
3. *Bālabhāratam* by Amaracandra.
4. *Bālabhāratam* or Pracaṇḍapāṇḍava by Rājaśekhara.
5. *Bhāratayuddha* by Bhattātri.
6. *Bhāratasaṁgraha* by Lakṣmaṇasūri.
7. *Bhāratasaṁkṣepa* by Iśānabhaṭṭa.
8. *Bhāratacampū* by Rājacūḍāmaṇi Dīkṣita.
9. *Bhāratakathā* by Narasimha and
10. *Prāsabhāratam* by Sūryanārāyaṇa Kavi.

Of the above the *Bhāratamañjarī* and the *Bālabhāratam* of Kṣemendra are works in poetry, i.e. written in the style of *mahākāvyas*, and all other works either belong to the category of campū, drama or prose. Hence we note that, including the present work of Agastya Paṇḍita there are only three works on this theme, written as *mahākāvyas*. The main intention of these authors is only to epitamize the original *Mahābhārata*. Though the intention is the same the execution varied. The *Bālabhārata* of Amaracandra (irrespective of the arrangement of the cantos) contains about 5,330 verses and the *Bhāratamañjarī* of Kṣemendra contains 8,810 verses while the *Bālabhārata* of Agastya contains 1,794 verses only. From this it is clear that Agastya stands foremost in achieving the desired object.

Amaracandra does not seem to have omitted any anecdote of the original, while Kṣemendra seems to have omitted certain *upākhyānas*; and Agastya omitting the entire lore of *upākhyānas* continued the thread of the main story. He simply narrated the incidents that are absolutely essential for grasping the contexts or the justification of an incident like that of the previous birth of Draupadī etc. Even in these cases he did not dilate much on them; He simply rushed through the last parvas of the work; Hence he became successful in narrating the story of the entire *Mahābhārata* in 1,794 verses.

Poetry :

Through out the work Agastya seems to have been conscious that he is writing for the children. He does not strain either for the round about or out of the way expressions. His poetry is simple and sweet. It does not require any commentary. The variety of figures he used are almost drawn from the objects familiar with in day to day life. A perusal at his other works also gives us the idea that he is a poet of the first order, and he is fully conversant with *Vaidarbhirīti*[1], besides *Dhvani*,[2] *guṇa* and *Alankāra*[3] schools. But unfortunately this does not help us to assertain his fixed views on the schools of poetry.

As a *mahākāvya* the Bālabhāratam deserves to be placed by the side of the *Raghuvamśa* of Kālidāsa. The rich imagination of the poet is discernable in the hights of his unhampered narration. He believes that a *mahākavi* should posses a rich variety of *viṣayas*[4] and the uttarance of a *satkavi* should be endearing to a connoissure.[5] In getting these two objectives fulfilled the story of the *Mahābhārata* afforded him a great opportunity which he executes with his utmost skill, erudition and experience. It is no exaggiration if we say that the Bālabhāratam shows the poet at his best. Because of his rich erudition he unconsiously echoes on occasions the great poets, he digested. The reverence he had for Kālidāsa etc, can be seen in his expressions which are almost similar such as —

पुंसां मनः पूरुकुलोद्भवानां
जागर्ति वस्तुन्यभिजात एव ॥ BB. I – 19.

---

1. इति विधिवन्निर्वर्तितपाणिपीडनविधिः विविधगुणगणश्लाघ्याम्, विपञ्चीमधुरस्वराम्, सुकृतशतलभ्याम्, वैदर्भीरीतिमिव विचक्षणः स्वीचकार कमलेक्षणः ।
The Krisṇa Caritam : P. 90.

2. सत्कविकाव्यमिवध्वनिसाराम् । ibid. P. 82.

3. अथवा सगुणासूक्तिः नालङ्कारमपेक्षते । The Bālabhāratam; X. 39.

4. महाकवि वचनमिव बहुविषयप्रवृत्ताम् । The Krisṇa Caritam. P. 62.

5. सकलसुमनश्लाघनीयमर्थमिव सत्कवेरुक्तिः । ibid. P. 10.

which reminds us of the expression of Kālidāsa

अंसशयं क्षत्रपरिग्रहक्षमा
यदार्यमस्यामभिलाषि मे मनः ॥

The Śākuntalam. **I. 23.**

स्वदते प्रणयालापः सङ्गमादिव योषिताम् । BB. X. 80.
कान्तोदन्तः सुहृदुपनतं सङ्गमात्किञ्चिदूनः ॥

The Meghadūtam. **II – 33.**

and

समाश्रितानामवनाय कर्म
नीचरपि स्वीक्रियते महद्भिः ॥ BB. XII. 13.
क्षुद्रोऽपिनूनं शरणं प्रपन्ने
ममत्वमुच्चैश्शिरसां सतीव ।

The Kumārasambhavam. I – 12.

Apart from this we note that Agastya repeats his verses in his works as and when occasion warrents. For example his *Nalakirtikaumudi* and *Bālabhāratam* contain the same lines and verses also. The line कुर्वन्ति कस्तूरिकया कलङ्कम् found in the *Nalakirtikaumudī* (IV. 10) is also observed in the *Bālabhāratam* (V. 95). The description of the ladies who run to see Nala (IV. 16 to 24) is exactly the same as that of the ladies who run to see Kṛṣṇa in the *Bālabhāratam* (XII. 29 to 41); which is exactly an imitation of the description of the ladies who run to see Iśvara in the *Kumārasambhavam*. (VII. 56-61) of Kālidāsa.

Commentaries :

There is only one commentary called *Manohara* on this work, by Sālva Timmapa, the daṇḍanāyaka under Srikrishna devarāya of Vijayanagar. History says that Thimmarusu is a minister of Srikrishna devarāya. Copies of this commentary are available both with the Madras Govt. Oriental Manuscript Library and the Sarasvatimahal Library, Tanjore; but they are incomplete. The commentary belonging to the MGOL is only for

five cantos (4 and 5 and a portion of the 6th canto and 10 and 12 which breaks off at the verse 27 in canto 12) where as the commentary belonging to the Sarasvatimahal contains 1 to 10 cantos only. Even this available portion is with full of lacuna.

Editions :

A portion of this *Bālabhāratam* was edited by Prof. P.P. Sastry of the Presidency College, Madras, and published serially in the Śankaragurukul Patrika with the commentary *Manohara* from 1939. This contains only 6 cantos. Sri Vanivilasa Press brought it out in a book from as No. 4 of its series. It also appeared as No. 9 of the Madras Oriental publications in 1939.

In the beginning, though I intended to bring out the entire text with its commentary *manohara*, I was oblized later on to change my mind for the reasons that the commentary is incomplete; that even the available portion is with full of lacuna and that the poem does not require a commentary. But while editing the poem I, as far as possible, made use of the commentary.

MSS. material

Our Institute possesses two copies of this work – (1) A paper manuscript complete in two valumes. The first volume contains the first nine cantos which has been copied from a manuscript of the Sarasvatimahal Library, Tanjore No. 3700, and the second from 10 to 20 canto copied from the manuscript of MGOL No. R. 1578. (2) A palmleaf ms. with us, which is incomplete bearing the No. 1740.

S.V.U.O.R.I. 6844 and 6845	Text–paper; 13X8 inch. 186 pages lines 24 on each page. Devanāgari; fair and good.
1740 :	Text–Palmleaf; 40×35 cms; 56 pages, 7 lines on each side of the leaf; incomplete; fairly good.

I take this opportunity to thank the authorities of our University, and the Director of our Institute for permitting me to edit and publish this work. I also thank our Research Assistants M/s. K.S. Varadan, T. Ananthanarayana and K. Pratap who helped me in preparing a press copy of the same. My

thanks are due to our Librarian and Curator Kum. S.R. Matha for the services rendered in going through the proofs and preparing an Index of the verses of this work. I also thank Mr. V. Venkataramana Reddy, Research Assistant for going through the proofs. My thanks are specially due to my friend Sri N.C.V. Narasimhacharya, the Head of the Department of Sahitya, S.V.O. College, Tirupati for his valuable suggestions and alround help throughout. Finally I thank the press for its co-operation in bringing out the volume in a neat manner.

CONTENTS

अगस्त्यकविविरचितम्

बालभारतम्

प्रथमः सर्गः

अस्त्यत्रिनेत्रप्रभवः कलात्मा शशीति नक्षत्रगणस्य[1] नाथः ।
यं वारिजश्रीहरमासवाचो वामं हरेर्लोचनमामनन्ति ॥ 1

सेव्यः सुराणां हिमवर्षिपादः संभावनीयः शिरसा शिवेन ।
महीध्रभर्तेव तमोऽपहन्त्रीं यः कौमुदीं दिव्यनदीं प्रसूते ॥ 2

न जाह्नवीयैश्च न यामुनैश्च न चापरासां सरितां पयोभिः ।
यस्योदयेनैव सुजातधाम्नो महीयसीमृद्धिमुपैति वार्धिः ॥ 3

बुधस्ततोऽभूत्नवसु ग्रहेषु रत्नेषु मुक्ताफलवन्मनोज्ञः ।
यः कर्दमापत्यमिलाभिधानं पर्यग्रहीत्पञ्चशरायुधार्तः ॥ 4

तस्यात्मजोऽभूत्पुरुहूतसारः पुरूरवा भूवलयस्य गोप्ता ।
नारायणोरुप्रभवां स्त्रियं यो जयश्रिया सार्धमलब्ध दैत्यात् ॥ 5

तस्यायुरायुर्दमनो रिपूणामासीदनूनः स्वगुणैस्तनूजः ।
हृष्यद्धरित्री पुलकाङ्कुराभा रराज यस्याध्वरयूपराजिः ॥ 6

पुत्रस्तदीयो नहुषोऽधिरूढस्त्रिविष्टपं पुण्यपरम्पराभिः ।
कुत्रापि सुत्राम्णि चिरं प्रणष्टे स्वराज्यमिन्द्रः स्वयमेव चक्रे ॥ 7

---

1. नक्षत्रगणाधि Ptv.

अजायतास्मादनघो ययातिः पेष्टुं द्विषामुच्चलितस्य यस्य ।
नभस्युदीर्णो बलरेणुरासीद्घनो यशः केतकजन्महेतुः ॥ 8

पुण्यैस्सुतस्तस्य बभूव पूरुः क्रोधोदितां दैत्यपुरोधसो यः ।
गुरोर्निदेशान्निजवंशलक्ष्म्याः प्रागेव जग्राह जरां प्रहृष्टः ॥ 9

तदन्वयोदन्वति जन्मभाजामुदग्रतेजोभृतदिङ्मुखानाम् ।
मध्ये बहूनां भरतः प्रतीतो राज्ञां मणीनामिव कौस्तुभोऽभूत् ॥ 10

सेनासु येनासुरनायकानां नीतासु शान्तिं निशितैः क्षुरप्रैः ।
शरासनं शातमखं नवानामम्भोमुचामाभरणं बभूव ॥ 11

गोत्रे तदीये महति प्रशस्तो बभूव हस्ती बहुमान्यसत्त्वः ।
यशशालशुद्धान्तवधूमुखेषु तमालपत्रापचयं वितेने ॥ 12

वस्वोकसाराममरावतीं च श्रीचारुताभ्यामतिवर्तमानम् ।
यक्षामरेशाभ्यधिकेन येन चक्रे पुरं हस्तिननामधेयम् ॥ 13

कुले कुरुस्तस्य पतिर्धरित्र्याः कुलाद्रिसारः किल जन्म लेभे ।
असम्मितैश्वर्यवतोऽपि चित्रं यस्यातपत्रं मितमेकमेव ॥ 14

तत्सन्ततौ शन्तनुरूर्जितश्रीरुच्छ्रायवत्यामुदपादि राजा ।
दातुर्यतः स्वास्थ्यमियाय नित्यं प्रत्यर्थिनां संहतिरर्थिनां च ॥ 15

स पौरवः पौरुषमोचिताग्निर्महारथो जातु रथाधिरूढः ।
मृगेन्द्रसत्त्वो मृगयां विधाय त्रिस्रोतसस्तीरभुवं प्रपेदे ॥ 16

सा तत्र मूर्ता सरिदुत्तरीयप्रकाशितैकस्तनमुद्वहन्ती ।
अतिष्ठत स्मेरमुखेन्दुरस्मै धनुष्मते पुष्पशरोपमाय ॥ 17

अभीक्ष्णमाखेटविहारखिन्नो नृपस्तदा निर्मलकान्तिपूराम् ।
पिबन्नदीं विस्मयविस्तृतेन जग्राह नेत्राञ्जलिना न तृप्तिम् ॥ 18

तथाविधायां नृपतेरहेतुर्बभूव तस्यामभिलाषबन्धः ।
पुंसां मनः पूरुकुलोद्भवानां जागर्ति वस्तुन्यभिजात एव ॥ 19

अथाब्रवीदभ्रनदीमदीनां न चेत्परस्यासि परिग्रहस्त्वम् ।
राज्यं शरीरं मम जीवितं च सुभ्रु त्वदायत्तमवेहि सर्वम् ॥ 20

श्रुत्वा वचस्तस्य सुरस्रवन्ती शुचिस्मिता व्याहरति स्म वाचम् ।
सुजातदन्तांशुचयच्छलेन प्रकाशयन्ती पयसामिवौघम् ॥ 21

प्राप्ता महाराज गृहं त्वदीयं ज्ञेया कदाचिद्भवताऽपि नाहम् ।
यत्कर्म कुर्यामसकृद्विरुद्धं तत्रापि नैवास्मि निषेधनीया[1] ॥ 22

संविन्ममेयं यदि रोचते ते यावत्सकाशे निवसामि हृष्टा ।
न चेद्भवन्तं चिरसंस्तुताऽपि त्यक्ष्यामि लक्ष्मीरिव दुर्विनीतम् ॥ 23

ततः प्रतिज्ञाय तथेति राजा मूर्तामिवाज्ञां मकरध्वजस्य ।
रथं नताङ्गीमधिरोप्य हृष्टः पुरीमगात्पूरुकुलप्रदीपः ॥ 24

अन्तः प्रसर्पन्मृगनाभिगन्धेष्वनर्घरत्नद्युतिरञ्जितेषु ।
हर्म्येषु चिक्रीड सराजहंसा गङ्गा हिमाद्रेरिव गह्वरेषु[2] ॥ 25

अस्यास्स्वभावैर्मधुरैर्हृतात्मा न जातु सस्मार निजावरोधान् ।
सा चास्य भेदैरुपलालनानां सम्प्रीयमाणा सरितामधीशम् ॥ 26

क्रमेण तान्सप्त[3] नवेन्दुकल्पान् सूत्वा सुतानप्सु समुत्सृजन्तीम् ।
स्निग्धः परित्यागभयात्स तूष्णीमपारयन्वारयितुं बभूव ॥ 27

अथाष्टमं पुत्रमसौ प्रसूतं निहन्तुकामा किल वत्सलेन ।
सन्त्यज्य तत्प्रेम च संविदं च निवार्यमाणा जगदे नृपेण ॥ 28

---

1. निवारणीया Pt.
2. कन्दरेषु A.
3. तां॰ Ptv.

का त्वं नृशंसाऽसि शिशुं किमर्थं हन्तुं प्रवृत्ता कुलतन्तुमेनम् ।
सुतेषु सप्तस्वपि तादृशेषु हतेषु ते हन्त न तृप्तिरासीत् ॥ 29

अमुं[1] कुमारं कृपयाऽर्द्रचेता[2] ददासि मे यद्यनवद्यमूर्तिम् ।
[3-]श्रेयश्च ते साध्वि विनैव यत्नं[-3] कुलं कुरूणां च भवेद्वरीयः ॥ 30

स्मित्वा ततः सा निजगाद भूपं नृसिंह नैवास्मि नृशंसवृत्तिः ।
जानीहि शुद्धिं जगतां दिशन्तीं भागीरथीं मां भवमौलिभूषाम् ॥ 31

वसुः कदाचिद्विधिचोदितायाः कश्चिन्निदेशान्निजधर्मपत्न्याः ।
सहेतरैस्सप्तभिराश्रमस्थां मुनेर्वशिष्ठस्य जहार धेनुम् ॥ 32

महर्षिणा दिव्यदृशा निरीक्ष्य क्रुद्धेन मर्त्या भवतेति शप्ताः ।
शापान्तमेनं प्रणतिप्रशान्तमप्राक्षुरष्टौ स च ताञ्छशास ॥ 33

मा भैष्ट यूयं भुवि जातमात्रा निन्द्यं वपुस्त्यक्ष्यथ मानुषं तत् ।
यो व स्वभार्यावशगस्स पापी[4] मर्त्यश्चिरं स्त्रीविमुखश्च जीवेत् ॥ 34

इत्थं नियुक्तान्मुनिपुङ्गवेन विरिञ्चिलोकाद्विहितावतारा ।
दिनर्क्षदीपानिव दीनभासो दृष्ट्वा वसूनत्रवमभ्रमार्गे ॥ 35

वत्साश्शुचा तावदलं कदाचित्सरोजयोनेस्सदसि स्थितायाः ।
उदक्षिपन्मे मरुदुत्तरीयं प्रवाहमूर्तेरिव पार्श्वफेनम् ॥ 36

कलामिवेन्दोः चलदंशुकान्तां महाभिषङ्मामवलोक्य राजा ।
हृष्टः कुमुद्वानिव तत्र सर्वे निमीलिताः पङ्कजवत्सलज्जाः ॥ 37

पितामहस्तं मयि बद्धभावं शशाप कोपस्फुरिताधरोष्ठः ।
स्थाने त्वया नेदमकारि राजन् धीरेण भूत्वा कुलभूभृतेव ॥ 38

---

1. इमं Ptv. 2. दयया॰ A.
3-3. विनैवयत्नं सुकृतं हि ते स्यात् Ptv. 4. पापो Ptv.

तदत्र दैवाद्गमितो विकारं भूयोऽपि भूमौ भज मर्त्यभूयम्[1] ।
इयं च दुग्धाब्धिमिव द्वितीयं दिवोऽवतीर्णा रमयिष्यति त्वाम् ॥ 39

क्रियाभिरस्याः श्रुतिगर्हिताभिर्यदा भवान्यास्यति वैमनस्यम् ।
हित्वा तदा ह्रीरिव कामिनं त्वां निजं पदं प्राप्स्यति निम्नगेयम् ॥ 40

तथेति पद्मासनशासनं तन्निधाय मौलौ[2] भुवमापतन्त्याः ।
समानदुःखानिह दर्शयन्वो मन्ये विधिर्मे विहितोपकारः ॥ 41

यूयं ममाविर्भवत क्रमेण गर्भे नलिन्या इव पद्मकोशाः ।
त्यक्ष्यामि व स्सप्त पयस्सु जातान्पुत्रो भुवि स्थास्यति मे यवीयान् ॥ 42

इति श्रुतार्था वसवः प्रयाता स्तानेव मन्यस्व मयि प्रसूतान् ।
तेषां तु मोक्षाय दयां दधत्या विगर्हितं कर्म कृतं मयेदम् ॥ 43

महाभिषक् त्वं भवता चिराय भोगानशेषानिह निर्विशन्तीम् ।
व्ययोजयन्मां समयावसानव्याजेन शापावधिरेष पापः ॥ 44

अयं शिशुः स्कन्द इव द्वितीयो नीतो मया सम्प्रति वीतबाल्यः ।
उपैष्यति त्वामिति सा वदन्ती साकं कुमारेण तिरो बभूव ॥ 45

तस्या वियोगव्यथयाऽर्पितेन परिष्कृताङ्गस्य भृशं कृशिम्ना ।
चापेन गोपायितुरस्य पृथ्वीमष्टादशाष्टौ च समा व्यतीयुः ॥ 46

चरन्कदाचिन्मृगयां वनान्ते गङ्गापगां वीक्ष्य जगाम चिन्ताम् ।
आविर्भवेदस्य जनस्य मूर्ता सविभ्रमभ्रूरपि नाम साध्वी ॥ 47

एतावता सूनुरनेहसा मे वयो भजेदंसलबाहु बालः ।
समागतस्तेन कदा भवेयं हंसेन मेघान्त इवाब्जषण्डः ॥ 48

---

1. मर्त्यभावम् Ptv. 2. भूमौ A.

तस्यास्तटे कंचिदसौ युवानमात्मप्रतिच्छन्दमिवात्तचापम् ।
स्रोतस्यनुद्वेजितसत्वजातं कुर्वाणमालोकत[1] बाणसेतुम् ॥ 49

सविस्मयस्तब्धदृशं मुहूर्तमस्त्रेण तं केनचिदात्तमोहम् ।
विधाय सद्यो विबुधापगायामन्तर्दधे भानुरिवाभ्रपङ्क्तौ ॥ 50

क्षणेन गङ्गा चिरविप्रयुक्ते तीरस्थिते भर्तरि दत्तदृष्टिः ।
राशेरपां तेन महाविरासीत्पुत्रेण साक्षान्निधिनेव लक्ष्मीः ॥ 51

उपेत्य सा शन्तनुमाह राजन् देवव्रतो नाम सुतस्तवायम् ।
मुनेर्वशिष्ठस्य गुरोः प्रसादादासीदशेषागमपारदृश्वा ॥ 52

गृहाण पारश्वथिकान्महर्षेरवाप्तदिव्यास्त्रकलापमेनम् ।
अलोकसामान्यगुणेन येन त्वं लप्स्यसे प्रीतिमनन्यलभ्याम् ॥ 53

इत्यूचुषी तं परिरभ्य तस्मै वितीर्य निर्यन्नयनाम्बुवृष्टिः ।
पदे पदे द्वावपि वीक्षमाणा ययौ प्रवाहाभिमुखी कथंचित् ॥ 54

तस्या वियोगप्रभवं[2] च दुःखं विस्मृत्य स प्रीतमना नरेन्द्रः ।
पुरं प्रपेदे सह नन्दनेन शशी बुधेनेव शरद्विहायः ॥ 55

कदाचिदायोजितयौवराज्ये निधाय तस्मिन्स धुरं धरित्र्याः ।
सिन्धोः कलिन्दद्विपदानवेण्या रोधः प्रपेदे मृगया विनोदी[3] ॥ 56

आघ्राय गन्धं कमपि प्रभूतं जिज्ञासुरस्य प्रभवं नरेन्द्रः ।
तीर्त्वा भुवं योजनमात्रदूरां ददर्श पारेनदि दाशकन्याम् ॥ 57

स मन्मथानोकहमञ्जरीं तामुदारगन्धामुपभोक्तुकामः ।
कन्यासि बाले दुहिता किमर्थं कूले तटिन्या वससीत्यपृच्छत् ॥ 58

---

1. कुर्वन्त॰ Ptv. 2. प्रिया॰ Ptv.
3. विनोदात् Cv; Ptv.

पितुर्निदेशादिह दाशभर्तुर्नावं नदीस्रोतसि तारयामि ।
श्रुत्वेति वाचं सुदृशः[1] प्रहृष्यन्नगच्छदुच्चैःश्रवसस्सकाशम् ॥ 59

स सत्कृतः कस्य कृते त्वयेयं परिष्कृता भूरिति तेन पृष्टः ।
कृताञ्जलिं सारथिमन्तिकस्थं भ्रूसंज्ञया भूपतिरादिदेश ॥ 60

स चाब्रवीद्दाशपते नृपोऽसौ शरासने दाशरथेस्समानः ।
दिष्ट्या सुतां कामयते त्वदीयां कर्तुं द्वितीयां कुरुराजलक्ष्म्याः ॥ 61

प्रीतस्स सम्राजमुवाच राजन्यदाह सूतः क्रियतां तथा तत् ।
अस्यां तु जातस्सुत एव भूमेरनन्तरं[2] ते भवतु प्रशास्ता ॥ 62

कामं[3] ततो दुष्करमस्य वाक्यं मत्वा[4] नदीसूनुहितो महीशः ।
तूष्णीक एवात्मपुरीमयासीदादाय चित्तेन स दाशकन्याम् ॥ 63

दिने दिने दीप्तमनोभवास्तै[5]रापाण्डुताप्राप्तवतः[6] कृशस्य ।
_त्वा पितुः सूतमुखादुदन्तमाख्यत्सरित्सूनुरुपेत्य दाशम् ॥ 64

तातेन मे यां किल याचितस्त्वं सा राज्यशुल्का कथिता कुमारी ।
तां देहि तत्सूनुमहं विधास्ये वीतस्पृहोऽनन्तरमस्य भूपम् ॥ 5

स विस्मितस्तं निजगाद भद्र त्वया गुरुप्रीतिकृता स्थिरेण[7] ।
सृष्टं[8] सुतस्तेऽर्हति राज्यमेतत्तेनापि हीयेत ममायमर्थः ॥ 66

अथापगासूनुरभाषतोच्चैः शृण्वन्तु सर्वेऽपि मम प्रतिज्ञाम् ।
यावन्मयेदं[9] ध्रियते शरीरं तावद्भविष्याम्यहमूर्ध्वरेताः ॥ 67

---

1. सुहृदः A.
2. ०अनन्तरः A; Ptv.
3. मत्वा A; B.
4. महा A; Ptv.
5. ०भवाग्नेः A; Cv; Ptv.
6. ०आप्तवतः A.
7. ०स्तितेन Ptv.
8. त्यक्तं A; Ptv.
9. ०ममेदं Cv; Ptv.

लोकाः परे केचिदनात्मजानां पुंसां न सन्तीति भणन्ति[1] सन्तः ।
शुश्रूषया मत्पितुरार्जितेन[2] द्रक्ष्यामि पुण्येन पुरस्कृतस्तान् ॥ 68

श्रुत्वा वचस्तद्भयविस्मयाभ्यामाश्लिष्टचित्ता नभसोऽवकाशे ।
महाप्सरोभिर्मुनिभिश्च देवास्तं भीष्मभीष्मेति शशंसुरुच्चैः ॥ 69

आख्यामसौ भीष्म इति प्रतीतामवाप्य तेभ्यः सह पुष्पवृष्ट्या ।
दाशेन दत्तां मुदितेन कालीमादाय पार्श्वं पितुराससाद ॥ 70

अथागतं[3] वीक्ष्य पतिः कुरूणां कृतप्रणामं परिरभ्य दोर्भ्याम् ।
मन्दारमालामदिरासुगन्धावाघ्राय मूर्ध्न्यात्मजमावभाषे ॥ 71

भजन्ति पुत्राः पितरं गुणैस्स्वैस्त्वया कृतं को भुवनेषु कुर्यात् ।
प्रीतोऽस्मि ते वत्स वरं ददामि नाकाङ्क्षितो मृत्युरुपैष्यति त्वाम् ॥ 72

महाकुलीनान्वयमनिन्दनीयैरङ्गैर्निजैरेव निवेदयन्त्याः ।
पृष्टः कुमार्याः प्रभवं नृपेण दाशस्सदस्यागतवानवादीत् ॥ 73

पुरा वसुश्चेदिपतिः कदाचिद्विमानमारुह्य महेन्द्रदत्तम् ।
चरन्दिवि स्फीतसुधाकरस्य सस्मार कामी गिरिकामुखेन्दोः[4] ॥ 74

स्मरातुरस्य च्युतमस्य वीर्यं[5] कलिन्दजायाः पतितं पयस्सु ।
निपीय गर्भिण्यभवत्सुरस्त्री शापान्मुनेः काचन मत्स्यरूपा ॥ 75

तस्या हतायाः प्रथमे नदीयगनायिभिः शस्त्रविपाटितायाः ।
गर्भस्थितौ स्त्रीपुरुषावुपात्तौ शुक्तौ मणी शुद्धगुणाविवोभौ ॥ 76

---

1. वदन्ति A: Cv: Ptv.
2. ०पितुरर्जितेन A.
3. तथाविधं Ptv.
4. दयिता० A.
5. बीजं० Pt.

अदर्शयन्तौ वसवे नृपाय सविस्मयं[1] मात्स्य इति प्रतीतम् ।
पुमांसमादाय कुमारमेनां कन्यामदान्मे कमनीयरूपाम् ॥ 77

अथाभिजातां दिवसे शुभेऽयौ स्वीकृत्य कालीं गिरिजामिवेशः ।
राजन्यवर्यो रमयन्विदग्धामल्पेतरं कालमसावनैषीत् ॥ 78

चित्राङ्गदेनाहृतसंभवेन विचित्रवीर्येण यवीयसा च ।
क्रमोदिताभ्यामिव पुष्पवद्भ्यां दिग्वासवी सा शुशुभे सुताभ्याम् ॥ 79

ततो विधिर्विस्मयोपगूढं[2] नरेन्द्रमारोपयति स्म नाकम् ।
भीष्मोऽपि शस्त्रास्त्रविदं कुमारं चित्राङ्गदं पौरवराज्यपीठम् ॥ 80

स पौरवः सागरमेखलां गामवन्नवज्ञातसमस्तशूरः ।
असन्निधौ सिन्धुभुवः स्वनाम्ना[3] गन्धर्ववर्येण[4] रणे निजघ्ने ॥ 81

सुते हते ज्यायसि सत्यवत्याश्शुचं ज्वलन्तीं हृदि जाह्नवेयः ।
यवीयसो राज्यनिवेशितस्य शान्तामकार्षीदभिषेकतोयैः ॥ 82

कन्यास्ततः काशिपतेस्स तिस्रः पतिंवरा वीरवराग्रगण्यः ।
भ्रातुः कृते हर्तुमना रथेन वाराणसीं कार्मुकवानयासीत् ॥ 83

प्रत्युद्गतस्तत्र तरङ्गवातैरध्वश्रमच्छेदिभिरभ्रसिन्धोः ।
ददर्श मञ्चेषु नृपान्निषण्णान् शृङ्गेषु मेरोरिव सिन्धुरेन्द्रान् ॥ 84

तं प्राप्तमञ्चं वितथप्रतिज्ञः सुरस्रवन्तीसुत एष वृद्धः ।
किमर्थमायात इति ब्रुवाणाः सहस्ततालं जहसुर्नरेन्द्राः ॥ 85

बहूनथाप्तैः कथितापदानाननिच्छया राजसुता स्समालाः ।
समीरगत्येव पयोदरेखाः सविद्युतः क्षोणिभृतो व्यतीयुः ॥ 86

---

1. सविस्मितो A.
2. विधाता जरयोपगूढं Ptv.
3. सनाम्ना A; Cv; Ptv.
4. ०वीरेण Ptv.

आत्मानमालोक्य जरासमेतमन्यत्र यान्तीर्द्रुतमार्ष्यर्ययेव ।
कुरूद्वहस्ता मिषतां नृपाणामारोप्य यानं निरगान्नगर्याः ॥ 87

युयुत्सया वर्त्मनि रुन्धतस्तान्निर्जित्य साल्वप्रमुखान् स भल्लैः ।
स्वयं वृतस्संयति वीरलक्ष्म्या पुरं प्रपेदे सह[1] कन्यकाभिः ॥ 88

निशम्य साल्वे रतिभाजमम्बां प्रस्थापयामास तदन्तिकं ताम् ।
ततोऽम्बिकाम्बालिकयोस्सपाणिमग्राहयद्भ्रातरमापगेयः ॥ 89

साल्वेन सा शल्यहृतेत्यपास्ता गाङ्गेयमासाद्य पतिं ययाचे ।
निराकृता तेन दृढव्रतेन ययावरण्यं तपसे विषण्णा ॥ 90

तदनुविधिबलेन राजयक्ष्मा व्यसनिनमभ्यधिकं विचित्रवीर्यम् ।
प्रतिदिनमुपजायमानशोषं व्यधित गिरेरिव निर्झरं निदाघः ॥ 91

तेनोन्मदेन करिणेव गदेन तस्मिन्
आवासवृक्ष इव राजनि हन्त भग्ने ।
अन्यत्र किञ्चिदवलम्बनमाप्नुवन्तः
शोकाकुलाश्च कुरवः शकुना इवासन् ॥ 92

इति श्रीमदगस्त्यपण्डितकृतौ[2] बालभारते महाकाव्ये[3]
प्रथमः सर्गः

---

1. स हि Pt. 2. A omits पण्डित ।
3. Pt. adds आदिपर्वणि ।

अथ द्वितीयस्सर्गः

अथ क्षितीशस्य यथाविधि द्विजैर्निर्वर्तिते[1] कर्मणि पारलौकिके ।
सरित्सुतं वीक्ष्य समीपवर्तिनं समाददे योजनगन्धया वचः ॥ 1

गते तव भ्रातरि वत्स पञ्चतां चिराय न श्चान्द्रमसं कुलं महत् ।
अदृष्टसन्तानतया न शोभते वनं हरेः प्राङ्मथनादिवोदधेः ॥ 2

अवैषि विद्वन्नखिलं च वाङ्मयं क्रियास्समस्तास्समयोचिता अपि ।
विधीयतां देवरधर्मतस्त्वया सुतोदयः काशिपतेरपत्ययोः ॥ 3

तयैवमुक्तः स जगाद साञ्जलिस्तथैव तद्व्याहृतमम्ब यत्त्वया ।
निजां विमुञ्चेद्यदि वह्निरुष्णतां त्यजेत्प्रतिज्ञां सुरसिन्धुनन्दनः ॥ 4

परश्वधाम्नो भृगुसूनुना पुरा हतेषु सर्वेष्वपि बाहुजन्मसु ।
तदङ्गनासु प्रहितैर्द्विजन्मभिस्सुताः प्रतीता जनयाम्बभूविरे ॥ 5

अनेन पूर्वाचरितेन वर्त्मना त्वयैव नः श्रेयसि जागरूकया ।
वधूद्वये प्रस्तुतकार्यसिद्धये नियुज्यतां कोऽपि तपोनिधिर्द्विजः ॥ 6

तमब्रवीत्सा दधती ह्रियं ततः पुरा मया नौवहने नियुक्तया ।
अधिष्ठितां भानुसुतातटस्थलीमवाप सन्तानपरः[2] पराशरः ॥ 7

स मत्स्यगन्धं सहजं निरस्य मे वितीर्णवान्योजनगन्धतामिमाम् ।
मया समं शापभयाद्विधेयया हिमावृतं द्वीपमियाय यामुनम् ॥ 8

---

1. ०समापिते A. 2. ०पदं A.

तदात्व एवाजनि मन्मुनिर्महान् जटाशिखावानरणेरिवानलः ।
अनन्तवेदव्यसनेन यस्स्वयं जगत्रये व्यास इति प्रथामगात् ॥ 9

अयि स्मृतोऽहं[1] जनयित्रि कर्मसु क्षणादुपस्थास्य इति प्रणम्य माम् ।
वितीर्णकन्यात्वमदृश्यतां गतं तमन्वगच्छत्पितरं तपोनिधिः ॥ 10

तनूभवोऽयं प्रथमो ममाज्ञया सगर्भ्यदारेषु सुतान्प्ररोहयेत् ।
तवैवमिष्टं यदि सद्य एव तं पुरा स्मरामि स्फुरितोरुतेजसम् ॥ 11

निशम्य तद्विस्मयसंमुदस्पृशा कृताभ्यनुज्ञा सरितस्सुतेन सा ।
उपांशु सस्मार पराशरात्मजं स चाविरासीदहिमांशुसन्निभः ॥ 12

प्रणामलग्नेन ललाटभस्मना भृशं पवित्रीकृतपादपङ्कजा ।
सुतं सवित्री परिरभ्य वत्सला दृशौ स्तनौ चोदवहत्पयस्स्रुतौ ॥ 13

स सत्कृतस्सत्यवतीं व्यजिज्ञिपन्मनीषितं मातरवैमि तावकम् ।
तथा करिष्यामि विरूपता मम प्रजापतिभ्यां समये विषह्यताम् ॥ 14

तिरोहितेऽस्मिन्त्रिदशाकृते ततः शशाङ्कवंशाङ्कुरसम्भवाशया ।
चिराय वध्वौ बहुभिर्निदर्शनैर्विधेयताया विषयीचकार सा ॥ 15

नरेन्द्रपत्न्यौ निशि तत्र तल्पगे पतिं स्मरन्त्यौ प्रयतेन चेतसा ।
मुनेरभूतां प्रतिपालितोदये विधोर्विशाखे इव पूर्वमुद्गते ॥ 16

अथाम्बिका वासनिकेतनागताज्जटाकलापाजिनवल्कधारिणः ।
असह्यगन्धं दधतो विरूपतां जुगुप्समाना निमिमील तापसात् ॥ 17

तथाविधां तामनुगृह्य निर्गतो गृहात्कृतात्मा जननीं जगाद सः ।
गजायुतप्राणभृदुद्भविष्यति प्रमादतो मातुरचक्षुरात्मजः ॥ 18

1. स्मर त्वं Pt.

तया बभाषे स च नातिहृष्टया भवन्तमन्याऽपि वधूरुदीक्षते ।
कुमारमुत्पादय तत्र तादृशं विजेष्यते भूवलयं भुजेन यः ॥ 19

तथेति मातुः प्रतिगृह्य शासनं ययौ तदीयं भवनं तपोनिधिः[1] ।
विलोक्य सा चैनमुवाह लज्जिता विपाण्डुरत्वं पुर एव दोहदात् ॥ 20

स तां च संभाव्य सतां पुरस्सरः[2] पुनस्सवित्रीमुपसेदिवान्मुनिः ।
उवाच पांडुर्जननीविकारतः सुतः प्रवीरो जनिता[3] महानिति ॥ 21

अदृश्यतां तत्र गते तपस्विनि क्रमेण देव्यौ जनयाम्बभूवतुः ।
धृतोरुसत्त्वं धृतराष्ट्रमात्मजं वृतं च पाण्डुं भुजचण्डिमश्रिया ॥ 22

शिशुं तयोरन्धमवेक्ष्य वासवी कृतार्थतां चेतसि नोपजग्मुषी ।
स्मृते मुनौ सन्निहिते हितैषिणी न्ययुङ्क्त भूयस्स चटूक्तिरम्बिकाम् ॥ 23

निरूप्य वैरूप्यममुष्य भीतया तया नियुक्ता परिचारिका निजा ।
विदग्धनेपथ्यवती तदन्तिकं ययौ विलासालसमन्थरैः पदैः ॥ 24

तया निकामं प्रतिबद्धरागया विचित्रकण्ठस्वरयोगहृद्यया ।
बभूव गीत्येव मृगो भुजिष्यया सरोमहर्षः स वशी वशीकृतः ॥ 25

स मातरं प्राप्य जगाद मामकं भवद्वधूदास्युपकण्ठमागता ।
तदस्य धर्मो मुनिशापगोचरः सुतत्वमस्या विदुरः प्रपत्स्यते ॥ 26

अपत्यकृत्यै न पुनर्नियुङ्क्ष्व मामिति ब्रुवत्येव मुनौ [4] वनं गते[4] ।
सुतेन शूद्रा शुशुभे सुजन्मना फलेन सम्यग्विहितेव सत्क्रिया[5] ॥ 27

---

1. ०वनः A. 2. पुरस्कृतः A; Ptv.
3. भविता A, Pt. 4–4. तिरोहिते Ptv.
5. सत्कृतिः A; Ptv.

त्रयः कुमाराः कुरुवंशवर्धनास्सुरस्रवन्तीतनयेन वर्धिताः ।
क्रमेण सर्वासु कलासु दक्षतां दशां च दर्पप्रसरोन्नतां[1] ययुः ॥ 28

शुभे मुहूर्ते धृतराष्ट्रमासने निवेशयामास कुलक्रमागते ।
अमुष्य पाण्डुं विदुरं सधीरधीश्चकार सेनान्यममात्यमप्युभौ ॥ 29

तयोस्तु शौर्येण नयेन चार्जितां श्रियं दधानस्य कृते महीक्षितः ।
नदीभुवा दूतमुखेन याचितो बभूव गांधारपतिस्सुतां शुभाम् ॥ 30

प्रदित्सतः स्वं पितुरन्धमात्मनो निशम्य भर्तारमुदूढसंमदा[2] ।
अरुन्धतीकीर्तिमसौ निरुन्धती बबन्ध पट्टेन दृशौ पतिव्रता ॥ 31

अमात्यवृद्धोपहृता महीक्षिता करे गृहीता सुबलस्य कन्यका ।
अगच्छदन्तःपुरिकासु मुख्यतां सरित्सु गङ्गेव सरस्वताऽहृता[3] ॥ 32

अथैकदा शूर इति प्रथां गतः पृथां यदूनां पतिरात्मसंभवाम् ।
सुतां तनूजाय पितृष्वसुर्ददौ व्यपाकरिष्यन्ननपत्यताशुचम् ॥ 33

स कुन्तिभोजो वसुदेवसोदरां नवामिवोद्यानलतां विवर्धिताम् ।
तपोधनं क्रोधनमागतं गृहे वसन्तमाराधयितुं न्ययुङ्क्त ताम् ॥ 34

विसृज्य सा कन्दुकखेलनं तदा विहाय लीलाविहगोपलालनम् ।
सखीसहालापमपास्य चान्वहं मुनेरभूत्तस्य निदेशकारिणी ॥ 35

सकृद्द्वयस्यास्तनपत्रवल्लरी विलम्बनेनापि नितान्तखेदिनी ।
स यद्यदाज्ञापयति स्म दुष्करं क्षणेन तत्तन्निरवर्तयत् पृथा ॥ 36

---

1. ०प्रसरोष्मलां Cv; ०प्रकरोष्मलां Ptv; ०प्रसरोष्मतां A.
2. ०कौतुका Ptv. 3. सरस्वदा हृता Ptv; सरस्वता वृता A.

स कन्यकासद्मनि वत्सरं स्थितो निजं यियासुर्निरपायमाश्रमम्[1] ।
नृपात्मजायै परिचर्यया परं प्रसेदिवान्मन्त्रमुपादिशन्मुनिः ॥ 37

अनेन मन्त्रेण शुभे शुभंयुना सुरेषु यं यं प्रियमाह्वयिष्यसि[2] ।
सुतं स्वतुल्यं स स दास्यतीति स तोषयित्वा सहसा तिरोदधे ॥ 38

गते तु दूर्वाससि जातु यादवी परीक्षितुं मन्त्रमुपात्तकौतुका ।
अहर्मुखे हर्म्यगताऽमुना रहः समाजुहावोदयपाटलं रविम् ॥ 39

स पीतवासाः कवची सकुण्डलः किरीटवान् हारधरो धृताङ्गदः ।
उपागतस्तां विकसन्मुखाम्बुजां करैस्समालम्बत पद्मिनीमिव ॥ 40

दिनेश कन्याऽस्मि पितुर्वशंवदा[3] त्वमेव धर्मं[4] ननु वेत्सि मुञ्च माम् ।
इति ब्रुवाणां सुदृशं स वेपिनीं जगाद रोषादिव रोचिषां पतिः ॥ 41

अनादृतच्छायमिहागतं जनं वरोरु न प्रीणयितुं यदीच्छसि ।
करोमि तावत्तव[5] मन्त्रदायिनं मदीयशापोरगवेष्टितं मुनिम् ॥ 42

करोषि चेत्काङ्क्षितमूढतेजसं यथाऽदितिर्मां प्रसविष्यसे सुतम् ।
मम प्रभावादखिलामरात्मनो न कन्यकाभावमिमं च हास्यसि ॥ 43

नतेन[6] लज्जास्मितगर्भिनेन तां मुखेन कृतानुमतिं विजज्ञिवान् ।
प्रभामिवादाय पतिस्त्विषां ततो शरद्घनाभं शयनीयमासदत् ॥ 44

अनुप्रवेशादयमात्मतेजसः शिखामिवाग्नेरधिकोज्ज्वलाकृतिम् ।
दृशा प्रसादामृतवृष्टिगर्भया त्रिमूर्तिराप्रच्छ्य पृथां तिरोदधे ॥ 45

---

1. ०आस्पदम् A; Cv; Ptv.
2. ०आह्वये: स्वयम् Ptv.
3. ०वशंगता A; Ptv.
4. सर्वम् Ptv.
5. यावत्० A; Ptv.
6. स० A; Ptv.

अथेप्सितार्थप्रतिपादनार्हतामुपेयिवांसं सुरभर्तुरर्थिनः ।
असूत चिन्तामणिमूढतेजसं[1] समुद्रवेलेव नृपात्मजा सुतम् ॥ 46

निधाय तं तत्क्षण एव पेटके यथोरगं कुण्डलकञ्चुकोज्ज्वलम् ।
सुरस्रवन्त्यामपवाद शङ्किता[2] सखीभिराप्ताभिरसाववमोचयत् ॥ 47

क्रमेण मञ्जूषिकया धृतं तया शिशुं हरेः पञ्जरवर्तिनं यथा ।
तरङ्गडोलाशतलालितं[3] शनैः निनाय तं सूतपुरान्तिकं नदी ॥ 48

यदृच्छया तत्र विहर्तुमागतौ विलोकितौ[4] सादरमंशुमालिनः ।
कुमारमुद्घाटितपेटकाहृतं निरीक्ष्य राधाधिरथौ[5] ननन्दतुः ॥ 49

ततस्स ताभ्यां प्रमदेन वर्धितो जगत्सु राधेय इति [6]प्रथां गतः[6] ।
क्रमेण कर्णो जमदग्निसूनुना व्यनीयतास्त्रे विनयादुपागतः[7] ॥ 50

अथावृणीतावगणय्य भूपतीन्पृथा पतिं पाण्डुमसौ स्वयंवरे ।
सुजातमैरावतमन्तरेण किं कटाक्षयत्यभ्रमुरन्यहस्तिनः ॥ 51

समुद्रगायास्तनयेन धन्विना जयश्रियं मूर्तिमतीमिवाहृताम् ।
स मद्रराजस्य सुतां सुमध्यमां चकार माद्रीं सहधर्मचारिणीम् ॥ 52

कदाचिदाखेटविहारकौतुकी[8] स भोजमद्राधिपकन्यकासखः ।
धृतश्रमैर्धन्विभिरन्वितो रथी ययौ वनं हैमवतं महारथः[9] ॥ 53

---

1. ०चेतसं Cv; Ptv. 2. शङ्कया Ptv.
3. ०डोलान्तर० A. 4. महाद्युतिं A; विलोकयतां Ptv.
5. ०अतिरथौ A. 6–6. प्रथामगात् A.
7. ०उपस्थितः Cv; Ptv. 8. ०लोलुपः Ptv.
9. महाबलः Ptv.

स तत्र नागैरुरुभिर्दुरासदं सशूरसिंहं चलखड्गिसङ्कुलम् ।
कुलं मृगाणामवधीत्कुरूद्वहो दिशां जये द्रप्तमिव द्विषां बलम् ॥ 54

उरो विपक्तैर्मृगरक्तबिन्दुभिर्नितान्तसम्भिन्ननिदाघपाथसः ।
नृपस्य खेदं मृगया विहारजं जहार नीहारगिरेस्समीरणः ॥ 55

चरन्नरण्ये रममाणमेकदा पुरो मृगद्वन्द्वमुदीक्ष्य[1] कौरवः ।
शरेण विव्याध मृगं स च क्षणाददृश्यत क्रन्दितमुत्सृजन्मुनिः ॥ 56

तमब्रवीत्सास्रकणव्रणेक्षणो[2] नृपाह्वयया किंदम इत्यहं द्विजः ।
गतो मृगत्वं रमयन्निजां वधूं स्मरेषुविद्धोऽस्मि[3] शरेण ते हतः ॥ 57

यमन्तिकं यास्यति [4]भाव ईदृशे[4] भवानिति व्याहृतिमान् जहावसून् ।
पतिं समारोप्य चितामुदर्चिषं तदीयपत्नी च पतिव्रताऽन्वगात ॥ 58

नृपस्य निर्विण्णमना विरक्तिमान् समं वधूभ्यां चरितुं महत्तपः ।
निवर्त्य दीनानखिलाननुप्लवान्वनं मुनीनामनुपप्लवं ययौ ॥ 59

समं सुखैर्वैषयिकैर्विभूषणा न्यपास्य वल्कं वहता जटाभृता ।
चिराय पत्नीसहितेन पाण्डुना तपो वितेने शतशृङ्गवासिना ॥ 60

नखम्पचस्त्रीकुचमर्दनोचितः करीन्द्रकुम्भाहतिकेलिलम्पटः ।
स तेन भीताभयदानदीक्षितः[5] कुशाङ्कुरादानविधौ कृतः करः ॥ 61

धनुर्गुणामर्शनकर्कशाङ्गुलिर्महेभकुम्भाहतिनिष्ठुरोदरः[6] ।
दिने दिने होमसमद्धिभञ्जने विवेद हस्तोऽस्य न जातु वेदनाम् ॥ 62

---

1. ०अवेक्ष्य Ptv. 2. ०शर० A; Ptv.
3. स्मरेण० A. 4-4. भावमीदृशं A.
5. दीना० Ptv. 6. धनुर्गुणा० कर्पिताङ्गुलि.....झर्जरोदरः Ptv.

तपोवने राज्य इव स्थितो विभुर्मृगैर्विनीतैस्सह[1] बद्धसौहृदः ।
निगृह्य शत्रूनन्तर्हितस्थितानयं प्रवर्धयामास तपोमयं धनम् ॥ 63

स जातु राजर्षिरुवाच यादवीं सपर्यया व्यासमुनेः प्रहृष्यतः ।
वरप्रसादेन सम प्रजावती बिभर्ति गर्भं शतपुत्रदायिना ॥ 64

मया न तत्पुण्यमकारि मृग्यते सुताह्वयं येन तमोपहं महः ।
यदन्यदप्यार्जितमध्वरादिभिर्वृथा हि तत्सर्वमपुत्रसंपदः ॥ 65

स्तनं जनन्याः पिबतोऽङ्कशायिनो मुखं शिशोरश्रुमुचा पिबन्दृशा ।
पिता यथा निर्वृतिमश्नुते तथा ज्वलन् पितृणां हृदि शोकपावकः ॥ 66

तदद्य मे पूज्य कुन्ति काङ्क्षितं भजन्ति दारैः गृहमेधिनश्शुभम् ।
अहं तु शापोपहतस्तपस्विनो लभस्व पुत्रं पुरुषान्महौजसः ॥ 67

तमाह मा नाथ निगर्हितं सतामनुक्तपूर्वं वचनं त्वयोदितम् ।
पतिं त्वदन्यं कथमाश्रयेत्पृथा समुद्रगा किं सरिदेति पल्वलम् ॥ 68

नृपेण भूयस्सनिदर्शनोक्तिना कथंचिदभ्यर्थितया तया ततः ।
अभाणि लाभः परितोषितान्मुनेः शुभस्य मन्त्रस्य विना परीक्षणम् ॥ 69

प्रशंसता तेन नियोजिता पृथाऽऽजुहाव[2] धर्मं निजमन्त्रसंपदा ।
अनेन संपर्कमुपेयुषी च सा रराज तारेव[3] तुषाररश्मिना ॥ 70

ततो मुहूर्तेऽभिजिति प्रियङ्करे तिथौ शुभायां प्रथितौजसं पृथा ।
युधिष्ठिरं पुत्रमसूत पावनं जटाटवी गाङ्गमिवोरगाशितुः ॥ 71

सुरैस्तदुत्पत्तिदिनेऽभिनन्दिते प्रसक्तिरद्भिस्सह दिग्भिराददे ।
अनोकहानां कुसुमैस्सहाधिकं मनांसि चामोदमधारयन्सताम् ॥ 72

---

1. ०रिव लब्ध० Ptv. 2. मुदाऽऽजुहाव Pt.
3. राकेव A.

निरीक्षमाणस्य सुताननं शुभं नृपस्य गात्रात्पुलका निरन्तरम् ।
निरीयुरन्तःप्रमदाय सर्पते ध्रुवं समन्तादवकाशदित्सया ॥ 73

निशम्य कुन्त्याः सुतजन्म सौबला मयैष गर्भस्तु चिराद्धृतो महान् ।
न जायते जात्विति वोढुमक्षमा[1] सधैर्यमात्मोदरमाहताश्मना ॥ 74

क्षणेन पेशीं पतितां सशोणितां ददर्श पाराशरिरागतस्तदा ।
पतिः प्रभाणामुषसीव विश्लथां द्युगर्भतस्सान्ध्यपयोदलेखिकाम् ॥ 75

स मांसकोशं शतधा विभज्य तं निधाय कुम्भेषु भृतेषु सर्पिषा ।
विभक्तशेषं पिशितं कराहृतं परत्र कुर्वन्कलशे वचोऽब्रवीत् ॥ 76

अलं शुचा राज्ञि न मे वृथा वरः[2] शतं सुतास्ते दुहिता च काचन ।
विभिद्य पूर्णावयवा घटानिमान्विनिर्गमिष्यन्ति विसृत्वरौजसः ॥ 77

इतीदमाख्याय तिरोहिते मुनौ ननन्द गान्धारनरेन्द्रनन्दिनी ।
ररक्ष गूढं कलशान्निजात्मजानवाप्तुमण्डानि यथा महोरगी ॥ 78

पृथा निदेशान्निजभर्तुरेकदा समाह्वयन्मन्त्रबलेन मारुतम् ।
स चागतस्संभृतपुष्पसौरभो लतामिवैतां स्पृशति स्म माधवीम् ॥ 79

गते तु तस्मिन्मरुति स्वमास्पदं शुभे मुहूर्ते दिनमध्यगे रवौ ।
असूत भीमं क्षणदाचरान्तकं [3-]पृथा सुतं[-3] मारुतिमञ्जना यथा ॥ 80

मुमोच कार्णद्रुमकोरकच्छलात्सुतोदयेन प्रमदाश्रु मारुतः ।
प्रियस्सुहृत्तस्य च वेदिषु ज्वलन्ननर्त हर्षादिव वह्निरुच्छिखः ॥ 81

अलब्ध यत्राहनि जन्म मारुतिस्ततस्तु पूर्वत्र निशीथिनीमुखे ।
अजायत व्यायतलोचनोत्पलः सुयोधनो मानधनाग्रतस्सरः ॥ 82

---

1. सोढु० A; Cv; Ptv. 2. वच: A; Ptv.

3–3. महाबलं A.

तदीयजन्मोत्सवतूर्यनिस्वनाः[1] शिवारुतैरन्तरयाम्बभूविरे ।
असृग्भिरौत्पातिकमभ्रमाप्लुतांश्चकार पौरान्प्रमदाश्रुवर्षिणः ॥ 83

शरारुवृत्ताश्च शतेन वासरैः क्रमादजायन्त सुयोधनानुजाः ।
अभूच्च तेषामनवद्यजन्मनां यवीयसी काचन दुश्शलाभिधा ॥ 84

विकासलक्ष्म्येव तया परिष्कृतैः [2]असौ कुमारैः[2] सुबलस्य कन्यका ।
आमुक्तपार्श्वस्थितिरात्मजैर्बभौ शतेन पत्रैरिव पद्मकर्णिका ॥ 85

निजेन भर्त्रा पृथया नियुक्तया महीयसा मन्त्रसमाधिना स्मृतः ।
दिवस्पतिर्जह्नुजयेव दिग्गजस्तया च संगम्य यथागतं ययौ ॥ 86

अथोदयं जग्मुषि मासि फाल्गुने दिने शुचिन्युत्तरफल्गुनीयुते ।
अजीजनद्वीरमसौ यदर्जुनं जगत्त्रये तेन स फल्गुनः स्मृतः ॥ 87

प्रकीर्णमन्दारपरागवृष्टिभिः[3] प्रमोदनृत्तोचिततूर्यनिःस्वनैः ।
महर्षयः सङ्कुलमप्सरोगणैरमंसत स्वः शतशृङ्गमागताः ॥ 88

अनुत्तमं मन्त्रमपास्तविग्रहा ददौ स पत्न्यै दयिताज्ञया[4] पृथा ।
सकृत्प्रयुक्तेन[5] च तेन सा पुनः सुतौ यमौ लिप्सुरकाङ्क्षदश्विनौ ॥ 89

क्षणेन तौ तत्र नृपावरोधने समेत्य पुत्रौ जनयांबभूवतुः ।
कुलस्य पूरोर्नकुलं विभूषणं महानुभावं सहदेवमप्युभौ ॥ 90

सुतैरुदारैस्त्रिदिवो यथा द्रुमैः प्रसूनधन्वेव शरैर्मनोहरैः ।
रराज भूतैरिव पद्मसंभवो महद्भिरेभिर्नृपतिस्स पञ्चभिः ॥ 91

---

1. ०जन्मोदित० Ptv.
2–2. मसौकुमार्यैः A; Ptv.
3. ०सुष्टिभिः Ptv.
4. पतिशासनात् Ptv.
5. ०प्रयोज्येन A; Ptv.

अक्लृप्तधात्र्यङ्गुलिपल्लवग्रहाः क्रमादनाकर्णितवेत्रिचाटवः ।
मणिस्थलीचङ्क्रमणोचिताङ्घ्रयः पदान्यकुर्वन्नुटजाङ्गणेषु ते ॥ 92

तपोधनानामुपलालितास्सुतै[1]रितस्ततः कल्पितपांसुकेलयः ।
वितेनिरे सिंहसटाविकर्षणं तपोवनस्था कलभा[2] इवाभियः ॥ 93

अथोपनीतैः श्रुतिपारदृश्विभिः[3] विशिष्टविद्याधिगमोज्ज्वलैश्च तैः ।
न केवलं संततिरेव भारती मता च धन्याऽजनि तान्प्रशंसताम् ॥ 94

क्रमेण तेषामुपपादयन्मुदं मधुव्रतानामिव लोकचक्षुषाम् ।
सरोरुहाणीव नवानि सौरभं प्रसाधयामास वपूंषि यौवनम् ॥ 95

भुजैः सह द्राघिमसम्पदं दधौ विशालमालक्ष्यत वक्षसा समम् ।
निकाममेषां सह मन्द्रवृत्तिना स्वरेण च स्निग्धमजायतेक्षणम् ॥ 96

कुहूमुखानां कुशलोदयस्ततो मदोद्गमो मन्मथगन्धहस्तिनः ।
प्रदायसां वैजननो नभस्वतां वनेषु मासः पदमादधे मधुः ॥ 97

समीरणोत्था नवचूतरेणवो वसन्तलक्ष्मीपटवासपांसवः ।
प्रपेदिरे मन्मथमन्त्रवादिनो वियोगिसम्मोहनचूर्णमुष्टिताम् ॥ 98

प्रसूनगन्धेन समस्तवीरुधां प्रसर्पता वासितदिङ्मुखो मधुः ।
न मालतीसौरभशोभितोऽभवद्भवन्ति के वा भुवि पूर्णसम्पदः ॥ 99

समीरणेन ह्रियमाणमुन्मिषद्रजःकणं पुष्पमशोकशाखिनः ।
प्रसूनबाणेन रुषा वियोगिषु प्रयुक्तमाग्नेयमिवास्त्रमाबभौ ॥ 100

मधुद्रवस्वेदकणानुषङ्गिणी नवोद्गमा केसरकुट्मलावलिः ।
वसन्तसंपर्कवशादुदञ्चितामुवाह रोमाञ्चरुचिं वनश्रियः ॥ 101

---

1. ०लालितैं स्सुतैः A. 2. शरभाः A; Ptv.

3. श्रुत० Ptv.

अथानिलैर्दक्षिणदिङ्मुखागतैः कृतान्तदूतैरिव कृष्टमानसः ।
महीपतिर्माधवलब्धयौवनं स मद्रपुत्रीसहितो वनं ययौ ॥ 102

सुशीतलैः केसरशीधुशीकरैरतिप्रगल्भैः[1] कलकण्ठपञ्चमैः ।
स्मरो वसन्तश्रियमस्य पश्यतश्चिराय सुप्तो मनसि व्यबुध्यत ॥ 103

प्रकीर्णपुष्पोच्चयगन्धगर्भितां[2] स माधवीमण्टपिकामुपेयिवान् ।
तपस्विशापस्मरणात्प्रवेपिनीं बलादगृह्णादबलां स्मरातुरः ॥ 104

सुखेन पाण्डुः सुरतान्तजन्मना परासुभावेन च मीलितेक्षणः ।
प्रसूनतल्पे निपपात तत्क्षणं पृषत्कशय्यासदृशे मनोभुवः ॥ 105

तथागतं[3] वीक्ष्य पतिं तलोदरी विधाय सद्यः परिवीतवाससम् ।
नवेन शोकेन भयेन चाकुला निपत्य चक्रन्द महीतले चिरम्[4] ॥ 106

निशम्य तत्क्रन्दितमागता वनं क्षणेन पुत्रैस्सह तापसान्वितैः ।
निकुञ्जगर्भे कुरुवीरकुञ्जरं[5] पृथा विधिव्याधहतं व्यलोकयत् ॥ 107

[6-]किमेतदित्याकुललोचना हृदि[-6] स्तनद्वयोत्कम्पिनि कुर्वती करौ ।
निपत्य तस्योपरि गाढविह्वला रुरोद पुत्राश्च युधिष्ठिरादयः ॥ 108

निरुद्धबाष्पे रुदतो नृपात्मजानभीक्ष्णमाश्वासयति द्विजव्रजे ।
प्रवर्तयन्त्यश्रुजलानि पादयोर्निपत्य माद्री निजगाद यादवीम् ॥ 109

दिवं प्रपन्नः पतिरेष मत्कृते विलम्बनं मे सहते न तु क्षणम् ।
तदन्तिकं प्रेषय साध्वि मां द्रुतं सुताननाथानिह रक्षितुं स्थिता ॥ 110

---

1. केतकगर्भशीकरैः॰ Ptv.
2. ॰गर्भितांतरां Ptv.
3. तथाविधं Ptv.
4. भृशम् Ptv.
5. कुरुराज॰ Ptv.
6-6. ॰इत्यार्तरवा पृथा Ptv, ॰इत्याकुलचेतना Ptv.

विचिन्त्य कार्यस्य गतिं गरीयसीं मृतेः पृथायै विनिवृत्तचेतसे ।
निरुद्धबाष्पप्रसरा ददावसौ यमौ रुदन्तावनुयास्यती पतिम् ॥ 111

अतिप्रवीणैः पितृमेधकर्मणि द्विजातिवर्यैः सह काश्यपादिभिः ।
युधिष्ठिरो धीरमनाः स्वयं पितुः समापयत्तत्समयोचिताः क्रियाः ॥ 112

प्रणम्य माद्री प्रयता तपोधनान्[1] गिरस्तदीयाः प्रतिगृह्णती शुभाः ।
क्षमस्व शाठ्यं मयि क्लृप्तमीर्ष्यया ममेति कुन्त्यै परिकल्पिताञ्जलिः ॥ 113

सुतान् परिष्वज्य धृताश्रुशीकरे[2] प्रमृज्य नेत्रे वदती[3] जयाशिषः ।
प्रदक्षिणीकृत्य चितागतं पतिं शुचिस्मिता प्राविशदाशुशुक्षणिम् ॥ 114

नृपस्य पत्नीसहितस्य पाण्डवैः समापिते तत्र परेतकर्मणि ।
अनैषुरेभिस्सह दुःखितां पृथां पुरं कुरूणां शतशृङ्गतापसाः ॥ 115

चिराय पाण्डोर्निधनेन तादृशीं विजृम्भमाणां शुचमम्बिकासुतः ।
तदात्मजानामुपलालनोत्सवैः[4] जहौ पितृव्यस्य च दर्शनेन ते ॥ 116

सततममितसत्त्वः पाण्डवेषु द्वितीयः
पथि पथि मृदुपांसौ क्रीडतो राजधान्याः ।
व्यहरत शतसंख्यान्पीडयन्धार्तराष्ट्रान्
सुत इव विनतायाः शैशवे काद्रवेयान् ॥ 117

इत्यगस्त्यपण्डितकृतौ[5] बालभारते महाकाव्ये
द्वितीयस्सर्गः समाप्तः ॥

---

1. प्रयतांस्तपोधनात् A; Ptv.
2. धृताश्रुणीकरात् Ptv.
3. ददती A; Ptv.
4. तमात्म० Pt.
5. ०कवि० A.

अथ तृतीयः सर्गः

जातु जह्नुदुहितुर्जले चिरं पद्मगन्धिनि विहृत्य निर्गतः ।
पौरवैः पटगृहेषु भूषितैर्भुक्तवद्भिरुषितं तटे सुखम् ॥ 1

तत्र वारिविहृतिश्रमालसं निद्रया परवशं वृकोदरम् ।
सिन्धुशीकरभृतः सिषेविरे मन्थरा दिनविरामवायवः ॥ 2

आयताभिरहितं[1] सुयोधनस्तं सुषुप्तमवबध्य वल्लिभिः ।
भोगिनद्धमिव मन्दरं हरिः सिन्धुगर्भपयसि न्यपातयत् ॥ 3

स प्रबुध्य सरितः समुत्थितश्छिन्नबन्धनशतः स्वपन्[2] पुनः ।
विद्विषा कुरुसुतेन मोचितैरुद्विषाग्निभिरदश्यतोरगैः ॥ 4

तान्स्फुरद्दशनकोटिभीषणानुत्फणानदयदष्टमर्मणः ।
तत्क्षणं स्वपनविघ्नकारिणो मत्कुणानिव पिपेष मारुतिः ॥ 5

स्वेन हन्तुमपरेद्युरुत्सुको वत्सलः किल सजग्धिमाचरन् ।
दुर्मतिः कवलगोपितं विषं मारुतात्मजममावभोजयत् ॥ 6

दुस्सहेन गरलेन विह्वलं गाढरज्जुनहनं स तं शठः[3] ।
शातशूलवति जाह्नवीपयस्याप्तकिङ्करशतैरपातयत् ॥ 7

शैलवद्गुरुतरो बलाद्रिधेः शूलकोटिभिरविक्षतः पतन् ।
आससाद विषलुप्तचेतनो नागलोकमनिलस्य नन्दनः ॥ 8

---

1. आयताभिरभितः Ptv. 2. श्वसन् A.
3. ततः A.

770 — 4

तत्र सर्पशिशुभिर्विहारिभिस्तस्य दष्टवपुषः पुरातनम् ।
स्थावरं सपदि जङ्गमेन तन्नूतनेन विषमभ्यभूयत ॥ 9

लब्धसंज्ञमवमुक्तबन्धनं तं दशाङ्कुजगदर्पहारिणम् ।
वायुसूनुमवगम्य[1] वासुकिः प्रीतिमाननयदात्मनो गृहम् ॥ 10

तत्र मारुतहितं चिकीर्षतः शासनेन पवनाशनप्रभोः ।
आपिबत्स दशकुण्डसंभृतं[2] कुञ्जरायुतबलावहं रसम् ॥ 11

तृप्तिमानुरगदर्शितं गतस्तल्पमष्टदिवसानि संविशन् ।
सिन्धुरोधसि निपीतपाथसः साम्यमाप निभृतस्य वार्मुचः ॥ 12

तावदम्भसि निपात्य मारुतिं सौबलेन सह कौरवात्मजः ।
पूर्वमाश्रितजनाभिनन्दितां प्रीतिमाप महतीं ततः पुरीम् ॥ 13

यादवी च तनयं सहेतरैर्वामितेव कलभं विचिन्वती ।
अभ्रमत्प्रतिदिनं पुराद्बहिः काननेषु सरसीषु सिन्धुषु ॥ 14

शङ्किता सुतवधं सुयोधनाद्विह्वला विदुरभाषितामृतैः ।
सा निदाघमिहिरातपाहता द्यौरिवेन्दुकिरणैरुदश्वसत् ॥ 15

स प्रबुध्य नवमेऽह्नि सारवान्वासुकिप्रहितभोगिधारितः[3] ।
निर्जगाम तरसा रसातलाज्जाह्नवीजलपथेन पाण्डवः ॥ 16

तान्विसृज्य वहनालसैः फणैः पन्नगान्प्रणमतो गतः पुरम् ।
भ्रातृपौरधृतराष्ट्रजन्मनां हर्षविस्मयशुचश्चकार सः ॥ 17

लब्धविद्यमथ गौतमात्पितुर्जातु शन्तनुसुतः कृपं कृती ।
पाण्डुसूनुधृतराष्ट्रजन्मनामस्त्रशिक्षणविधौ गुरुं व्यधात् ॥ 18

---

1. ॰उपगम्य A. 2. ॰कुंभ॰ A; Ptv.
3. ॰वाहनः Ptv.

तेन तेषु धनुषि प्रगल्भतां लम्भितेष्वपि सरित्सुतः क्षितौ ।
अन्वियेष गुरुमन्यमुच्छ्रितं वस्तु वाञ्छति गुणोत्तरं जनः ॥ 19

पौरवः परशुलक्षणान्मुनेः द्रोणमात्तसकलास्त्रसंपदम् ।
आनिनीषुरभवन्महौजसं सोऽपि हास्तिनपुरं तदाऽऽययौ ॥ 20

भार्यया सहकुमार्याऽन्वितो विक्रमानुगतयेव विद्यया ।
सत्कृतो विधिवदापगासुतं कुम्भयोनिरिदमाह संसदि ॥ 21

अग्निवेशममृषिमस्त्रलब्धये प्रश्रितः परिचरन्मया सह ।
बाल्य एव दृढबद्धसौहृदो मां प्रति द्रुपद एवमब्रवीत् ॥ 22

भद्र मत्पितुरनन्तरं महीं शासतो मम समुद्रमेखलाम् ।
अर्धराज्यपरिभोगभाजनं[1] त्वां विधास्य इति सख्यमीदृशम् ॥ 23

सोमके धृतभुजौजसि क्रमात्पैतृकं सुहृदि संश्रिते पदम् ।
तत्प्रकाशमगमं न निस्पृहः सेवयाऽनुमितधर्मविप्लवः ॥ 24

मुग्धमेनमथ दुग्धकांक्षिणं पीतपिष्टरसहृष्टमात्मजम्[2] ।
वीक्ष्य दुर्गततया गरीयसीमासदत्कृपयवीयसी शुचम् ॥ 25

स्वीकृता तदनु गर्हिता मया दैन्यवृत्तिजननी च याचना ।
अप्यकृत्यविधिना विपश्चितः कुर्वते खलु कुटुम्बरक्षणम् ॥ 26

यज्ञसेनमुपगम्य संसदि स्वेन मां प्रियसखं न्यवेदयम् ।
सोऽपि कोपकलुषीकृताननः सोपहासमिदमुद्धतोऽवदत् ॥ 27

दुर्गतस्य तव च द्विजन्मनः [3-]क्षत्रियस्य मम संपदान्निधेः[-3] ।
काचरत्नघटनोपमं द्वयोः सख्यमेतदुपपद्यते कुतः ॥ 28

---

1. ०भागिनं A; Ptv. 2. मानसम् A; **Ptv.**

3-3. भूभुजश्च मम बाहु जन्मनः A; Cv; Ptv.

इत्थमप्रियगिराऽवमानितः त्वत्संकाशमयमागतो जनः ।
नप्तृभिस्तव महास्त्रपारगैः पूरयिष्यति निजं मनोरथम् ॥ 29

तन्निशम्य वचनं प्रमोदवान्कुम्भजाय गुरवे कुरूद्वहः ।
प्रश्रितः प्रथममर्थमूर्जितं[1] पौत्रवर्गमसमं[2] ददौ ततः ॥ 30

रेणुकातनयपादरेणुभिस्तेन पूतशिरसा नृपात्मजाः ।
आयुधेषु विधिवद्विनिन्यिरे धन्विनश्च भुजदर्पमात्मनः[3] ॥ 31

भूतलैकतिलकेन भूष्णुना[4] मातरिश्वतनयानुजन्मना ।
कृष्यते स्म गुणवच्छराशनं चित्तमस्य च गुरोरहर्निशम् ॥ 32

एकलव्यमथ जात्वनुज्ञया शिक्षितास्त्रमधिकं धनुष्यसौ ।
दक्षिणार्थहृतदक्षिणाङ्गुलिः फल्गुनस्य सममेव तं व्यधात् ॥ 33

स्थापितं कलशजेन पादपे लक्षितं शिरसि केवलं नरः ।
पत्रिणा कृतकभासमच्छिनन्मत्सरेण सममन्यधन्विनाम्[5] ॥ 34

स्नातुमप्सु गुरुरेकदा वसन् ग्राहमात्तचरणं घ्नतः शरैः ।
अर्जुनादलभताधिकं मुदं दिव्यमस्त्रमपरं ततश्च सः ॥ 35

आप रङ्गमर्थशिल्पिनिर्मितं क्लृप्तमङ्गलबलिं कृती गुरुः ।
राजपुत्रनिवहेन संयुतस्तस्य दर्शयितुमस्त्रकौशलम् ॥ 36

प्रेक्षकैर्विविधमञ्चवर्तिभिः पौरजानपदभूमिभर्तृभिः ।
रङ्गसद्मनिबिडं तदाभवन्निर्जरैरपि विमानगैर्नभः ॥ 37

तत्र ते गुरुकृपार्हणाकृतो धर्मनन्दनमुखा धनुर्भृतः ।
स्थूलसूक्ष्मचलनिश्चलादिकं लक्ष्यमाशु विविधुः[6] शिलीमुखैः ॥ 38

---

1. प्रथममूर्जितं धनुः A. 2. ०अनघं A; Ptv.
3. भुवि०. Ptv. 4. जिष्णुना A; Ptv.
5. सममस्त्रकौशलम् A; सममेव० Ptv. 6. बिभिदुः Ptv.

आयुधेषु कतिचित्परिश्रमं खड्गमुद्गरमुखेष्वदर्शयन् ।
चर्यया च रथहस्तिवाजिनां पश्यतां कतिचिदादधुर्मुदम् ॥ 39

उद्धृतोद्भटगदाभयङ्करौ[1] मारुतात्मजसुयोधनौ ततः ।
रङ्गभूमिमवतेरतुः क्षणादूढसालविटपाविव द्विपौ ॥ 40

मण्डलेषु विविधेषु वल्गतोर्घट्टितोभयगदाश्रयोर्मिथः ।
क्रुद्धयोर्गहनमाहवोद्यमं द्रोणसूनुरुभयोर्न्यवारयत् ॥ 41

आज्ञया तदनु कुम्भजन्मनस्तत्पदप्रणतिपूतमौलिना ।
धन्विना कवचिना निषङ्गिणा रङ्गभूरलमकारि जिष्णुना ॥ 42

वह्निवारिधरहस्तिकेसरिव्यालतार्क्ष्यतिमिरार्कदैवतम् ।
अस्त्रजातमभिजातविक्रमस्संसदि प्रकटयाम्बभूव सः ॥ 43

सिंहसंहननतामुपेयिवान् सिंहनादमुखराष्टदिङ्मुखः ।
रङ्गसद्म रविसूनुरुल्लसन् प्राप चापनिगमाब्धिपारगः ॥ 44

अर्चितेन गुरुणानुमोदितो धारयन्धनुरधिज्यतां गतम् ।
अद्भुतं व्यधित यद्यदर्जुनस्तत्तदभ्यधिकमाततान सः ॥ 45

अस्त्रसंपदमुदीक्ष्य तद्गतां तत्र संसदि विसिष्मिये जनः ।
व्रीडितोऽजनि सुतो बिडौजसः सानुजस्तु मुमुदे सुयोधनः ॥ 46

द्वन्द्वयुद्धमधुना करोम्यहं जिष्णुनेति कथयन्तमादृतः[2] ।
आत्मनस्सुहृदमंशुमत्सुतं स्वीचकार धृतराष्ट्रनन्दनः ॥ 47

अन्तरं स्वपरयोरजानतां जल्पतां जगति या गतिर्नृणाम् ।
तामिषुर्नयति मे विकत्थनं त्वामिति द्विषमुवाच फल्गुनः ॥ 48

---

1. उद्यतो० A; Ptv.   2. ०आदरात् Ptv.

तिष्ठ पार्थ समिताविह स्थिरो मामकेन दलितेन पत्रिणा ।
त्वच्छिरस्सरसिजेन कल्पयाम्याशु रङ्गगृहदेवताबलिम् ॥ 49

इत्युदीर्य गिरमाहवोद्यतं गौतमस्तपनसूनुमब्रवीत् ।
सूतपुत्र भवता न योत्स्यते पूरुवंशमणिरेष पूरुषः ॥ 50

व्रीडिते सुहृदि कौरवः कृपं प्राह नैवमभिधातुमर्हसि ।
विष्टपत्रितयविश्रुतौजसामुद्भवो न महतां विगर्हितः ॥ 51

पूरुषः किल पुरा पुरातनः स्तम्भतः समुदपादि तादृशः ।
क्रौञ्चविन्ध्यमथनाविवापरौ त्वं गुरुश्च शरकुम्भसंभवौ ॥ 52

ऊचिवानिति स तत्र मन्त्रवित्कर्णमासननिवेशितं स्वयम् ।
शातकुम्भकलशाम्बुभिः शुभैरभ्यषिञ्चदमुमङ्गभूपतिम् ॥ 53

[1]-राज्यलाभसुखितो रवेः सुतः-[1] सख्यलाभमुदितश्च कौरवः ।
तौ परस्परमहोपकारिणौ पाण्डवान्न गणयाम्बभूवतुः ॥ 54

इत्थमस्त्रजलराशिपारगान् जातु राजतनयानयाचत ।
अर्पणं हठहृतस्य संयुगे पार्षतस्य गुरुदक्षिणां गुरुः ॥ 55

तद्वचः शिरसि ते शिरस्त्रवत् सन्निवेश्य रथिनो धनुर्भृतः ।
पांसुभिः पटहनिस्वनैश्च खं रुन्धता सह बलेन निर्ययुः ॥ 56

चोदितं कलशजन्मना ततः सैन्यमुग्रमरुधत्पुरं द्विषः ।
प्रेरितं परिवहेन वायुना मेघजालमिव मेरुमेखलाम् ॥ 57

पौरवद्विरदबृंहितश्रवात्पार्षतस्य[2] बलमुद्धतं पुरात् ।
निर्ययौ निशमिताभ्रनिस्वनं सिंहवृन्दमिव सह्यकन्दरात् ॥ 58

1–1. ०मुदितः सुतो रवेः A.   2. कौरव० A.

आरच्यय सवनान्तसंभृतं स्त्रेन पुत्रमयमोजसा हविः ।
तत्स पाययितुमन्तिकस्थितामाजुहाव यजमानगेहिनीम ॥ 69

जातभीतिमुपसर्पणे मुनिः किं त्वयेति महिषीं रुषावदत् ।
हव्यमाहितगुणं महातपाः सम्भृतार्चिषि जुहाव पावके ॥ 70

उद्भवन्तमुदितार्चिषस्ततो भानुमन्तमिव हेमभूभृतः ।
पङ्कजैरिव कुमारमीक्षणैर्विस्मयेन विकचैः पपौ जनः ॥ 71

अङ्गदी मकुटवान्सकुण्डली वर्मितः स्वनितसज्यकार्मुकः ।
आरुरोह रथमुल्लसन्नदन्[1] पुत्रिणां च पृषदात्मजो धुरम् ॥ 72

शङ्खतूर्यतुमुलस्वनैरयं पूर्यमाणगगनं ससोमकः ।
पर्यवर्तत पुरं ध्वजाकुलं तत्प्रवृत्तिरपि विष्टपत्रयम् ॥ 73

तेन याजमुनिना हुतं पुनः प्राप्य हव्यमभिजातमुच्छिखात् ।
शुष्मणस्समुदगामि[2] कन्यया रक्तपङ्कजवनादिव श्रिया ॥ 74

कल्पितार्जुनविकासयाऽनया प्रावृषेव नवपद्मकाननम् ।
क्षत्रमुद्धतमुपैष्यति क्षयं कृष्णयेति दिवि वागजृम्भत ॥ 75

जातयोस्सपदि जातवेदसः पुत्रयोरधिगमेन पार्षतः ।
फल्गुनान्मुदममंस्त भाविनीं द्रोणतश्च विजहौ महद्भयम् ॥ 76

आत्मशत्रुमपि शिष्यतां गतं सोमकेन्द्रतनयं महायशाः[3] ।
आततान गुरुरस्त्रपारगं जीवितादपि यशस्स्मृतां प्रियम् ॥ 77

यौवराज्यविहिताभिषेचनं कौरवक्षितिपतिर्युधिष्ठिरम्[4] ।
स्निग्धवर्णमधिकं सुदर्शनं चक्षुरागतममन्यतात्मनः ॥ 78

---

1. अयं A. 2. ०समुदपादि Ptv.
3. महाशयः A; Cv; Pvt. 4. पौरव० A;

ऋद्धिमस्य गुणशालिनोऽन्वहं नामहिष्ट धृतराष्ट्रनन्दनः ।
ज्ञातिमुच्छ्रयिणमाह दुर्हृदामाशुशुक्षणिमनिन्धनं जनः ॥ 79

दुर्मनाः पितरमब्रवीन्मिथस्तात संप्रति जनो युधिष्ठिरम् ।
श्लाघते मधुरवाङ्महोदयं चैत्रमासमिव कोकिलव्रजः ॥ 80

कौरवं यदि भजेदयं[1] पदं सर्व एव नियतं हता वयम् ।
तन्न संस्पृशति नो यथा विपन्नीतिमाशु कुरुतात्तथा भवान् ॥ 81

प्रत्युवाच सुतमम्बिकासुतस्तात नैवमभिधातुमर्हसि ।
एष पाण्डुरिव तत्सुतो गुणी दृश्यते मयि दृढं हि भक्तिमान् ॥ 82

स्निग्धबन्धुरयमादृतप्रजः क्षेप्तुमद्य भवता न शक्यते ।
भेदबुद्धिमवधूय दुर्मते पाण्डुसूनुषु भजस्व साधुताम् ॥ 83

तं स चाह सरिदात्मजो गुरुस्तत्सुतस्स च तदीयमातुलः ।
स्निग्धभावमकृतप्रवृत्तयः कल्पयन्ति मयि कर्णबान्धवे ॥ 84

तत्सहायरहितः पृथासुतः कर्तुमस्मदभिषङ्गमक्षमः ।
शासनेन तव वारणावते सानुजो यदि वसेद्भिदा कुतः ॥ 85

वासमत्र नगरे करोति चेत्सङ्गतो भवदुपाश्रयैर्जनैः ।
रूढमूल इव पादपो महानुद्धृतेरविषयो भविष्यति ॥ 86

ईदृशेन वचसा दुरात्मनः[2-] क्षोभितं कथमपि[-2] क्षमापतेः ।
स्वच्छतां रहयति[3] स मानसं हस्तिनेव लुलितं ह्रदोदकम् ॥ 87

जातु धर्मजमुवाच भूपतिर्वत्स पुण्यशतलभ्यदर्शनः[4] ।
वारणावतमवाप्य वीक्ष्यतां श्लाघितो जगति शङ्करोत्सवः ॥ 88

---

1. ०इदं A. 2–2. क्षोभमाप हृदयं Ptv.
3. न भजति Ptv; उपगतं स्वतोबलात् Ptv.
4. ०दर्शनं Ptv.

वस्तुमस्ति[1] यदि तत्र ते रुचिः कारिते महति मन्दिरे वसन्।
शाधि दक्षिणभुजेन मानुजो वारिराशिरशनां वसुन्धराम् ॥ 89

इति पितुरुपलभ्य शासनं
विदिततदाशयविक्रियो विभुः।
उदचलदभिवारणावतं
सममनुजैः प्रथमो मनस्विनाम् ॥ 90

इत्यगस्त्यपण्डितकृतौ[2] बालभारते महाकाव्ये तृतीयस्सर्गः

1. अत्र A. 2. Pt.

अथ चतुर्थस्सर्गः

कौरवस्य सचिवः पुरोचनः प्रस्थितः प्रथममेव तत्पुरम् ।
वह्निना शमयितुं पृथासुतानाशु जातुषमकारयद्गृहम् ॥ 1

वारणावतमुपागतः पुरं पौरलोचनशशी युधिष्ठिरः ।
सद्म दुष्टसचिवेन दर्शितं सम्भृतोपकरणं तदाविशत् ॥ 2

भोज्यवस्तुषु विषं विधास्यतो वासवेश्मनि च जातवेदसम् ।
क्षत्तरासवचसा पुरोचनात्पाण्डवा विपदमाशशङ्किरे ॥ 3

तेन यद्यदुपनीतमन्वहं भूषणांशुकविलेपनादिकम् ।
धारयद्भिरतिगूढमिङ्गितं[1] तत्तदेभिरपरीक्ष्य[2] नाददे ॥ 4

वासराणि मृगयापदेशतः काननेषु नयति स्म पौरवः ।
तेन सर्पवदधिष्ठिते गृहे जाग्रदेव रजनीश्च सानुजः ॥ 5

जातु निद्रितपुरोचने गृहे मारुतिर्निशि निधाय पावकम् ।
भ्रातृमातृसहितस्सुरङ्गया निर्ययौ विदुरभृत्यक्लृप्तया ॥ 6

ज्वालजालविषये पुरोचने पार्थविद्विषि भृशं प्रहृष्यतः ।
अट्टहास इव जातवेदसः शुश्रुवे झटिति दाहनिस्वनः ॥ 7

या पुरोचनगिरा गरं फले दित्सुराश्रितवती चिरं पृथाम् ।
सा च तत्र शयिता वनेचरी पञ्चभिस्सह सुतैरदह्यत ॥ 8

---

1. ०उपगूढ० A. 2. ०अभिवीक्ष्य A.

प्रातरेत्य पुरवर्तिनो जनाः भस्मनिह्नुतबिलानने गृहे ।
वीक्ष्य दग्धवपुषं वनेचरीं सात्मजां यदुसुताममंसत ॥ 9

तां प्रवृत्तिमुपलभ्य शोचतो नागसाह्वयपुराधिवासिनः ।
उद्ययाविव जनस्य मानसे निर्वृतो जतुनिकेतनानलः ॥ 10

पार्थनाशमुदिता नृपात्मजा बाष्पमूहुरभिनीतमन्यवः ।
आतपक्वथितपाथसो बहिः शीतगर्भसलिला इव ह्रदाः ॥ 11

निर्गतो बिलपथात्तु मारुतिर्भ्रातृभिस्सह वहन्स्वमातरम् ।
ऊरुपातितसमीपपादपो गन्धनाग इव काननं ययौ ॥ 12

तत्र तान् गमनवेगविह्वलानंसबाहुयुगलावतारितान् ।
स्वापमुद्रितदृशस्सरस्तटे तिष्ठति स्म परिपालयन्नयम् ॥ 13

कापि योषिदथ रूपशालिना पाण्डवेन ददृशे परिष्कृता ।
आगतेव वनमस्तकण्टकं स्वेन कारयितुमस्य देवता ॥ 14

अभ्यवाच्च तमुपेत्य कुर्वती दन्तरश्मिदलितं निशातमः ।
कस्त्वमङ्गक इमे तवाग्रतः स्वापते किमिह दारुणे वने ॥ 15

अस्ति कश्चन हिडिम्ब इत्यमुं राक्षसो गहनगर्भमाश्रितः ।
मर्त्यगन्धमुदितेन तेन वः प्रेषितास्मि हनने यवीयसी ॥ 16

पुष्पसायकविकासकारिणो मूर्तिभाज इव कानने मधोः ।
जायते हि तव सन्निधानतो वीरुधीव मयि रागपल्लवः ॥ 17

उज्झितोऽथ वपुरीदृशाकृतिस्स्वानसर्गगतिरभ्ययासिषम् ।
पक्षिणोऽपि रहिता घनात्यये निम्नगेव विरलाम्बुरम्बुधिम् ॥ 18

आपतिष्यति विलम्बनेन मे रोषणस्स पुरुषादपुङ्गवः ।
रोमहर्षणि करं गृहाणमामुत्पतामि भवता समं नभः ॥ 19

सस्मितः पवनसूनुरब्रवीदग्रजोऽयमविवाहमङ्गलः ।
तेन सुभ्रु परिवेत्तृता मम त्वत्परिग्रहणकर्मणा भवेत् ॥ 20

एभिरत्र विपिनक्षिताविमां भ्रातृभिस्सह विहाय मातरम् ।
कुत्रचित्कुणपभोजिनो भयान्मादृशः कथमिव व्रजेज्जनः ॥ 21

मुग्धबुद्धिरसि कस्स्त्रिया पुमान् रक्ष्यते परभयादविक्लवः ।
द्रक्ष्यसि त्वमिह ते सहोदरं युद्धकर्मणि वृकोदरं च माम् ॥ 22

रोषवह्निकणवर्षिलोचनं भीषणभ्रुकुटिविभ्रदाननम् ।
सृक्किणी रसनया लिहन्मुहुः प्रादुरास पुरतो निशाचरः ॥ 23

प्राङ्नृणामसृजि कामुकाधुना लक्ष्यसे यदिह पुण्यकामुकी[1] ।
मत्कुलादपि बहिष्कृतेति तां भाषितेन भगिनीमभर्त्सयत् ॥ 24

कान्तरूप धिगिमां निशाचरीं दिव्यतामुपगतो नियुद्धतः ।
भोक्ष्यसे दिवि सुराङ्गनामिति व्याहरन्ननिलसूनुमभ्यगात् ॥ 25

निर्मितेन[2] नियुयुत्सुनाऽमुना क्ष्वेलितेन भृशमाकुले वने ।
प्रत्यबुध्यत सुतैस्समं पृथा शावकैरिव मृगेन्द्रगेहिनी ॥ 26

मूर्तयेव सविधे जयश्रिया वीक्ष्यमाणवपुषं हिडिम्बया ।
रक्षसा सह नियुद्धकांक्षिणं[3] भीममैक्षिषत पाण्डुनन्दनाः ॥ 27

मुष्टिभिः कुलिशपातनिष्ठुरैः पीवरोरुभुजयन्त्रपीडनैः ।
निष्पिपेष परुषं निशाचरं मारुतिर्मधुमिवादिपूरुषः ॥ 28

उन्मिषत्युषसि तस्य रक्षसो रक्तमुष्णमिव पातुमुत्सुकाः ।
स्वापमाकलितमानिशात्ययं वासवृक्षमथ तत्यजुः खगाः ॥ 29

---

1. पुंसि॰ A. 2. निर्जितेन B.
3. ॰कारिणं A.

तावदुत्थितकरस्तमोमयं[1] राक्षसं विशकलय्य भानुमान् ।
भीमसेन इव पार्थमानसान्यम्बुजानि ददृशे विकासयन् ॥ 30

मन्मथार्तिमुदितां हिडिम्बया धर्मसूनुरुपलभ्य मातृतः ।
स्वीकृतं मधुररूपया तया भीममाप्रसवमादिशत्सुधीः ॥ 31

संविदामुदितया तया सह प्रस्थिता निहतरक्षसो वनात् ।
शालिहोत्रसरसि स्थितिं व्यधुस्ते पराशरसुतेन मानिताः ॥ 32

सङ्गता पवनसूनुना दिवा स्वप्रभाविरचितेषु वेश्मसु ।
नक्तमन्तिकगता निशाचरी कुन्तिभोजतनयामुपाचरत् ॥ 33

काननेषु मृगनाभिगन्धिषु क्ष्माधरेषु मणिचित्रसानुषु ।
तत्र तत्र रमयाम्बभूव सा तं पुरूरवसमूर्वशी यथा ॥ 34

शक्रशस्त्रपतनार्हवक्षसं मारुतस्य तनयान्महौजसः ।
प्रापदात्मजमसौ घटोत्कचं भूर्यथा नरकमादिपोत्रिणः ॥ 35

जातमात्रपरिपुष्टविग्रहः[2] श्मश्रुलेन स मुखेन दंष्ट्रिणा ।
इष्टकर्मसु पुरः करोमि वः साह्यमित्यनुगतस्तया ययौ ॥ 36

भूसुराकृतिभृतः क्रमेण ते वेत्रकीयपुरमेत्य कस्यचित् ।
आलये विदधुरग्रजन्मनो वासमारचितभैक्षवृत्तयः ॥ 37

तत्र जातु परिरभ्य पुत्रकौ भर्तुरङ्क भुवि शोचितस्थितौ ।
पृच्छति स्म रुदतीं द्विजाङ्गनां शोकहेतुमुपसृत्य यादवी ॥ 38

तां जगाद गृहमेधिनी वधूरन्तिकेऽस्य नगरस्य दारुणः ।
दुर्दमो बक इति श्रुतस्तटे यामुने वसति कोऽपि कौणपः ॥ 39

1. ०उद्धत० B. 2. ०वृद्ध० A.

पूर्वमत्र गृहमेधिनोऽमुना बाधिता[1]- बलवताश्नता नराः-[1] ।
प्रत्यहं प्रतिगृहं क्रमेण तैस्तृप्तयेऽस्य पुरुषः कृतो बलिः ॥ 40

तेन वेतनमिदं द्विजास्पदं रक्षसा भुजबलेन लभ्यते ।
भागधेयविरहेण नः क्रमात् भागधेयदिवसोऽयमागतः ॥ 41

पुत्रकस्तु कुलतन्तुरेष मे कन्यका यदि परस्वमुच्यते ।
भर्तुरस्य विषहो न विप्लवो मामयं च न ददाति मृत्यवे ॥ 42

क्रेतुमद्य पुरुषं न मे धनं केन निस्तरणमादितो भवेत् ।
इत्युदीरितगिरं यथा पुरा तां जगाद रुदतीं तदा पृथा ॥ 43

कश्चिदस्ति तनयेषु मे बली तं ददामि सखि ते बलिं कुरु ।
मान्त्रिकस्स हतराक्षसः पुरा दुर्दमं बकममुं हनिष्यति ॥ 44

तद्वचश्श्रवणतस्सविस्मयौ दम्पती धृतमुदौ बभूवतुः ।
मातृशासनकरश्च मारुतिस्सञ्जहर्ष समरे समुत्सुकः ॥ 45

तं हिडिम्बवधदृष्टविक्रमैर्भ्रातृभिर्बहुमतोद्यमं रहः ।
विस्मितैर्निजजनैरुपर्युपर्यन्नमर्पितमभोजयद्द्विजः ॥ 46

रक्तमाल्यवसनानुलेपनः पौरलोचनकृतोत्सवः पुरात् ।
पूरितं शकटमोदनादिभिर्युक्तधुर्यमधिरुह्य निर्ययौ ॥ 47

कङ्कजम्बुककदम्बकाकुलैराचितं नरकरङ्कराशिभिः ।
झिल्लिकामुखरसालमासदत् पूतिगन्धि पुरुषादकाननम् ॥ 48

कौणपे तु निहते मया ततो नैव भोक्तुमुचितं शवस्पृशा ।
वीतभीरिति विचिन्त्य तद्बलिं भोक्तुमारभत मारुतात्मजः ॥ 49

1-1. बलवदश्नता नरान् B.

स्वैरमभ्यवहरन्वनोगतः प्रौढमट्टहसितं चकार सः ।
घट्टयंश्च दशनान्मिथः क्रुधा निर्ययौ गिरिगुहाशयो बकः ॥ 50

कोणपेन कुपितेन पातिताः पार्श्वयोरसकृदस्य मुष्टयः ।
प्रत्युतोदरभुवि[1] श्लथस्थितिं संहतां कवलसंहतिं व्यधुः ॥ 51

अन्तिकस्थमनवेक्ष्य राक्षसं भूय एव बुभुजे स तद्बलिम् ।
किं महेभपिशिताशिनो भयं विद्यते मृगपतेस्सृगालतः ॥ 52

अस्तशङ्कमभितस्त्वया बटो भुज्यतां बलिरयं क्व गच्छति ।
न्यस्यते जठर एव तावके त्वां ग्रसामि सह तेन नन्वहम् ॥ 53

इत्युदीरितमनेन भाषितं सस्मितं[2] निशमयन्वृकोदरः ।
स्वैरमभ्यवहृतेरनन्तरं प्रत्युवाच परिमार्जितोदरः ॥ 54

यन्नृशंस भवता नृणां वधादूर्जितं जगति शौर्यमार्जितम् ।
शक्तिरस्ति यदि तत्प्रदर्श्यतां मानुषे मयि हिडिम्बमर्दने ॥ 55

उद्धृतं तदनु सालमक्षिपन्मारुतेरुपरि यामिनीचरः ।
धूतपत्रपटलं कृतारवं केलिपत्रिणमिवाग्रहीत्स तम् ॥ 56

तावुभौ च विपुलोपलान्किरौ तालसालतमालवर्षिणौ ।
मुष्टियुद्धपरिनिष्ठितौ मिथः खेचरस्तुतिपदं बभूवतुः ॥ 57

द्वन्द्वयुद्धरभसश्रमालसं तं प्रगृह्य चरणे निशाचरम् ।
व्योमविभ्रमणवेगविह्वलं वायुसूनुरवनावपातयत् ॥ 58

कण्ठपीडनविमुक्तजीवितं तं विकृष्य नगरान्तिके कृती ।
सायमाहृतविकृष्टरोहितः केसरीव निजवासमासदत् ॥ 59

---

1. प्रत्युतो० B. 2. सस्मयं B.

आगतं सपदि[1] स द्विजः पृथा भ्रातरस्तमपदानशंसिनम् ।
आशिषा च परिरम्भणेन च श्लाघया च समभावयन् क्रमात् ॥ 60

द्वारसीमनि पुरः प्रगे जनैर्वज्ररुद्ध इव पर्वतः स्थितः ।
वीक्ष्यते स्म सभयं ससंमदं साद्भुतं च निहतो निशाचरः ॥ 61

तादृशस्य निधनेन रक्षसः प्रेक्षया विगतविप्लवैर्नृपैः ।
व्याघ्रनाशमुदितैर्वृतं मृगैरन्तकारि वनमेकचक्रया ॥ 62

अध्वगाद्धिगतं द्विजन्मनो यज्ञसेनदुहितुः स्वयंवरम् ।
द्रष्टुमुत्सुकधियः पृथासुता निर्ययुस्सपदि वेत्रकीयतः ॥ 63

व्यस्तविश्वनिगमस्तपोधनो भारतस्य महतः कृतेः कविः ।
गच्छतः पथि कृतोदयः कृती तानुवाच सुलभद्विजाकृतीन् ॥ 64

पार्षतो जतुगृहानलच्युतान् जीवतो गुरुमुखान्निशम्य वः ।
पाण्डवा मम सुतास्वयंवरं निर्विशेयुरिति लब्धनिश्चयः ॥ 65

यूयमध्ववहनादहर्निशं प्राप्नुथ द्रुपदपट्टणं द्रुतम् ।
स्वीकरिष्यथ वधूमयोनिजां कन्यकां तदनु यास्यथोदयम् ॥ 66

इत्थमुक्तवति तापसे गते जाह्नवीं निशि नृपात्मजा नदीम् ।
प्रापुरर्जुनकरोल्मुकार्चिषा मोहितान्धतमसेन वर्त्मना ॥ 67

स्त्रैणक्लृप्तजलकेलिमुद्धतं तत्र चित्ररथमाहिताहवम् ।
आततान तनयश्शचीपतेराशु दग्धरथमस्त्रवह्निना ॥ 68

निर्जितेन युधि सख्यमीयुषा तेन भावुककरेण चोदिताः ।
धौम्यमुत्कचकवर्तिनं गुरुं प्राप्य तेन सहिताः प्रतस्थिरे ॥ 69

---

1. रहसि B.

पार्थाः क्रमेण पथिकद्विजसार्थयुक्ताः
पाञ्चालराजनगरीमविशन्नुदाराम् ।
कृष्णास्वयंवरकृते मिलतां नृपाणां
रुद्धोपशल्यभुवमुच्छ्रयिभिर्निवेशैः ॥ 70

कुलालभवने ततः कुरुकुलावतंसाः क्वचित्
निधाय निजमातरं द्रुपदभाविजामातरः ।
सनाथमवनीभुजां कनकमञ्चभाजां शतैः
स्वयंवरगृहं महत्स्वनितशङ्खतूर्यं ययुः ॥ 71

तदनु सहचरीभिस्तत्र मञ्चान्तरस्थां
नृपतिनयनभृङ्गश्रेणिनीलाब्जमालाम् ।
द्रुपददुहितरं ते वीक्ष्य पाण्डोः कुमारा
युगपदिषुभिरासन्पञ्चबाणस्य विद्धाः ॥ 72

धृष्टद्युम्नस्तावदागत्य रङ्गे कृत्वा चापं दुर्नमं सायकांश्च ।
लक्ष्यं लोलं व्योम्नि यन्त्रान्तराले राजन्येभ्यो दर्शयन्नाबभाषे ॥ 73

एतद्विधाय सहसा धनुराततज्यम्
एभिश्शरैर्गगनलोलमिदं शरव्यम् ।
युष्मासु भूमिपतयः कृतहस्तमुख्यो
यः पातयेत्स परिणेष्यति मत्स्वसारम् ॥ 74

इत्यगस्त्यपण्डितकृतौ[1] बालभारते महाकाव्ये[2] चतुर्थः सर्गः[3]

---

1. A omits पण्डित. 2. B omits. 3. ...समाप्तः B.

अथ पञ्चमस्सर्गः

अथैवमाख्याय स वीरवर्यश्चिकीर्षतः कार्मुकमाततज्यम् ।
महीपतीन्मञ्चगतान्भगिन्यै प्रदर्शयन्प्रारभताभिधातुम् ॥ 1

दुर्योधनोऽसौ नृपतिः पुरस्ताद्दृष्ट्वा यदीयां श्रियमत्युदग्राम्[1] ।
व्रीडेन गूढः किल दिश्युदीच्यां कुत्रापि वासं कुरुते कुबेरः ॥ 2

अस्यानुजा मौलिभिरूढरत्नैर्दुश्शासनाद्या वसुधाधुरीणाः ।
पुष्णन्त्यमी कांचनकान्तिमुग्रं[2] शेषस्य नागा इव पार्श्वभाजः ॥ 3

गांधारनाथ[3]श्शकुनिर्गरीयानसौ यमक्षेषु वदन्ति शौण्डम् ।
आचार्यपुत्रोऽयममुष्य शौर्ये स एव देवः सदृशः पिनाकी ॥ 4

अबिभ्रदङ्गैः सहजं तनुत्रं बालार्कतुल्यद्युतिरेष कर्णः ।
जीमूतवाहस्य शिबेर्दधीचेरनन्तरं स्पर्शनतो यमाहुः ॥ 5

हलायुधोऽसौ हरभूधराभो विभाति नीलाम्बरयोर्युगेन ।
द्विधाकृतेनेव हलेन रोषात्पूरेण बद्धो यमुनापगायाः ॥ 6

वंशे यदूनां विहितावतारः श्रीवत्सलक्ष्मा पुरुषस्स एषः[4] ।
विच्छायतां येन हृते द्युवृक्षे शचीमुखं नन्दनवत्प्रपेदे ॥ 7

अस्यान्तिके सात्यकिमुख्य एष विभाति वृष्ण्यन्धकभोजवर्गः ।
प्रसूनबाणोदयकारणस्य ज्योतिर्गणः पत्युरिवौषधीनाम् ॥ 8

---

1. ०अत्युदाराम् B.
2. ०मुद्रां B.
3. ०राजः B.
4. स एव B.

अयं जरासन्ध इति प्रसिद्धो[1] वारान्दशाष्टौ च जिते मुरारौ ।
पराङ्मुखी गूरगणानुरक्ता श्रीरेव यस्याभिमुखीबभूव ॥ 9

प्राग्ज्योतिषेशो भगदत्त एष यस्योपवाह्यो युधि सुप्रतीकः ।
स्मेराणि वक्त्राम्बुजकाननानि मृद्नात्ययत्नादरियोधयूनाम् ॥ 10

चेदीश्वरोऽसौ शिशुपालनामा तृणाय शौरिं भुवि मन्यते यः ।
शल्योऽयमासाद्य यमाशितारं भद्राणि सर्वेऽपि भजन्ति माद्राः ॥ 11

निधिर्महिम्नां महनीयकीर्तिर्माहिष्मतीनायक एष नीलः ।
प्रयुक्तहेतिस्समरे परेषु तनूनपाद्यस्य तनोति साह्यम् ॥ 12

एतेऽपि चान्ये बहवस्त्वदर्थमिहागता भूपतयो महान्तः ।
अमीषु कंचित्कृतलक्ष्यवेधं भद्रे वृणीतां भवती वरेण्यम् ॥ 13

अथोदतिष्ठन्कनकासनेभ्यः कन्या ममैवेयमिति[2] ब्रुवाणाः ।
सज्यं धनुस्तत्र विधातुकामास्सदस्यहंपूर्विकया नरेन्द्राः ॥ 14

शरासनारोपणतत्पराणां गणं यदूनां विनिवार्य कृष्णः ।
पृथासुतान्मध्यगतान्द्विजानां प्रदर्शयामास हलायुधाय ॥ 15

रङ्गस्थलालंकरणायमानं शरासनं तद्गिरिराजसारम् ।
नालं ग्रहीतुं कतिचिन्नरेन्द्रा ग्रहीतुमारोपयितुं च केचित् ॥ 16

आरोपयन्[3] ज्यामथ माषमात्रे पपात विद्धो धनुषा स नीलः ।
मुद्गान्तरे सत्त्वनिधिस्तु शल्यस्स मागधस्सर्षपमात्र एव ॥ 17

---

1. प्रवीरो B.
2. ममैवेति नृपा B.
3. आरोपितुं B.

चापं महान्तं तपनस्य सूनावधिज्यमातन्वति रोममात्रे ।
स तं विचिक्षेप विकीर्ण्णमाल्यमाधोरणं दुष्ट इव द्विपेन्द्रः ॥ 18

इत्थं वृथाभूतमनोरथेषु सुयोधनाद्येषु नराधिपेषु ।
द्विपेन्द्रहस्तो महतां द्विजानां मध्यादुदस्थान्मघवत्कुमारः ॥ 19

द्विजेषु हृष्यत्सु स रङ्गमध्ये विकृष्य सज्यं धनुरुज्झितेन ।
विद्धं शरव्यं विशिखेन यन्त्रादपातयद्राजकृताभिमानम्[1] ॥ 20

तं दिव्यपुष्पप्रकराभिवृष्टं[2] मनोभवं मूर्तमिवात्तचापम् ।
श्लाघापरैरब्जनिभैरपाङ्गैरवाकिरत्संसदि राजपुत्री[3] ॥ 21

तयाधिकण्ठं निहितामुदारां कल्हारमालामुरसा दधानः ।
रराज भूयस्सुरराजसूनु स्सगैरिकस्यन्द इवाञ्जनाद्रिः ॥ 22

तृणाय मत्वा नरनायकानां निकायमायामभुजस्सवीरः ।
आदाय कन्यां निरियाय रङ्गाच्छौर्योदधिः शौल्किकचापपाणिः ॥ 23

मूढोऽयमस्मानवमत्य कृष्णामदाद् द्विजायेति नृपाय कुप्यत् ।
द्रुतोद्धृतक्ष्माधरभीमयुक्तः प्रत्युद्ययौ राजकमिन्द्रसूनुः ॥ 24

दण्डैरमीभिर्दलितावलेपान्[4] नृपान्विधास्याम इति ब्रुवाणान् ।
स्मेराननेन्दुर्निखिलान्द्विजाती न्निवारयन्कार्मुकमाचकर्ष ॥ 25

कर्णेन पार्थं सह युध्यमानं भीमं च शल्येन नियुध्यमानम् ।
तौ श्लाघयन्तश्शतशो[5] नरेन्द्रास्सुरा इव प्रेक्षकतामवापुः ॥ 26

---

1. ०राजगतो हि० B.
2. ०प्रकरावकीर्णं B.
3. राजकन्या B.
4. ०दलितानशेषान् A.
5. स्तोमयन्त० B, Cv.

द्विजातिबुद्ध्या मृदुबाणमोक्षो विद्धश्शरैर्मर्मसु फल्गुनेन ।
ब्राह्मं किलाजय्यमवेक्ष्य तेजो रवेः कुमारस्समरान्निवृत्तः ॥ 27

भीमस्तु निर्वर्तितबाहुयुद्धमुत्क्षिप्य शल्यं भुवि पातयित्वा ।
यत्नावधीन्मातुलमार्तबन्धुः श्लाघ्योऽभवत्तेन यशोधनानाम् ॥ 28

ततः प्रवीरौ जितकर्णशल्यौ जिज्ञासवः शौरिनिवारितास्ते ।
अयासिषुः स्वानि पुराणि सर्वे सविस्मयव्रीडरुषो नरेन्द्राः ॥ 29

आदाय कृष्णां दिवसावसाने कुरूद्वहौ प्राप्य कुलालगेहम् ।
काप्याहृताऽभूदियमम्ब भिक्षेत्यन्तर्गतां मातरमुक्तवन्तौ ॥ 30

सा भुज्यतां प्रौढरसा भवद्भिरित्यूचुषी सूनृतभाषिणीयम् ।
निर्गत्य गेहादवलोक्य कन्यां विलज्जमानाऽजनि धर्मभीता ॥ 31

तथाविधां तां स निरीक्ष्य भोज्यां धर्मात्मजो वाचमिमामवादीत् ।
तवाम्ब नैतद्वचनं मृषा स्यात्सर्वे यदस्यां वयमार्द्रभावाः ॥ 32

अन्येद्युरुद्यत्प्रमदो नरेन्द्रस्तान् क्षत्रियानेव चरैर्विदित्वा ।
पुरोहितेन प्रहितेन तूर्णमानाययामास निजं निकेतम् ॥ 33

तत्रोपविष्टाः पृथगासनेषु पृष्टान्वयास्ते पृषदात्मजेन ।
लाक्षागृहान्मृत्युमुखादिव स्वान्परिच्युतान्पाण्डुसुतानशंसन् ॥ 34

सत्कृत्य सर्वान्स च हृष्टचेता युधिष्ठिरं वाचमवोचदेवम् ।
लब्धामसौ बाहुबलेन कन्यां गृह्णातु पाणौ महितेऽह्नि पार्थः ॥ 35

धर्मात्मजस्तं निजगाद राजन्पश्चापि कृष्णां वयमुद्वहामः ।
योषिन्मयं रत्नमनर्घमेतत्सहोपभोक्तुं समयः कृतो नः ॥ 36

तत्रागतस्तावदमेयभूमा व्यासो मुनिर्व्याहरदेवमेनम् ।
एका बहूनां दयिता कथं स्यादिति प्रतर्को हृदि भूप माभूत् ॥ 37

तेषां समीपे विनिवेश्य[1] कृष्णां नृपाय तस्मै विजने निषण्णः ।
स पञ्चपत्नीत्वमशेषमस्या यथाक्रमं प्राक्रमताभिधातुम् ॥ 38

इयं पुरा जन्मनि पुण्यशीला नालायनीति श्रुतनामधेया ।
वृद्धं पतिं कुष्ठिनमृद्धरोषं मौद्गल्यमाराधयति स्म साध्वी ॥ 39

आत्तं परीक्षार्थमपास्य रूपं चिरात्प्रसन्नो मुनिरिङ्गितज्ञः ।
स्वं पञ्चधात्मानमसौ विभज्य रम्याकृतिस्तां रमयाम्बभूव ॥ 40

अत्रापि जन्मन्यनुगच्छतीमां तादृग्विधो हन्त स एव भावः ।
किञ्चेदमाकर्ण्य सा तमेव प्रागिन्द्रसेनेति पतिं प्रपेदे ॥ 41

स तां तपोविघ्नभयेन मुक्तां भूयोऽपि भोगेप्सुमिदं जगाद ।
अयि त्वदीयैर्नियमैर्गिरीशः प्रीतो वरं दास्यति काङ्क्षितं ते ॥ 42

तपोभिरुग्रैरपरोक्षयन्तीमात्मानमुत्तंसितबालचन्द्रः[2] ।
दन्तप्रभाकर्बुरकण्ठकान्तिरवोचदेनां गिरिशः प्रसन्नः ॥ 43

अलं चरित्वा व्रतमर्थितोऽहं पतिं त्वया संप्रति पञ्च कृत्वः ।
तदन्यजन्मन्यवदातवृत्ता त्वं लप्स्यसे पञ्च पतीन्प्रतीतान् ॥ 44

कल्याणि निर्वेदमपास्य गङ्गां गच्छ द्रुतं द्रक्ष्यसि तत्र कंचित् ।
आदाय तं मत्कमुपैहि पार्श्वमिति ब्रुवन्नन्तरधत्त देवः ॥ 45

कृतावगाहां गगनापगायां हेमाम्बुजान्यश्रुकणैस्स्पृशन्तीम्[3] ।
यदृच्छयाऽऽगत्य सहस्रनेत्रस्तां वीक्ष्य विस्मेरमना बभूव ॥ 46

1. बिनिवेश्य B. 2. ०मुग्धचन्द्रः B.
3. ०स्नपन्तीं B.

पृष्टान्वयाख्यास्पदशोकहेतुरायाहि वक्ष्याम्यखिलं तवेति ।
विलोभयन्ती बलवैरिणं सा हन्तुः पुरामन्तिकमानिनाय ॥ 47

कान्तासखं कंचन कांचनाद्रौ दीव्यन्तमालोक्य युवानमक्षैः ।
कस्त्वं प्रभुं मामवमत्य मूढः क्रीडापरोऽसीत्यवदत्स रुष्टः ॥ 48

हरेण देव्या सह दीव्यतैव दृष्टस्सहासेन निवृत्तकण्ठम् ।
स्तब्धाकृतिस्स्तम्भ इवावतस्थे विस्रस्तवज्रेण करेण शक्रः ॥ 49

दुरोदरान्ते स विभोर्निदेशादुद्घाटितद्वारशिलाकवाटाम् ।
आत्मोपमैरध्युषितां चतुर्भिर्घोराकृतिं वीक्ष्य गुहां चकम्पे ॥ 50

आचष्ट देवः कुपितो महेन्द्रमस्याः फलं भोक्तुमहं युतायाः ।
पदच्युतैस्संश्रितमेभिरिन्द्रैर्बिलं भजेथा निरयोपमानम् ॥ 51

त्रस्तस्स तं प्राञ्जलिराह नाथ[1] क्षमस्व दासस्य ममापराधम्[2] ।
नाहं कृतान्तो न पुरो न कामः क्रोधस्य यन्मां विदधासि लक्ष्यम् ॥ 52

विहस्य शक्रं विभुरादिदेश क्षन्तास्मि निर्वर्तय मन्निदेशम् ।
एभिस्सहायैस्सह भूतधात्र्यामंशेन सद्यो रचयावतारम् ॥ 53

क्रमेण धर्मश्च समीरणश्च त्वं चाश्विनौ चोद्भवहेतवो वः ।
इयं च साध्वी दयिता भवित्रीत्याख्यातवानन्तरधान्महेशः ॥ 54

पञ्चापि तान्विद्धि वसुन्धरायां हर्तुं भरं पाण्डवतां प्रपन्नान् ।
स्त्री सा च तेषां परिणामवद्भिः पुराकृतैस्तैस्सुकृतैस्सुतासीत् ॥ 55

इत्यूचिवान्दिव्यदृशं वितीर्य प्रदर्शयामास मुनिर्नृपाय ।
सभागतान्पाण्डुसुतान्सुरेन्द्रान् स्त्रियं च तां पार्श्वगताममीषाम् ॥ 56

1. नाथा: B. 2. महा० A.

सविस्मयानन्दविधेयचेताः कृत्वा गिरीशस्य गिरं प्रमाणम् ।
आकांक्षितं पाण्डुसुतैरनिन्द्यैः कृष्णाविवाहं द्रुपदोऽनुमेने ॥ 57

अथापरेद्युर्हृदये करे च कुरूद्वहाः कौतुकमुद्वहन्तः ।
उद्वाहवेषेण विशेषदृश्याः प्रसाधितां मण्टपिकामवापुः ॥ 58

युधिष्ठिरस्तत्र पुरोहितेन वैवाहिकैर्वस्तुभिरभ्युपेताम् ।
आलम्ब्य हस्तं द्रुपदस्य भेजे वैडूर्यसोपानपथेन वेदिम् ॥ 59

क्रमेण वर्गः कुलपालिकानां प्रसाधयन्तीं वपुषा विभूषाम् ।
आनीय कृष्णां तपनीयपीठे निवेशयामास वरस्य पार्श्वे ॥ 60

हुतं स धौम्येन सधूमरेखं वह्निं परीयाय वधूसहायः ।
प्रियासखो भृङ्ग इवानुषङ्गं हंसो यथा रक्तसरोजषण्डम् ॥ 61

गुरोर्निदेशाद्गुणशालिनी सा मुमोच लाजान् ज्वलिते कृशानौ ।
प्रवालजाले पवनस्य वेगान्मुक्तामणीनूर्मिरिवाम्बुराशेः ॥ 62

कर्तुं ध्रुवं शत्रुनितम्बिनीनां सीमन्तशोणाश्मविहारयोग्यम् ।
अश्मानमाक्रामदभीक्ष्णमस्याः करेण भर्तुश्चरणो गृहीतः ॥ 63

इत्थं चतुर्भिः कुरुराजपुत्रैरग्राहि घर्मोदकशीकरार्द्रः ।
समुच्छ्वसत्पुष्करचारुरस्याः करः करिण्या इव यूथनाथैः ॥ 64

निवृत्तनीराजनमङ्गलेभ्यो ददौ नृपो यौतकमर्थराशिम् ।
शतं रथानां करिणां सहस्रं तुरङ्गमाणामयुतं च तेभ्यः ॥ 65

प्रतिष्ठमानः पथि धार्तराष्ट्रः निशम्य पार्थानुदितान्विषण्णः ।
निर्वर्त्य तेषां शमनाय भूयो रुरोध पाञ्चालपुरं बलौघैः ॥ 66

शूरैर्महीभर्तृभिरुत्सुकाभिः प्रतीक्ष्यमाणं सुरसुन्दरीभिः ।
पुरान्निराक्रामदुदस्तशस्त्रं दुर्वारदर्पं द्रुपदस्य सैन्यम् ॥ 67

अथोभयेषामपि सैनिकानां विजृम्भिते तादृशि संप्रहारे ।
निर्गत्य पार्था रथिनो नगर्या विक्रामतो वीरवरानभीयुः ॥ 68

राधेयगान्धारसुतोग्रदंष्ट्रं सुयोधनोदग्रविषेण घोरम् ।
अतर्जयत्कार्मुकमर्जुनस्य विष्फारमन्त्रैः कुरुसैन्यनागम् ॥ 69

भीमेन सार्धं सुरराजसूनुर्विमर्दयामास विरोधिसेनाम् ।
मदोद्धतेन द्विरदाननेन गजासुरस्येव चमूं कुमारः ॥ 70

पराजिताः कर्णपुरोगमास्ते पुरोचनं वर्त्मनि गर्हयन्तः ।
रथैर्ययुः खण्डितकेतुदण्डैः पुरं विहस्ताः[1] कुरुराजपुत्राः ॥ 71

पार्था जयश्रीपरिणीतिभाजः पाञ्चालसद्मन्यवसन्वहन्तः ।
यदृद्वहेनोपगतेन दीप्तां श्रियं मयूखाः शुचिनेव पूष्णः ॥ 72

निरस्तदुर्योधनदुर्विचारैस्संमन्त्र्य भीष्मादिभिराम्बिकेयः ।
पाण्डोर्निधित्सुस्सुतमर्धराज्ये क्षत्रा तमानाययदात्मपार्श्वम् ॥ 73

तं सानुजं वीक्ष्य समग्रभूतिं सपार्षतीकं सहमाधवं च ।
अन्यत्र तस्यां पुरि कौरवेभ्यश्चिराय सर्वे कुरवो ननन्दुः ॥ 74

ततः कदाचिद्दिवसे शुभेंयाँ राज्याभिषेकाय युधिष्ठिरस्य ।
सम्पूर्णकुम्भं सहमन्त्रिवृद्धैर्महीपतिर्मण्टपमाससाद ॥ 75

औदुम्बरं तत्र नरेन्द्रसूनौ प्रशस्तमातस्थुषि भद्रपीठम् ।
आपूर्य तद्रागभिषेकशंसी शंखः प्रहर्षेण च पौरलोकः ॥ 76

---

1. विलक्षाः A; Cv.

ते व्यासधौम्यप्रमुखाः प्रतीता द्विजातयः केचन मन्त्रपूतैः ।
कुम्भात्कुशाङ्कूरभृतस्सरत्नादावर्जितैरम्बुभिरभ्यषिञ्चन् ॥ 77

तदाम्बुधारा[1] तपनीयकुम्भात्तस्योपरिष्टादमला पतन्ती ।
सुधांशुबिम्बादुदयाभिताम्राज्ज्योत्स्नेव पूर्वस्य गिरेर्विरेजे ॥ 78

प्रसाधितोऽध्यास्त पराध्यहीरमास्तीर्णवर्णांशुकमासनं सः ।
वामेतरं वारिधिमेखला च भुजाग्रमस्यालघुभूतधात्री ॥ 79

तस्य प्रतापज्वलनाङ्कुराभैः कर्पूरखण्डज्वलितैरुदग्रैः ।
अकारि दीपैर्मणिपालसंस्थैरारात्रिकं मङ्गलमङ्गनाभिः ॥ 80

आरुह्य हृष्टं द्विपमौपवाह्यं पुरीं दिदृक्षुः प्रतिकर्मरम्याम् ।
पुष्पोच्चयैस्तारकितं प्रकीर्णैः भास्वन्निभो राजपथं जगाहे ॥ 81

स्तनोरुशोभाजितकुम्भहस्तैर्नार्यो भिया हस्तिभिरुह्यमानाः ।
बलाहकालक्ष्यतटिद्विलासास्तमन्वयुर्वामदृशः प्रसिद्धाः[2] ॥ 82

पुरं परीयाय निजावलोकनिष्पन्दपक्ष्मेक्षणयौवतं सः ।
निवातपद्मोज्ज्वलपद्मिनीकं शरत्सरोहंस इव क्षितीशः ॥ 83

प्रज्ञादृशः प्राप्य कदाचिदाज्ञां सहानुजैः शौरिसखश्चमूभिः ।
पूर्वैः स्थितं यत्र पुरायुराद्यैस्तान्खाण्डवप्रस्थमसावयासीत् ॥ 84

गत्वा वनं तत्कथमत्रवासो भवेदिति क्ष्माभुजि याति चिन्ताम् ।
स्मृतस्य कृष्णेन हरेर्निदेशात्त्वष्टा समागत्य पुरोऽवतस्थे ॥ 85

व्यजिज्ञप च्च प्रणिपत्य शौरिमेतर्हि दाशार्ह सुरर्षभेण ।
पुरं हरिप्रस्थमिति स्वनाम्ना राज्ञे नियुक्तोऽस्मि विधातुमस्मै ॥ 86

---

1. तदम्बु० A. 2. प्रशस्ताः B.

तेनैवमुक्तेन कृताभ्यनुज्ञस्तस्मिन्नवैषम्यवति प्रदेशे ।
सहेमरत्नात्मकमप्रमेयं[1] पुरं भुवो भूषणमाततान ॥ 87

अजातशत्रुर्दिवसे शुभंयौ[2] पुरीं द्विजातिव्रजकॢप्तपूजाम् ।
तुङ्गध्वजां प्राप्य गजाधिरूढो रम्यं ययौ राजपथेन गेहम् ॥ 88

सुस्निग्धवर्णां मधुराकृतिं तां दिने दिने कॢप्तनवोपचाराम् ।
कृष्णामिवान्यां प्रतिपद्य पार्थः पुरीमुदारप्रकृतिं ननन्द ॥ 89

पुरस्य तस्यातिसमृद्धिभाजः कदाचिदालोकनकौतुकेन ।
प्रासादशृङ्गे विहिताधिरोहं राजानमाभाषत विश्वकर्मा ॥ 90

राजन्नितः पश्य पुरीं शुभेयं त्वदीयदोरर्गलयाभिगुप्ता ।
ध्वजाग्रहस्तैस्सुरराजधानीं निरस्यतीवोपरि वर्तमानाम् ॥ 91

क्रीडासरस्तीरहरिन्मणीनामिन्दीवराभां गमितानि भासा ।
आघ्राय जानात्यलिपङ्क्तिरस्यामम्भोजसौगन्धिककैरवाणि ॥ 92

विलासिनीलोचनभूषितानि नीलाश्मवातायनमंडलानि ।
अत्रानुकुर्वन्ति विवृत्तमीनान्यावर्तबिम्बानि कलिन्दजायाः ॥ 93

अस्याः पताकापटमारुतेन प्रासादशृङ्गेषु हृताध्वखेदाः ।
भवन्ति नानामणिरश्मियोगादनेकवर्णा हरिदश्ववाहाः ॥ 94

निशासु हर्म्याग्रविहारभाजः सेर्ष्या मृगाक्ष्यो वदनेन्दुसाम्यात् ।
अस्यां सुधांशोरपराङ्गभागे कुर्वन्ति कस्तूरिकया कलङ्कम् ॥ 95

रोषायितैरत्रमणिप्रदीपैर्निर्भर्त्सिता गर्भगृहेषु भासा ।
तमिस्ररेखा इव जालकेभ्यो निर्यान्ति कालागरुधूमरेखाः ॥ 96

1. अप्रयत्नः B. 2. अभिजाते B.

निशासु चन्द्रातपचर्चितासु निष्यन्दमानाम्बुझलज्झलानि[1] ।
सद्मानि शीतांशुशिलामयानि धारागृहानत्र विडम्बयन्ति ॥ 97

यदृच्छया केलिगृहेषु गूढान्बिम्बैः परीतान्मणिभित्तिलग्नैः ।
चिरात्प्रियानत्र गवेषयन्त्यो जानन्ति संस्पर्शसुखेन नार्यः ॥ 98

क्रीडावनान्तान्मरुदेत्य मन्दं गवाक्षमार्गेण गृहं प्रविष्टः ।
अस्यां रतान्ते सुदृशां तनोति स्वेदाम्बुमुक्तामणिजालचौर्यम् ॥ 99

पयोमुचः केतुदुकूलकल्पाः सौत्रामणीनां प्रभया मणीनाम् ।
आरञ्जिताः प्रावृषिजा इवास्यां हर्म्येषु कुर्वन्ति मयूरहर्षम् ॥ 100

प्रदर्शितामित्थमुदारशोभां दृष्ट्वा गरीयान्नगरीं प्रविष्टः ।
प्रस्थापयामास सुसत्कृतं स्वः पतिर्नराणां स्थपतिं सुराणाम् ॥ 101

युधिष्ठिरादीनथ पाण्डुपुत्रानापृच्छ्य शौरौ स्वपुरं प्रयाते ।
तान्वैणिकः प्राप्य मुनिः [2]-कदाचिन्मिथोर्हणान्ते निभृतानवादीत्-[2] ॥ 102

इदं वचो मे शृणुतादरेण रूपेण लक्ष्मीरिव भाति कृष्णा ।
माभूदिह स्निग्धधियां भिदा वस्स्त्रियो हि मूलं कलहस्य पुंसाम् ॥ 103

सुरैः पुरा धातृवरादवध्यौ सुन्दोपसुन्दावसुरौ सगर्भ्यौ ।
तिलोत्तमालोभनिबद्धवैरावन्योन्यमुन्मादमुभावयाताम् ॥ 104

स्थिते साक्षादग्नाविव मुनिवरे साक्षिणि पुरो
मिथः पुत्राः पाण्डोरथ विदधिरे संविदमिमाम् ।
समामेकां कृष्णां परिचरतु नः कश्चिदनया
सहैनं यः पश्येत्स वसतु बहिर्हायनमिति ॥ 105

---

1. ०झरीजलानि A. 2-2. ०त्कृतार्हणस्सन्मुदितानवादीत् A.

याते मुनौ मुदितचेतसि सत्यसन्धा –
स्तस्यां तथा ववृतिरे हितकांक्षिणस्ते ।
कृष्णा च तेषु सममेव बबन्ध भावं
पुष्पेषु तेषु ऋतुजेष्विव भृङ्गमाला ॥ 106

इत्यगस्त्यकृतौ[1] बालभारते महाकाव्ये[2]

॥ पञ्चमस्सर्गः ॥

---

1. इत्यगस्त्यपण्डित० B. 2. B. omits.

अथ षष्ठस्सर्गः

अथ कश्चिदुपागतः कदाचिन्नृपतिद्वारमुदस्तबाहुरुच्चैः ।
निजगाद गणैर्मलिम्लुचानां ह्रियमाणं निजगोधनं द्विजातिः ॥ 1

तव धैनुकमाहृतं मयेति द्विजमुक्त्वा विजयेन सत्वरेण ।
धनुराहरणाय शस्त्रगेहं विशताऽदर्शि नृपस्सपार्षतीकः ॥ 2

तमवेक्ष्य स संविदोऽनुकूलं परतः[1] प्रस्तुतकर्मणश्चिकीर्षुः ।
अतिधीरमना गृहीतशस्त्रो निरगान्निर्मितपूर्वजप्रणामः ॥ 3

वनसीमनि सायकामिषत्वं गमितेषु प्रतियोधिसैनिकेषु ।
समयुज्यत गोधनेन विप्रः स्वयमप्याशु यशोधनेन जिष्णुः ॥ 4

पुरमागतवांस्स सत्यसन्धो नृपतेः प्राप्य कथंचिदभ्यनुज्ञाम् ।
भुवि तीर्थनिषेवणाभिलाषी मुदितः पूर्वमुदङ्मुखः प्रतस्थे ॥ 5

अनुयायिनमग्रजन्मवर्गं[2] प्रथिते जह्नुभुवो निवेश्य तीर्थे ।
प्रयतेषु पयस्सु शक्रसूनुर्नियतः स्नानपरो ममज्ज सायम् ॥ 6

उरगाधिपकन्यकामुलूपीं पुरतः प्रैक्षत सिन्धुगर्भमग्नः ।
स तया तदनु स्मरातुराङ्ग्या निजमानीयत काञ्चनं निकेतम् ॥ 7

कथितान्वयनामकाङ्क्षितार्थामथ नागेन्द्रसुतां स कौरवेन्द्रः ।
शयने भुजगेन्द्रभोगशुभ्रे रमयामास रमामिवाम्बुजाक्षः ॥ 8

---

1. पुरतः B. 2. सहयायिन॰ A.

अजनिष्ट तदात्व एव तस्यास्तनयो विक्रमजन्मभूरिरावान् ।
तमवेक्ष्य तरङ्गितप्रमोदो रजनीं तत्र निनाय राजसूनुः ॥ 9

पुनरेत्य महानदीं प्रभाते स विसृष्टः प्रियया जलादुदीर्णः ।
स्वमुदन्तमुपोढविस्मयेभ्यः कथयामास निजानुयात्रिकेभ्यः ॥ 10

स तुषारगिरिप्रसाधितायां दिशि तीर्थानि निषेव्य विश्रुतानि ।
हरितस्तिलकम्बलस्य हन्तुर्महितं प्राप महीधरं महेन्द्रम् ॥ 11

कतिचिद्दिवसानि तत्र नीत्वा विलसत्केतकपांसुदुर्दिनेन ।
तटकाननवर्त्मना पयोधेः ककुभं प्रास्थित रामसेतुचिह्नाम् ॥ 12

नवनागलतावनोपगूढक्रमुकारण्यवतो विलङ्घ्य चोलान् ।
मणिपूरपुरं सुतो मघोनः प्रययौ पाण्ड्यपतेर्भुजेन गुप्ताम् ॥ 13

कृतपौरदृगुत्सवस्स तस्मिन्ननवद्ये परिणीतया मुहूर्ते ।
सुभगो मलयध्वजस्य पुत्र्या सह चित्राङ्गदया चिरं व्यहार्षीत् ॥ 14

पवनानभिनन्द्य ताम्रपर्ण्याः नवमुक्तासदृशोर्मिशीकरार्द्रान् ।
हरिचन्दनशीतलासु पार्थो मलयक्ष्माधरमेखलासु रेमे ॥ 15

उभयोरपि भागयोरजस्रं मिलतामर्गलमूर्मिकुञ्जराणाम् ।
लवणाम्बुनिधौ विलोक्य सेतुं बहु मेने विजयः पतिं रघूणाम् ॥ 16

श्वशुरास्पदमागतो ददर्श प्रणयिन्याः प्रतिपन्नसत्त्वगुर्व्याः ।
मितभाषणमायतं श्वसन्त्या विरहेणेव कृशं विपाण्डुगात्रम् ॥ 17

तनयेन सुजन्मना सुगात्री बहुधाशोभत[1] बभ्रुवाहनेन ।
शुचिना मणिनेव ताम्रपर्णी मलयश्रीमरुतेव दक्षिणेन ॥ 18

1. मुहुरशोभत A.

दुहितुस्सुतमात्मनः कुमारं विजयेनानुमतः प्रगृह्य पाण्ड्यः ।
स्थिरतामनयत्कुलं पदं च स्वमपुत्रत्वशुचा चिराय मुक्तः ॥ 19

अपरान्तगतो निषेव्यतीर्थं भुवि गोकर्णमिति श्रुतं महीयः ।
शशिभूषणभूषितं क्रमेण प्रतिपेदे तपनप्रभः प्रभासम् ॥ 20

अनुयायिजनं स तत्र हित्वा यदुपुत्रीभजनाय भिक्षुवेषः ।
निशि निर्भरजृम्भमाणवृष्टौ तरुनिष्कुहगतश्चकार चिन्ताम् ॥ 21

इदमत्र चिकीर्षितं विनैकं हरिमन्ये यदवो न संवदेयुः ।
गतिरद्य स एव मे गरीयानिति निश्चित्य तमस्मरत्सहायम् ॥ 22

स्मृतिमात्रवितीर्णसंविधानस्सरथेनोषसि सारथिद्वितीयः ।
चिरदृष्टममुं निवेश्य हृष्टः सुहृदं रैवतके पुरं प्रपेदे ॥ 23

मुरशासितुराज्ञया कदाचिन्मुदितास्तत्र गिराबुपेत्य पौराः ।
मदनर्तितकामिनीकपोलच्युतकर्णोत्पलमुत्सवं वितेनुः ॥ 24

सुहृदा हरिणार्जुनस्समेतस्सवयोभि[1]स्सहितामपश्यदग्रे ।
अपरामिव रामणीयकाब्धेरुदयं प्राप्तवतीं श्रियं सुभद्राम् ॥ 25

तटिदुज्ज्वलकान्तिभाजमेनां घनरेखामिव वीक्ष्य शैलसानौ ।
नवनीप इवावनीपसूनुः पुलकैरञ्चितमूर्तिराबभासे ॥ 26

अथ मूर्तमिवानुरागमङ्गैर्नवकाषायमिषेण धारयन्तम् ।
कुहनायतिनं कुरुप्रवीरं स्वसरि न्यस्तदृशं जगाद शौरिः ॥ 27

अनिशं भगवन्ननन्यभाजा मनसा ध्यायसि यन्महीधरेऽस्मिन् ।
अरुणाधरबिम्बमायताक्षं तदिदं वस्तु तवाद्य सन्निधत्ते ॥ 28

---

1. ससखीभिः B.

हलिना सह यादवैरशेषैरभिनन्देत तवाभिलाषमार्यः ।
तदियं ह्रियतां प्रसह्य बाला विहितोऽयं ननु बाहुजस्य धर्मः ॥ 29

इति वाचमुदीर्य निश्चितार्थामगमद् द्वारवतीं पतिर्यदूनाम् ।
स्वसुरस्य वियोगसम्भवार्तिं[1] तनयोऽपि त्रिदिवाधिपस्य तीव्राम् ॥ 30

शमिताखिलदाववह्निदर्पा जलदाः प्रावृषि मुक्तवारिधाराः ।
न मनागपि शान्तये बभूवुर्विजयस्य ज्वलतो वियोगवह्नेः ॥ 31

मदनायुधमर्दितस्स वीरः करकासारमुचः कदम्बवातान् ।
नवकन्दलिनीर्भुवो न सेहे मदरक्ताश्च गिरो मयूरयूनाम् ॥ 32

अपि सन्निहिते प्रियामुखेन्दावभिजातस्मितचन्द्रिकावदाते ।
हृदयं मुहुरस्य राजसूनोरभवन्मोहमहान्धकारमग्नम्[2] ॥ 33

स्वजनाय स दर्शितः कदाचित्कृतिना मूर्त इवाश्रमस्तुरीयः ।
हरिणा निदधे बलस्य शुद्धे हृदि कन्या भवने च तन्निदेशात् ॥ 34

अतिथेर्जितकाशिनस्सुभद्रे वसतः कंचन कालमस्य गेहे ।
कुशलं परिचर्यया तव स्यादिति तां तत्परिचारिकां स चक्रे ॥ 35

कतिचिद्दिवसानि निर्विवेश प्रकटप्रश्रयमन्तिके वसन्त्याः ।
स युवा वचनानि सोपचाराण्यनरालानि च वीक्षितानि तस्याः ॥ 36

भुजगेन्द्रनिभौ भुजौ कदाचित्प्रकटज्याकिणलाञ्छनौ निरूप्य ।
स तया निरचायि सव्यसाची श्रुतपूर्वैश्शुभलक्षणैश्च[3] तैस्तैः ॥ 37

भगवन्बहुतीर्थदर्शनस्ते प्रवसन्द्विट्सुहृत्किमर्जुनोऽभूत् ।
स परिष्कुरुतेऽद्य कान्प्रदेशानिति पृष्टः प्रियया जगाद पार्थः ॥ 38

1. ०सञ्ज्वरार्तिं A; Cv. 2. शक्रसूतोः० A.
3. अपिलक्षणैः A.

अयि पृच्छसि यं भुजापदानश्रवणोदञ्चितशूररोमहर्षम् ।
स तु संप्रति कृत्रिमो यतिस्ते पुरतो वर्तत एव मन्मथार्तः ॥ 39

इति तस्य निशम्य वाचमग्रे पुलकालङ्कृतकोमलाङ्गयष्टिः ।
प्रमदाश्रुपरिप्लुतेन मुग्धा स्मितगर्भेण मुखेन्दुनाऽवतस्थे ॥ 40

अखिलोदयहेतुरद्य रात्रौ भविता मैत्र इति श्रुतो मुहूर्तः ।
मदनज्वरपीडितस्तदानीमयि पाणिं तव पीडयामि धन्यः ॥ 41

इति वादिनि वासवस्य सूनौ भवनोद्यानलतागृहं प्रविष्टा ।
सुमुखी मुदितात्मभिस्सखीभिस्सहसानीयत देवकीसकाशम् ॥ 42

कुशलं स्वसुराहृतं पितृभ्यां हरिरज्ञातमथाग्रजेन कर्तुम् ।
गिरिशोत्सवदर्शनापदेशात्किमपि द्वीपमगात्सबन्धुवर्गः ॥ 43

विजयः स्मरति स्म नक्तमिन्द्रं पितरं भ्रातरमच्युतं सुभद्रा ।
उभयोश्च विवाहमाननाय[1] त्वरितं द्वारवतीमवापतुस्तौ ॥ 44

गृहमागतमादरादुपेन्द्रः पुरुहूतं सहितं पुलोमपुत्र्या ।
समभावयदासनादिदाना[2] त्कुशलप्रश्नकृतो मुनींश्च दिव्यान् ॥ 45

अथ तत्र शचीपुरन्दराभ्यां निजगात्राभरणैः प्रसाधिताङ्गौ ।
समयोजयदग्रतः कृशानोर्यदुपुत्रीकुरुनन्दनौ वसिष्ठः ॥ 46

तदनन्तरमाशिषामृषीणां विहितारात्रिकमप्सरोगणेन ।
मिथुनं परिरभ्य वन्दमानं हरिमापृच्छ्य दिवं जगाम शक्रः ॥ 47

व्रजतो मुरहन्तुरन्तरीपं हलिनाधिष्ठितमाज्ञया किरीटी ।
निरगादथ कन्यकानिकेतात्प्रियया चोदितवाजिना रथेन ॥ 48

---

1. विवाहमाशु कर्तुं A. 2. ०दानैः B.

विजयं पुररक्षकांश्च जित्वा कृतकन्याहरणं निशम्य यान्तम् ।
हलिना सह वृष्णयस्सरोषा हरिवाचा विरतोद्यमा बभूवुः ॥ 49

कृतमागधिकर्मणाऽनुवेलं यदुवर्यात्मजयाऽभिनन्द्यशौर्यः ।
स रथी विविधान्विलङ्घ्यदेशांस्सविधं प्राप नृपस्य धर्मसूनोः ॥ 50

निधिना विरहासहेन वारामपरेणेव समन्वितौ बलेन ।
अवनीन्द्रमुपेत्य रामकृष्णौ विदधाते कुशलानि पाण्डवेभ्यः ॥ 51

क्षितिनायकसत्कृते सवृष्णौ हलिनि द्वारवतीं प्रति प्रयाते ।
सह वासवनन्दनेन सख्या पुरि तत्रैव रिपुर्मधोरुवास ॥ 52

अथ शाश्वतसम्मदैकहेतुर्यदुपुत्र्या सुभटाभिनन्दनीयः ।
अभिमन्युरसूयतेन्द्रसूनोर्विजया[1] विक्रमसंपदेव वीरात् ॥ 53

द्रुपदात्मजनन्दना च देवी प्रथितान्पञ्च जगत्त्रये पतिभ्यः ।
सकलाविषयानिवेन्द्रियेभ्यः प्रतिविन्ध्यप्रमुखानलब्ध पुत्रान् ॥ 54

सुभगान्सकलास्त्रपारगांस्तान्सह पार्थैरुपलालयन्प्रवीरान् ।
परसाधनकर्मणि[2] प्रगल्भानपरांस्सन्धिमुखान् गुणानमंस्त ॥ 55

श्रियमाकलयन्नयन्ननूनकेनाभ्युदयापादितजीवलोकहर्षः ।
ऋतुषु प्रथितो यथा वसन्तः शुशुभे तेष्वभिमन्युरेव भूम्ना ॥ 56

प्रमदाय मधुद्विषः कदाचित्सगुणस्त्वगदीननोपदेष्टा[3] ।
अवनीन्द्रगमाय कृष्णलक्ष्यं महति द्राघिमवानभूदनेहा ॥ 57

---

1. ०भिनन्दन० B. 2. प्रवीणान् B.
3. ०बन्धि० B.

परुषातपसंस्तवोपजातं परितापं रथवाजिनां निजानाम् ।
हिमवत्पवनैरिवापनेतुं दिननाथो दिशमुत्तरां प्रतस्थे ॥ 58

गतवत्युदयं शुचौ सुजाते नवधारागृहवारिसिक्तरथ्यम् ।
दृढपेटकबन्धमुक्तहारं नगरं नर्तिततालवृन्तमासीत् ॥ 59

नवचन्दनपङ्कचर्चितेषु[1] च्छुरितेषु द्विगुणैर्मृणालहारैः ।
निवसंस्सुदृशां कुचेषु कामो मधुलक्ष्म्या विजहौ वियोगतापम् ॥ 60

नवपाटलकर्णपूरभृङ्गाः सुदृशां स्वेदलवप्लुतो मुखेन्दून् ।
गरुदञ्चलवीजनैरकुर्वन् मुहुराश्यानकपोलपत्रभङ्गान् ॥ 61

क्षणघर्मकदर्थिता युवानः महिलानां मधुवासिताननानाम् ।
अधरामृतपानकोपयोगं मृदुमाध्वीकरसादरा वितेनुः ॥ 62

सह कामिजनेन कुर्वतीनां मधुरां मज्जनकेलिमात्तदोषम् ।
सुदृशामिव नाभिपीततोयास्तनुतामन्वहमाश्रयन्त वाप्यः ॥ 63

मधुजिद्द्विजयौ विहारभाजौ हिमगर्भाम्भसि यामुने वने च ।
कतिचिद्दिवसान्कठोरपूष्णो रमयामासतुरङ्गनासहायौ ॥ 64

अथ तौ सुखिनावुपाजगाम द्विजवेषं परिगृह्य जातवेदाः ।
स्वशिखाभिरिवोज्ज्वलो जटाभिर्नवदुग्धाहुतिनिर्मलोपवीतः[2] ॥ 65

तपनीयसरोरुहोपमानं हविरामोदवदाननं दधानः ।
सिचयं[3] च सितेतरं वसानो महितं धूममिवाहितानुबन्धम् ॥ 66

तमवेक्ष्य तटित्कडारतेजो पिहिताशेषदिशं पिशङ्गदृष्टिम् ।
सहसापसृतासु जातभीतिष्वबलासु प्रणतावुभावभूताम् ॥ 67

---

1. हरि० A.
2. ०नवमुग्धाकृति० B.
3. वसनं B.

क्षुधितः किल दीनया स वाचा विहिताशीर्बहु याचते स्म भोज्यम् ।
प्रतिशुश्रुवतुश्च तौ तदस्मै प्रतिपन्नार्तिनिरासका[1] हि सन्तः ॥ 68

मुदितस्तु कृशानुराह कृष्णावहमेष ज्वलनोऽस्मि न द्विजन्मा ।
अशनं प्रतिपादितं भवद्भ्यामुचितं प्राप्य पुरा भवामि तृप्तः ॥ 69

उरुभूधरमेतदुग्रसत्त्वं गहनं खाण्डवमुच्चशाखषण्डम् ।
परिरक्षति तक्षकस्य वासं सुहृदः क्षेमकरस्सुपर्वनाथः ॥ 70

तदिदं निरपायमुद्धतानां निलयं दैत्यनिशाचरोरगाणाम् ।
अलमस्मि न दग्धुमत्र दीप्ते मयि विघ्नं कुरुते घनैर्बिडौजाः ॥ 71

अधुना भवतोरवाप्य साह्यं न सहस्राक्षसहस्रशोऽपि भीतः ।
कलयाम्यचिरेण काङ्क्षितार्थं सुसहायैः कृतयः फलन्ति पुंसाम् ॥ 72

यदुनायकचोदिताय वह्निः प्रददौ गाण्डिवमर्थिनेऽर्जुनाय ।
ज्वलदक्षयसायकौ निषङ्गौ सितवाहं च मनोजवं शताङ्गम् ॥ 73

विजयः कपिकेतुचिह्नदण्डं रथमारुह्य महर्षहेषिताश्वम् ।
कवची विधृतेषुभिर्वितेने धनुरुत्तंमितमञ्जुशिञ्जनीकम् ॥ 74

पटुपाण्डवपाणिघट्टमानात्स्वनितं गाण्डिवतो धनुष्प्रकाण्डात् ।
उदपद्यत खाण्डवस्थमत्त्वप्रलयोत्पादितवज्रघोषकल्पम् ॥ 75

उपलभ्य तयोस्सहायभावं निजमालम्ब्य वपुर्नितान्तघोरम् ।
समदीप्यत तत्क्षणं समन्तादखिलं दग्धुमरण्यमाश्रयाशः ॥ 76

चटुलः कलविङ्कजालनीलः क्वचिदेकत्र कपोतयूथधूम्रः ।
विपिनादनलेन दह्यमानाद्विहगव्यूह इवोत्पपात धूमः ॥ 77

1. ०समाहिताः A.

पटलं तमसामिव द्विपानां कुलमर्कांशुविजृम्भणानभिज्ञम् ।
त्यजति स्म समं वराहयूथैर्दहनालोकसमाकुलं निकुञ्जान् ॥ 78

शिखराण्यधिरोहता तरूणां पवनाधूतशिखाकलापभाजा ।
दहता[1] फणिनां शतानि श्रश्वच्छिखिना सानुषु भूभृतां विजह्रे ॥ 79

चमरावलिराकुला चरन्ती सपदि प्लुष्टमुदीक्ष्य वालभारम् ।
हृदि संभृतशोकवह्निरङ्गं न विवेद ज्वलनेन दह्यमानम् ॥ 80

अनपेक्ष्य वधूपदप्रहारानसुराणां भवनाङ्गणेष्वशोकाः ।
स्तबकानिव बिभ्रतो मुहूर्तं विटपालीनकृशानवो विरेजुः ॥ 81

अखिलां दिवमालिखञ्छिखाभिः चटुलस्फोटकवाटहासघोरः[2] ।
उदजृम्भत जम्भजेतुरुच्चैः पदवीं रोद्धुमिवेर्ष्यया[3] कृशानुः ॥ 82

रथिनावनुजात्मजौ बलारेरभितोदावमलातवद्भ्रमन्तौ ।
अपि निस्सरतो जवेन कीटान् गमयामासतुराशुगामिषत्वम् ॥ 83

विबुधाधिपसूनुना विसृष्टैर्विशिखैरर्धविलूयमानमूर्ध्नाम् ।
मणयः फणिनामिव प्रकीर्णाः स्फुटमैक्ष्यन्त विहायसि स्फुलिङ्गाः ॥ 84

तृणवद्गिरयोऽपि येन दग्धाः स कथंचित्प्रबभूव दग्धुमग्निः ।
असुरान्मुरवैरिचक्रकृत्तान्विजयेषूद्धलितांश्च यातुधानान् ॥ 85

अथ तक्षकरक्षणाय वज्री गणमादिश्य पयोमुचां नदन्तम् ।
कुपितो निरगात्स्वयं च सैन्यैर्निलयादभ्रमुवल्लभाधिरूढः ॥ 86

स तटिन्मयतर्जनीविलासाः भुवनक्षोभकरेण गर्जितेन ।
दववह्निमिवाशु तर्जयन्तः खमगाहन्त वलाहका महान्तः ॥ 87

---

1. ग्रसता A. 2. प्रकट० A.
3. ०रोद्धुमिवोद्धतः B.

चटुलाग्निशिखाविभागगर्भैर्दिवि धूमैस्समुपेयुषामभेदम् ।
स्तनितेन सविद्युदुद्गमानामचिराद्व्यक्तिरजायताम्बुदानाम् ॥ 88

उपरि ज्वलनस्य दृश्यमाना हसितैरावतहस्तदण्डदैर्घ्याः ।
विदधुर्जगदण्डमण्डपस्य स्फटिकस्तम्भधियं घनाम्बुधाराः ॥ 89

जलदैर्गमिते तनुत्वमग्नौ विजयेनोद्धतरोषपावकेन ।
वियति प्रतिकारकाङ्क्षिणा द्राङ्महदस्तम्भमकारि बाणकूटम् ॥ 90

उपरि त्वरितं निपत्य शीर्णा जलदासारभरः पतन्समन्तात् ।
घनधूमवितानितस्य चक्रे शरकूटस्य विचित्रभित्तिशोभाम् ॥ 91

दहति प्रबलं वनं कृशानौ तनयं तत्र निगृह्य निष्पतन्तीम्[1] ।
विजयो विशिखेन लूनशीर्षां व्यधित व्योमनि तक्षकस्य पत्नीम् ॥ 92

क्षणमुल्बणवर्षलब्धमोहं विदधानेन निजं सुतं मघोना ।
दहनादथ मातृपुच्छलग्नः सुहृदस्सूनुरमुच्यताश्वसेनः ॥ 93

विधृतायुषि शीर्षमात्रशेषे शरणं जग्मुषि भानुसूनुमस्मिन् ।
घनभङ्गसुहृत्प्रियावधाभ्यामभिचुक्रोध कपिध्वजं महेन्द्रः ॥ 94

कुपिते कुलिशास्त्रभाजि तस्मिन्परे दिक्पतयो गृहीतशस्त्राः ।
वसुरुद्रमुखाश्च योद्धुकामा विबुधा यादवकौरवावभीयुः ॥ 95

विविधायुधवर्षिणां च तेषां प्रसरद्बाणगणैर्निवारयन्तौ ।
कलहप्रणयी मुनिः प्रवीरौ मुहुरश्लाघत कम्पितेन मूर्ध्ना ॥ 96

जितसर्वदिवौकसो दिदृक्षुः पुरुहूतः पुनरात्मजस्य शौर्यम् ।
शरचूर्णितदारुणाश्मवृष्टेः प्रजिघाय प्रथितं महेन्द्रशृङ्गम् ॥ 97

---

1. निस्सरन्तीं A.

तदुदञ्चितरत्नरश्मिपालीसुलभालीकसुपर्वचापचारु ।
शकलीकृतमर्जुनप्रयुक्तैर्जवनैरभ्रमिवाशुगैर्विशीर्णम् ॥ 98

दिवि वागशरीरसम्भवाऽभून्मघवन्नेह वने सुहृत्तवास्ति ।
विदधासि रणं यदर्थमाभ्यां स कुरुक्षेत्रमगात्पुरैव दैवात् ॥ 99

अनयोरवतीर्णयोर्धरित्र्यां नरनारायणयोर्न कोऽपि तुल्यः ।
तदलं समरेण मानयेमौ विपिनेऽस्मिन्नसतां प्रशासितारौ ॥ 100

इति तामुदितां निशम्य वाचं बलशत्रौ त्रिदिवं प्रतिप्रयाते ।
गरुडध्वजवानरध्वजाभ्यां जयशङ्खावभिपूरितावभूताम् ॥ 101

ताभ्यां ततोऽथ शरवर्षिणि[1] विघ्नजाते
विद्राविते जलदवृन्द इवेन्द्रसैन्ये ।
विश्वं युगान्त इव संश्रितसत्वजात-
मासाद्य खाण्डवमरण्यमतुष्यदग्निः ॥ 102

तावत्तक्षकमन्दिराद्भयवशान्निर्गत्य धावन्मयः
कालेनेव जिघत्सुना हुतभुजा रंहस्विनानुद्रुतः ।
कृष्णेनापि जिघांसुना धृतवता चक्रं पुरो लक्षित-
स्त्रायस्वेति वदन् जगाम शरणं जम्भद्विषो नन्दनम् ॥ 103

लब्धाभयं विजयतः प्रतिसंहृतेषो
स्त्याज शौरिरिव तं स हिरण्यरेताः ।
आपृच्छ्य तौ विजयिनौ तदनु प्रवीरौ
सौहित्यमन्थरगतिस्त्रिदिवं प्रतस्थे[2] ॥ 104

---

1. विशिखवर्षिणि B. 2. प्रपेदे A.

पार्थोऽपि पक्ष्मलदृशा सह माधवेन
तत्तन्महेन्द्ररचितं भ्रमरं प्रशंसन्[1] ।
राज्ञम्मकाशमसृजा सुरयोधयूना-
मारञ्जितध्वजपटेन ययौ रथेन ॥ 105

इत्यगस्त्यकृतौ बालभारते महाकाव्ये

॥ षष्ठस्सर्गः ॥

1. ०महेन्द्रमभरं पथि संप्रशंसन् B.

अथ सप्तमस्सर्गः

कृष्णः कृतप्रतिकृतोत्सवमिन्द्रसूनोः
प्रीतो मयं मणिसभाकरणे नियुज्य ।
बन्धूंश्चिराय बलभद्रमुखान्दिदृक्षु
रापृच्छ्य धर्मसुतमात्मपुरं प्रतस्थे ॥ 1

दैत्येन यानि कृतिना वृषपर्वनाम्ना
गुप्तानि[1] बिन्दुसरसि स्फुटिकोत्तमानि[2] ।
रत्नैस्स किङ्करसहस्रसमाहृतैस्तै
श्चित्रां सभामसुरवर्धकिराततान ॥ 2

तस्यां दिने रचयता गुणिनि प्रवेशं
संभावितो नृपवरेण मयो यियासुः ।
प्रादाद्गदां बकभिदे युवनाश्वसूनोः
शङ्खं नराय वरुणस्य च देवदत्तम् ॥ 3

तां नारदो मुनिरुपेत्य सभां कदाचि
त्संदर्शितां नृपतिना कृतसत्क्रियेण ।
प्राशंसदभ्यधिकमाश्रितपुण्यकृद्धि
र्धातुर्दिशामधिभुवां च समं सभाभिः ॥ 4

आचष्ट चैनमतिहृष्टमना नरेन्द्रं
दन्तांशुभिर्द्विगुणयन्निव[3] देहकान्तिम् ।
पाण्डुः पिता पितृपतेर्निवसंस्सभायां
राजन्भवन्तमिदमाह महानुभावम् ॥ 5

---

1. क्षिप्तानि B 2. स्फटिकान्तराणि B. 3. ०निज० B.

सम्राट् त्रिशङ्कुतनयः किल राजसूयं
कृत्वा सभामधिवसत्यधुना मघोनः ।
त्वं चानुजैरुपहृतेन दिशो विजित्य
द्रव्येण दुर्लभमिमं क्रतुमाचरेति ॥ 6

दिष्ट्या तदेनमुपगम्य निरस्तविघ्न-
मर्धासनं सुरपतेरधिवत्स्यसि त्वम् ।
स्वस्त्यस्तु ते शशिकुलाभरणेति शंसन्
द्यामुत्पपात शरदम्बुदवन्महर्षिः ॥ 7

आगत्य तावदवदन्नृपतिं मुरारि
र्यागं चिकीर्षसि कुरूद्वह राजसूयम् ।
तस्मिन्बृहद्रथसुते मगधाधिनाथे
सम्राजि जीवति न शक्यमसाववाप्तुम् ॥ 8

चैद्येन सैन्यपतिनाऽनुगतस्य यस्य
जेतुं दिशो वसुमतीं भ्रमतः पदाब्जम् ।
राज्ञां चिराय भगदत्तपुरोगमाना
माधूसरं मकुटमाल्यरजोभिरासीत् ॥ 9

वागिन्द्रशाष्ट विजितेन मया च सार्धं
त्रस्ता यतः क्षितिमिमामपहाय सर्वे ।
सिन्धौ स्थितिं विदधते यदवस्सपक्षा
मैनासुतेन सह वज्रभियेव शैलाः ॥ 10

यष्टुं त्रिशूलधरमष्टसहस्रसंख्या
येनाऽऽगताऽस्मपदि[1] मुक्तमदा यथेभाः ।

---

1. ०हृत० B.

आराद्गिरिव्रजपुरीं मुखरामिदानीं
कुर्वन्ति शृङ्खलखलत्कृतिभिर्नरेन्द्राः ॥ 11

चन्द्रार्ककौशिकवरैर्द्विषतामजय्यं
सर्वायुधा विषयविग्रहमातिथेयम् ।
हन्तुं नरेन्द्रमरुदात्मज एव दक्षः
शक्तो हि मन्दरगिरिर्मथितुं पयोधिम् ॥ 12

तस्मिन्हते बहुषु राजसु मोचितेषु
श्रेयो भवेत्तव यशश्शुचि ते च वश्याः ।
अन्येऽपि सेवितुमुपेत्य भयेन वासं
त्वद्द्वारसीम्नि रचयिष्यति राजलोकः ॥ 13

इत्यूचिवान्मगधराजवधाय वीरा-
वादाय भीमर्विजयौ क्षितिपालदत्तौ ।
प्रीतो गिरिव्रजमभिव्रजति स्म शौरि
र्दन्तौ वहन्निव गजस्तटघातदक्षौ ॥ 14

देशान्विलङ्घ्य विविधान्द्विजवेषगूढा
स्ते मागधं पुरमवाप्य गता निषद्याम् ।
वैश्याहृतांशुकविलेपनमाल्यभाजो
वीरास्त्रयोऽपि विविशुर्विमतस्य गेहम् ॥ 15

अभ्युद्गतानधिगतातिथिसत्क्रियांस्ता
न्प्राप्तासनान्प्रथमवर्णविरुद्धवेषान् ।
दृष्ट्वा धनुर्गुणकिणाङ्कभुजान्नरेन्द्रः
के यूयमत्र किमुपागतमित्यपृच्छत् ॥ 16

कंसारिमुक्तनिजपाण्डुसुताभिधानं
दोराहवार्थिनमसाववधीर्य गोपम् ।

पार्थं च बालमवगत्य नियोद्धुकामो
वव्रे समीरणसुतं श्रुतबाहुसारम् ॥ 17

भार्या वरस्त्रिदशवामदृशां कुमारं
राज्यश्रिया वरमसौ विरचय्य धीमान् ।
भीमं भुजप्रहरणे दृढबद्धकक्षं[1]
वृत्रो विडौजसमिवाभिजगाम धीरः ॥ 18

तौ मण्डलेषु विविधेषु कृतप्रचारौ
पादाभिघातपरिकम्पितमेदिनीकौ ।
मुष्टिस्वनेन मुषितामरसाधुवादौ
वीरौ नियुद्धमतिदारुणमादधाते ॥ 19

इत्थं नियुध्य दशपञ्चदिनानि खिन्नो
पुत्रः स्मृतस्य पवनस्य पितुर्बलेन ।
भीमो बृहद्रथसुतं रभसादभाङ्क्षी-
त्कारागजुषां सह शुचा वसुधाधिपानाम् ॥ 20

निस्तीर्य मागधमहोदधिमागतांस्तान्
आलिङ्ग्य तान्प्रणमतः प्रमदाश्रुवर्षी ।
इत्थं त्रिशङ्कुतनयस्य विधाप्यमानो
निर्विघ्नमेव[2] सत्त्रवर्यममंस्त पार्थः ॥ 21

नीत्वा दिनानि कतिचिन्निजराजधानीं
याते रथेन महसा सह यादवेन्द्रो ।
आदिक्ष[illegible]वर्गविजयमसौ विधित्सु
राजा विजेतुमनुजांश्चतुरश्चतस्रः ॥ 22

---

1. [illegible] B: C[illegible].
2. निर्विघ्नमेव A.

निर्याणतूर्यरवकम्पितचक्रवालः
पुत्रः पुरन्दरदिशं मरुतः प्रतस्थे ।
त्यक्त्वा भुवं विविशुरुच्चलितः पुरस्ता
त्तत्सैन्यपांसव इवाद्रिगुहा दशार्णाः ॥ 23

संस्थापयन्स विजयी पुरि तत्र तत्र
स्तम्भानिव क्षितिभुजां धृतनामवर्णान् ।
अङ्गेषु क्लृप्तसमरादहिमांशुसूनोः
सार्धं जयेन विविधानि धनानि लेभे ॥ 24

हृत्वा भयं वसु च काशिपतेस्स गच्छन्
वीरो विजित्य युधि पौण्ड्रकवासुदेवम् ।
वङ्गेषु तद्द्विरदशोणितसिन्धुपूरैः
स्रोतांसि जह्नुदुहितुर्द्विगुणानि चक्रे ॥ 25

तत्तन्नरेन्द्रकटकार्जितमर्थजात
मारोप्य कुञ्जरशतेषु कलिङ्गभर्तुः ।
अब्धेर्विजित्य जयशङ्खरवेण घोष
मावर्ततानिलसुतः ककुभो मघोनः ॥ 26

पार्थस्तु खाण्डवविभावसुधूमगन्ध-
संस्पृष्टकेतनपटेन रथेन धन्वी ।
विस्तारयन्वियति सैन्यरजोवितान
माशां विजेतुमलकाभरणामयासीत् ॥ 27

साल्वादिभिर्नृपतिभिश्शरवर्षभीतै
रथैरुपर्युपरि शक्रसुतोऽभिवृष्टः ।
प्राग्ज्योतिषाधिपतिना विहिताहवेन
सम्भावितो यवनपद्मवनद्विपोऽभूत् ॥ 28

आप्लावितानि पुरभिच्छिरसः पतन्त्याः
स्रोतोभिरभ्रसरितो [1]न यान्यभूवन्[1] ।
तानि स्फुरत्कलकलानि बलानि जिष्णो
राचक्रमुर्हिमवतः कटकान्तराणि ॥ 29

तस्योच्छ्रितेषु शिखरेषु स पार्वतीयान्
जित्वा गणान्विशिखनिर्दलिताश्मवर्षः ।
वन्येभकुम्भमणिदन्तविपाण्डुराणि
लेभे धनानि च यशांसि च दुर्लभानि ॥ 30

सैन्यद्विपोद्दलितमानसपद्मषण्डं
गन्धर्वमण्डलजयाय ततः प्रयान्तम् ।
प्रत्युद्ययुर्निषदनिर्झरशीकरार्द्रा
स्तं हेमकूटतटकाननगन्धवाहाः ॥ 31

निर्जित्य चित्ररथसैन्यपतिं गृहीत्वा
तद्वाजिनस्तरुणतित्तिरिचित्रकायान् ।
पार्थेन किम्पुरुषवर्णितपौरुषेण
मेरुर्नमेरुतरुचारु तटः प्रपेदे ॥ 32

भास्वत्तुरङ्गखुरचन्द्रकितोपलेऽस्मि[2]
न्नभ्रंलिहाग्रविटपामवलोक्य जम्बूम् ।
तच्छाययापहृतसैनिकमार्गखेद
श्शुश्राव तुम्बुरुमुखेन भुजापदानम् ॥ 33

जम्बूफलस्रुतरसप्रसरप्रवृत्तां
दिव्यां नदीमनुसरन्मणिसैकताङ्काम् ।
जाम्बूनदोपहरणाकृतचारणोऽयं
प्राविक्षदुत्तरकुरून्नरदुष्प्रवेशान् ॥ 34

1–1. विपिनान्यभूवन् B. 2. ०चन्द्रकदन्तुरेऽस्मिन् B. Cv.

उद्धृत्य[1] जानपददस्युकरोऽधिरूढः
पुंसां शिरांसि विजिगीषुतयोद्धतानाम् ।
जित्वा धनेशमपि दूरगतं धनैस्स्वैः
तस्याधिको निववृते सुरराजसूनुः ॥ 35

यत्रोपशान्तमहसौ शशिवासरेशौ
सार्धं ग्रहैर्नियमतोऽस्तमयं भजेते ।
आशां व्रजन्सह बलैर्विजयानुजस्ता
मापद्यतोदयमभीक्ष्णमुदग्रतेजाः ॥ 36

तत्र त्रिगर्तशिबिमद्रमयूरकेभ्यो
लब्ध्वा धनानि निजकार्मुकनिर्जितेभ्यः ।
पत्याऽपि मानितभुजामहिमा यदूनां
प्रत्याययौ बलरजःकलुषापराब्धिः ॥ 37

तस्यानुजस्तु रणसीमनि निर्जितेन
नीलादिना नृपगणेन निषेव्यमाणः ।
रामस्य पर्युषितमारचयन्प्रतापं
शूरो दिशं प्रतिजगाम सुवेलचिह्नाम् ॥ 38

शृङ्गाश्मलक्ष्यकलशोद्भवपादमुद्रे
विन्ध्ये गिरौ विरचयन्कतिचिन्निवासान् ।
रेवातटद्रुमनिबद्धचमूगजेन्द्रैः
भूयः प्रवृद्धशिखरं तममंस्त नेता ॥ 39

सह्यात्मजातटपथेन विगाह्य चोला
न्यातस्य पूगकुहली मधुदुर्दिनार्द्रा ।

---

1. तत्रापि A.

सेनारथध्वजपटा श्रवणानिलेन
पाण्ड्योपहारकरिणामभजन्त शोषम् ॥ 40

तस्याज्ञया तटगतस्य महाम्बुराशे
र्लङ्कापुरं प्रतिगतेन घटोत्कचेन ।
आनिन्यिरे दशमुखावरजेन दत्ता
रत्नव्रजैस्सह चतुर्दश हेमताला: ॥ 41

आदाय तान् स विजयध्वजदण्डकल्पान्
प्रत्यागत: कुरुपुरं नकुलानुजात: ।
धर्मात्मजस्य यजनार्थमथाहृतार्थ:
श्रुत्यर्थतामुपगतो हरिराजगाम ॥ 42

तस्योपलभ्य मुरशासितुरभ्यनुज्ञां
कृष्णासखेन महितेऽहनि दीक्षितेन ।
प्राग्वंशसीमनि नृपेण परिष्कृतायां
प्रावर्तत क्रतुरशेषमहर्षिजुष्ट: ॥ 43

आमन्त्रितैस्त्वरितमापतितैर्हरिद्भ्य:
प्रेक्ष्यो यथा नृपतिभिस्स बभूव यज्ञ: ।
ऋत्विङ्मुखोच्चरितमन्त्रपदोपहूतै:
सङ्घैस्तथा मखभुजां च दिवोऽवतीर्णै: ॥ 44

आमोदनर्तितमहिद्विषमादधान:
खं व्यालिम्पन्नलघुरध्वरधूममेघ: ।
व्यद्रावयत्त्रिजगदम्बुरुहाकरस्थं
पूर्वक्षमापतियश:कलहंसयूथम् ॥ 45

राजन्यकेन विबधैरुपदासहस्रै
राराधित: प्रतिदिनं नरनाथवर्य: ।

इष्टाभिराहुतिभिरातनुत प्रहृष्टान्
सर्वान्सुरान् क्षितिसुरानपि दक्षिणाभिः ॥ 46

अध्यर्यग्रहेण समितौ कुपितस्य तास्ता
वाचो विषह्य शतशः परुषाश्च हेतीः ।
चेदीशितुः शिरसि चक्रधरेण कृत्ते
निर्विघ्नमेव निरवर्तत सप्ततन्तुः ॥ 47

द्वैपायनप्रभृतयोऽवभृथाप्लुतेन
सत्कृत्य तेन मुनयो विभुना विसृष्टाः ।
संभाविता नृपतयो विहितप्रणामा
भीष्मादयश्च कुरवः स्वपुराणि जग्मुः ॥ 48

दुष्प्राप एष भवतः कृपया महीयान्
प्राप्तो मया मख इति स्वयमूचिवांसम् ।
सम्राजमेनमवनीशशतार्चितांघ्रि
मापृच्छ्य चैद्यरिपुरात्मपुरं[1] प्रतस्थे ॥ 49

आसाद्य हस्तिनपुरं धृतराष्ट्रसूनु
र्दायादभूतिमतुलामनुचिन्त्य भूयः ।
क्रोधेन हन्त समतप्यत दुस्सहेन
स्वेनेव कालभुजगो विषपावकेन ॥ 50

गांधारमाह रहसि प्रचुराभ्यसूयो
राज्येन किं मम फलं सहजैः किमेभिः ।
किं वा भवद्भिरपि मातुल भीष्ममुख्यै
रुत्कर्षवद्भिरधुना यदभावि पार्थैः ॥ 51

---

1. दैत्य० A.

आपूर्वपश्चिमपयोनिधितीरलेख
मामेरुलक्ष्मवनीवलयस्य जेतुः ।
साम्राज्यसम्पदमुदीक्ष्य युधिष्ठिरस्य
शान्तिं व्रजामि न कदाचिदमर्षतप्तः ॥ 52

किं च प्रदर्शयति धर्मसुते सभां स्वां
दृष्ट्वा मणिस्थलधिया पतितं सरस्याम् ।
यन्मां जहास पतिभिस्सह याज्ञसेनी
तच्छल्यवन्मनसि सम्प्रति वर्तते मे ॥ 53

शूरास्तदद्य रचयन्तु समं बलौघैः
कर्णादयस्समरसन्नहनाय यत्नम् ।
शातैश्शरैरसुहृदो युधि शाययिष्ये
तेषामुतायुधविकीर्णवपुश्शयिष्ये ॥ 54

तं प्रत्युवाच शकुनिः कृतमाहवेन
देवैश्शतक्रतुमुखैरपि ते न जय्याः ।
जित्वा मया तु विहितेन दुरोदरेण
निस्सम्पदः पुनरमून्कुरु दास्यभाजः ॥ 55

उद्गीर्णमित्थममुना कितवेन सार्धं
मन्त्रं दुरन्तमवदत्पितुरेष हृष्टः ।
प्रेम्णा सुतं प्रतिकृतेन विधेर्बलेन
पार्थप्रियोऽपि स तथैव तमन्वमंस्त ॥ 56

निर्माय काञ्चनसभां मणिभिर्विचित्रां
तद्दर्शनोत्सवमिषादुपनीय पार्थान् ।
दुर्देवनाहृतधनान्स विधातुकामः
क्षत्तारमादिशदथाऽऽनयनाय तेषाम् ॥ 57

श्रुत्वा तदागमनहेतुमजातशत्रु-
वैरं दुरोदरविधावपि शङ्कमानः ।
चक्रे मतिं सपदि चेतसि गन्तुमेव
दैवं हरत्यहितकाङ्क्षि विवेकमुद्राम् ॥ 58

स भ्रातृभिस्सह गतः कुरुराजधानीं
संस्कारपूर्वमथ बन्धुतया समेतः ।
कृष्णा च कौरववधूरखिलास्स्वलक्ष्म्या
ताराः प्रभेव तपनस्य तिरश्चकार ॥ 59

नीत्वा गृहेषु तदहः परिबर्हगर्भे
ष्वन्येद्युराशु रचिताखिलसान्ध्यकृत्याः ।
पार्थास्सभां प्रविविशुः कितवैस्सनाथां
क्रूरैर्ग्रहैः परिचितामितरे यथा द्याम् ॥ 60

आलोक्य धर्मतनयं शकुनिर्जगाद
द्यूतं वयस्यवर साम्प्रतमाचराम ।
साम्राज्यमास्थितवतां सुखिनां नृपाणा
माचक्षते ननु विनोदमिदं विदग्धाः ॥ 61

राजा तमभ्यधित मातुल वैरिहेतुः
किं कीर्त्यते कितव कृत्यमिदं त्वयैवम् ।
अस्मान्विजेतुमभिवाञ्छसि चेत्किमक्षैः
शस्त्रं गृहाण युधि विक्रमिणां हि कीर्तिः ॥ 62

भूयस्तमाह शकुनिः प्रियदेवनेऽस्मि
न्नाशङ्क्यतामपरथा भवता न किञ्चित् ।
स्याद्वैशसं यदि नृप क्रियतां निवृत्ति
र्जागर्ति शश्वदधिकर्द्धिरपायशङ्कि ॥ 63

तं प्रत्युवाच कुपितः कुरुवंशकेतु
द्यूते रणे च विमतैः कितवैश्च वीरैः ।
आहूत एष न जनः कुरुते निवृत्तिं
सज्जोऽस्मि लोभरहितः प्रतिदेविता कः ॥ 64

तावच्च देवनविधेः सुबलस्य सूनुः
कर्ता पणावहृतेषु सुयोधनोऽभूत् ।
वैषम्यमाकलयतापि युधिष्ठिरेण
स्वेनैव तद्द्वयमपि प्रतिपन्नमासीत् ॥ 65

प्रज्ञादृशः क्षितिपतेः पुरतस्सभायां
प्रत्येकमासनगतेषु नराधिपेषु ।
धर्मात्मजश्च कुरुनन्दनमातुलश्च
क्षत्रान्तहेतुमथ देवनमादधाते ॥ 66

तेनानुदेवनममौ विजितश्शठेन
भूषारथद्विपहयान्परिचारकांश्च ।
कोशालयांश्च[1] दिशति स्म पुरोऽभिरामां
कृत्स्नां च भूमिमपहाय धनं द्विजानाम् ॥ 67

पुत्रेषु तेषु पणितेषु जितेषु पश्चा
न्माद्रीसुतौ च मतिरूपविशेषवन्तौ ।
पार्थं च विक्रमनिधिं जितनिर्जरेन्द्रं
भीमं च सत्वनिलयं शकुनिर्विजिग्ये ॥ 68

आत्मन्यथ ग्लहतया विहिते जिते च
हृष्टेन दुष्टमनसा सुबलात्मजेन ।

---

1. कोशाचलांश्च B.

कृष्णा तवास्ति धनमन्यदपीति पृष्टो
दीव्यामि सम्प्रति तयेति नृपो बभाषे ॥ 69

श्रुत्वा ततस्सदसि तस्य गिरं विभग्नो
भीमस्तु रोषभयगद्गदवागवादीत्[1] ।
धूर्तोऽपि नैवमनुतिष्ठति यत्प्रियां स्वा
मार्योऽयमन्यदिव वस्तु पणीकरोति ॥ 70

सर्वांश्च नः प्रणयिनीं च दुरोदरेऽस्मिन्
राजा स्वयं धनतया विनयोक्तुमीशः ।
तूष्णीकभावमवलम्ब्य हिडिम्बवैरि
न्नास्तां भवानिति मरुत्सुतमाह पार्थः ॥ 71

कृष्णां विजित्य शकुनौ कृतसिंहनादे
[2]-हृष्टो हसन्कुरुसुतस्सह-[2] सूतजेन ।
भद्र त्वमानय वधूमिह पाण्डवानां
दासीं विधास्य इति वेत्रिणमाबभाषे ॥ 72

आनीतया झटिति तेन तथेति गत्वा
पाञ्चालराजसुतया स्थितया सभान्ते ।
बाष्पाम्बुशीकरमुचा धृतराष्ट्रजाना
मुत्पातवारिधरलेखिकया बभूवे ॥ 73

सा लज्जितैकवसना शनकैरवादी
न्नाहं जितास्मि कितवैर्न च मेऽस्ति दास्यम् ।
यत्पूर्वमेव विजितः परतन्त्रवृत्तिः
क्षोणीपतिस्तु पणकर्मणि मामकार्षीत् ॥ 74

---

1. ०भृश० A. 2–2. हृष्टोऽभवत् – B.

श्रुत्वा गिरं रविसुतः प्रहसन्नवादी
त्पाञ्चालि किं न विजितासि न किं नु दासी ।
आयाहि मार्जय गृहं तव लज्जयालं
ख्यातास्यनेन दयिता कुलटेव भूमौ ॥ 75

किञ्च ब्रवीमि हितमेव हृतार्धराज्यान्
दासेरकान्पुनरमूनवमत्य पार्थान् ।
एकं वृणु प्रणयिनं कुरुनन्दनेषु
संबन्धमात्मसदृशं द्रुपदश्च यायात् ॥ 76

दुश्शासनस्तदनु तां पुरतः पतीना
मानेतुमात्मसविधं प्रहितोऽग्रजेन ।
अभ्यद्रवत्स्रजमिव त्वरितं ग्रहीतुं
नामंस्त कालभुजगीं बत मूढचेताः ॥ 77

आयान्तमेनमवलोक्य भयाकुलाक्षी
दुद्राव वल्गितकुचं द्रुपदस्य पुत्री ।
तां राजसूयसवनावभृथाप्लुतेषु
केशेषु सोऽपि तरसानुपतन्नगृह्णात् ॥ 78

आकृष्टकुन्तलभरच्युतमाल्यकीर्णां
तां श्रावयन् श्रुतिकटूनि वचांसि शश्वत् ।
वासस्तदीयमयमारभतापहर्तुं
चण्डस्समीर इव शारदमम्बुवाहम् ॥ 79

ज्येष्ठानुवर्तनपरानवबुध्य भर्तॄ
न्मन्दोष्मणस्सदसि भीष्ममुखांश्च वृद्धान् ।
आक्रन्दति स्म शरणं यदुनाथमुच्चै
राकृष्यमाणवसना चपलेन साध्वी ॥ 80

विस्रंसि रत्नरशनाकिरणानुविद्धं
दुश्शासने हरति हन्त दुकूलमस्याः ।
भक्तार्तिभञ्जनपरस्य हरेः प्रसादा
दाविर्बभूवुरपराण्यपि तादृशानि ॥ 81

राशीभवत्सु सिचयेषु विकृष्यमाणे
ष्वासीदयं वितथयत्नतया विलक्षः ।
निन्दाकराश्चिरममुष्य विहीनवृत्ते:
सन्तस्तदा सदसि विस्मयिनो बभूवुः ॥ 82

गर्जन्प्रियानिकृतिमारुतघट्टनेन
भीमाम्बुदः क्षरितघर्मपयःकणौघः ।
तं राजवंशवनदाहनिदानभूतं
क्रोधं कृशानुमिव वैद्युतमुज्जगार[1] ॥ 83

क्रूरेक्षणान्तिकनिवासभुवा भियेव
दूरं भ्रुवोर्युगलमुन्नतमुद्वहन्त्या ।
आलक्ष्यत भ्रुकुटिरस्य ललाटसीम्नि
क्रोधात्मकस्य नवधूमशिखेव वह्नेः ॥ 84

हृष्यद्भिरेष निबिडं पुलकप्ररोहै
रुद्दामकम्प्रमखिलं वपुरुद्वहन्त्या ।
आलिङ्गितोऽप्यनिलसूनुरमर्षलक्ष्म्या
पाञ्चालराजदुहितुः प्रमुदं वितेने ॥ 85

प्रक्षिप्तवज्रशकलांशुभरापदेशा
दागामिसङ्गरविहारमुदाहरन्तीम् ।

---

1. वैद्युतमाबभार B.

अर्चन्निवायमरुणाब्जनिभैरपाङ्गै
राद‍ाय संसदि गदां भ्रमयन्बभाषे ॥ 86

सर्वे नृपाः शृणुत सम्प्रति मत्प्रतिज्ञां
केशाम्बरग्रहणपातकिनः प्रियायाः ।
तस्याहवे नखमुखैः विदलय्य वक्षः
पास्यामि शोणितमिभस्य यथा मृगेन्द्रः ॥ 87

अध्यास्यतामयि तवोचित एष तूर्ण
मत्युद्धतोऽयमिह दर्शितवान्यदूरू ।
तच्चूर्णयिष्यति सुयोधनमेनमूर्वोः
सङ्ख्याहतानुजशतस्य गदाममेयम् ॥ 88

उत्थाय वासविरुदश्चदमर्षसम्प
द्विष्फारयन्धनुरधिज्यमभाषतोच्चैः ।
सूतात्मजं सुतसुहृत्सहितं समीपे
शातैश्शरैश्शकलयिष्यति गाण्डिवो मे ॥ 89

श्रुत्वैवमुग्रमुभयोरपि वीरवाद
मन्धो नृपः कृपगुरुप्रमुखैर्नियुक्तः ।
कृष्णां क्षमस्व परिभूतिमिति ब्रुवाणो
धर्मात्मजाय जितमर्पयति स्म राज्यम् ॥ 90

आसादिताखिलधने प्रतियाति तस्मिन्
दुर्योधनः पितरमेत्य जगाद रुष्टः ।
सर्वे गता वयममी भवता नरेन्द्र
त्यक्त्वा स्वकार्यमहितैकसुखावहेन ॥ 91

बाल्यात्प्रभृत्यपकृता मयि बद्धवैरा
कृष्णापराभवमुदीक्ष्य कृतप्रतिज्ञाः ।

[1]-त्वत्तः परे-[1] पुनरपि प्रतिपद्य राज्य
मुन्मूलयेयुरचिरेण समूलमस्मान् ॥ 92

तस्मातिकूल्यमपहाय भवानिहास्तां
दीव्यामि सम्प्रति रिपूनुपहूय भूयः ।
मन्मातुलः कमपि चिन्तितवानुपायं
यास्यन्ति येन विलयं दृढविग्रहास्ते ॥ 93

अक्षैर्जितास्सदसि ये नववल्कभाज
स्ते द्वादशान्वसतु काननवासमब्दान् ।
अन्यं नयन्त्वविदिता रिपुभिर्यदीह
ज्ञाताश्चरेयु रमुनैव पुनः क्रमेण ॥ 94

आकर्ण्य संविदमिमां नृपतिः प्रहृष्यन्
गान्धारराजतनया[2] विनिवारितोऽपि ।
संदिश्य वेत्रिजनमानयते स्म पार्थ
मुल्लङ्घनाय नियतेर्भुवि कल्पते कः ॥ 95

क्षात्ते स्थितः पथि निवृत्य नृपोऽर्धमार्गे
प्राप्तस्सभां शकुनिमन्त्रमयग्रहेण ।
भूयोऽप्यदीव्यदवधीर्य गिरोऽनुजाना
माविष्ट एव कलिना[3] सुरकार्यहेतोः ॥ 96

अक्षान्विकीर्य शकुनिर्जितमित्यवादी
त्पार्थं प्रहर्षसलिलाकुललोचनान्तः ।
सौभ्रात्रवद्भिरनुजैस्सह सत्यसन्धो
जग्राह वल्कलमसौ जनतापशोकम् ॥ 97

1-1. पार्था निर्जं A. 2. ०सुतया B. 3. विधिना B.

पार्थ त्वयेह भुवि कौरवनिर्जितायां
स्थातुं न युक्तमिति वादिनि सूतसूनौ ।
आपृच्छ्य बन्धुजनमश्रुजलाविलाक्षं[1]
निर्गच्छति स्म सहसा नृपतिस्सभायाः ॥ 98

निस्तीर्णसंविद इमे विजितारयस्त्वां[2]
द्रक्ष्यन्ति सम्पदमवाप्य सुतास्त्वदीयाः ।
आश्वासितामिति पृथां सपदि प्रवीराः
क्षत्तुर्निवेश्य भवने नगरान्निरीयुः ॥ 99

करधृतनिजशस्त्रास्सानुतापान्धभूप[3]-
प्रहितरथगतास्ते सोमवंशावतंसाः ।
प्रययुरनुचरन्तं पौरलोकं निवर्त्य
स्वमशिषदसपत्नं धार्तराष्ट्रश्च राज्यम् ॥ 100

इत्यगस्त्यपण्डितकृतौ बालभारते महाकाव्ये[4] सप्तमस्सर्गः ।

---

1. साश्रु० A.
2. निहतारय स्त्वां A.
3. धृतनिजभुजशस्त्राः० B; Cv.
4. B. omits

अष्टमस्सर्गः

कृतेऽथ किम्मीरवधे बकारिणा
वनं गतः काम्यकमस्तकण्टकम् ।
युधिष्ठिरो धौम्यमुखैस्सह द्विजैः
स्थितिं व्यधाद्द्वैतवनान्तिके चिरम् ॥ 1

ततोऽर्जुनस्सत्यवतीसुतान्मुने
रवाप्य विद्यामरिनिर्जयोत्सुकः ।
ययौ हिमाद्रिं तपसा प्रसाधिता-
त्पुरद्विषः पाशुपतास्त्रसिद्धये ॥ 2

विलङ्घ्य देशान्विविधान्व्यलोकय
त्स शैलराजं मृगनाभिगन्धिनम् ।
सदा हिमानीं दशदिक्प्रसारिणीं
बिभर्ति यः कीर्तिमिवात्मसम्भवाम् ॥ 3

तटेन्दुकान्तद्युतिशुभ्रमूर्तिषु
भ्रमत्सु यस्मिन् सुरगन्धहस्तिषु ।
विचिन्वती दन्तचतुष्टयेक्षणा-
न्निजं[1] पतिं वेत्ति कथंचिदभ्रमुः ॥ 4

अहर्पतेरस्तमितस्य सानुषु
स्फुटं विषक्तान्विषमाश्मकोटिषु ।

---

1. पतिं निजं B.

निशासु यः प्रज्वलितौषधिच्छला
दधाति रोचिश्शकलानितस्ततः ॥ 5

अहीश्वराश्वाससमीरणोद्धतै
र्विषाग्निभिः प्लोषजुषोऽगुरुद्रुमाः ।
दिशन्ति यस्मिन्निजधूमसम्पदा
नभश्चरीकेशभरस्य वासनाम् ॥ 6

तमिन्द्रकीले शिखरेऽस्य भूभृतः
कृताधिरोहं[1] कृतिनां पुरस्सरम् ।
पृषद्भिरश्मस्खलदूर्मिजन्मभि
र्हृताध्वखेदं विदधे वियन्नदी ॥ 7

तदन्तिके कुत्रचिदाश्रमे व्रती
जटा दधानोऽभिषवेण पाटलाः ।
स पल्लवापीडसनाथमौलिना
जगाम[2] साधर्म्यममर्त्यशाखिना ॥ 8

फलेन पर्णेन जलेन वायुना
स्थितिं शरीरस्य सकल्पयन्क्रमात् ।
उपोढकार्श्योऽधिकनिर्मलोऽन्वहं
बभूव पक्षे बहुले यथा शशी ॥ 9

कृशानुमध्ये प्रपदेन तिष्ठतो
निविष्टदृष्टेस्सवितर्युदर्चिषि ।
उदस्तबाहोर्जपतोऽस्य केवलं
व्यलोक्यतस्पन्दनमोष्ठसम्पुटे ॥ 10

---

1. कृताधिवासं B. 2. अवाप C.

उदग्रतेजोऽभिहतैर्महर्षिभि-
निवेदिते तादृशि सव्यसाचिनि ।
हरेण भक्तार्तिहरेण तत्क्षणं
किरातरूपं प्रतिपन्नमुत्तमम् ॥ 11

कपर्द एवास्य फणीन्द्रबन्धनो
द्युसिन्धुगर्भश्शशिखण्डमण्डनः ।
बभूव बद्धो नवबर्हमालया
सगर्भको मौलिरुदूढकेतकः ॥ 12

द्विपेन्द्रदानद्रवतुल्यकान्तिना
गलप्रभायाः प्रसरेण कर्बुरे ।
अभूदमुष्यातिपृथुन्युरःस्थले
नरास्थिमाला नवमौक्तिकावलिः ॥ 13

तदेव नागाजिनमन्तरीयतां[1]
गतं वसानः शरदम्बुदच्छविः ।
धनुर्वहन्कोटिविलम्बिचामरं
हरः प्रतस्थे हरिसूनुसंमुखम्[2] ॥ 14

परिस्फुरत्पल्लवपाटलांशुका
प्रकोष्ठडोलायितकाचकङ्कणा ।
उरोजयोः कुञ्जरकुम्भतुल्ययो
र्युगेन गुञ्जाफलदाम बिभ्रती ॥ 15

मनश्शिलापङ्कललाटचारुणा
सदन्तताटङ्करुचा मुखेन्दुना ।

---

1. कृष्णाजिन० A; सिंहाजिन० B. 2. ०सम्मुखः B.

जयोपनीतं गुहवाहनच्छदं
नवं नयन्ती श्रवणावतंसताम् ॥ 16

प्रफुल्लवन्यप्रसवावमालिनी
समानवेषैस्सहिता सखीजनैः ।
नितम्बभारालसमन्थरैः पदै
रनुप्रयाति स्म गिरीशमम्बिका ॥ 17

अनुद्रुतौ लुब्धकवेषधारिभि
र्गणैर्गृहीतश्रुतिविश्वकद्रुभिः ।
परस्परालोकननिर्वृतौ शिवौ
हिमाचलप्रस्थपथेन जग्मतुः ॥ 18

विभौ परिष्कुर्वति सानुमात्मना
गिरिस्तदा शान्तनिनादनिर्झरः ।
अभूदरण्योज्झितदावविप्लवो
निरुद्धनीरन्ध्रतुषारदुर्दिनः ॥ 19

मनोज्ञवेषं मिथुनं तदादिमं
विलोकितं व्योम्नि विमानचारिभिः ।
द्रुमाधिरूढा वनदेवताः पुरः
प्रकीर्णपुष्पाञ्जलयो ववन्दिरे ॥ 20

प्रकीर्णकन्दर्पचितान्तभस्मभि
र्विमोहितोपान्तमृगस्य मारुतैः ।
उमाहरौ स्थाणुवनस्य दर्शने
बभूवतुर्नम्रमुखौ विलोकितौ ॥ 21

सकर्णिकारच्छविरम्बिकासखो
वनं मधुर्मूर्त इव प्रसाधयन् ।

गणानवस्थाप्य तपोवनाद्बहि
स्समीपमापद्यत सव्यसाचिनः ॥ 22

प्रदर्शितो दूरत एव शम्भुना
तपश्चरन्नंसविषक्तकार्मुकः ।
कृशाकृतिः पाण्डुसुतः कृपाजुषा
महीध्रपुत्र्या मनसान्वगृह्यत ॥ 23

अथाऽऽपतन्तं धृतसूकराकृतिं
खुराहतग्रावविनिर्यदर्चिषम् ।
स घोरघोणादलितान्तिकद्रुमं
जिघांसुमालोकत मूकदानवम् ॥ 24

स तं विदित्वाऽसुरमेव कंचन
द्विषा नियुक्तं स्वतपोविघातुकम् ।
विहन्तुकामः पदमुच्छ्रितं निजं
क्षितौ निचिक्षेप शरं च कार्मुके ॥ 25

हरेण चागत्य विकृष्टधन्विना
ममैष लक्ष्यं[1] न निहन्यतामिति ।
निवार्यमाणोऽप्यवमत्य तद्वचो
मृषावराहे प्रजिधाय सायकम् ॥ 26

तरस्विना तेन समं महाद्युतिः
पपात तस्मिन् गिरिशोज्झितः शरः ।
प्रकाशिताशेषदिशोऽपराचले
सहातपेनेव सहस्रदीधितिः ॥ 27

---

1. ममैषुलक्ष्यं A.

उदग्रदंष्ट्राङ्कुरवैद्युतद्युतिं
शरावुभावुज्झितघर्घरारवम् ।
विमर्दयामासतुरुग्ररंहसौ[1]
घनं समीराविव पूर्वपश्चिमौ ॥ 28

मृते मृगे शर्वमुवाच फल्गुनः
किरात जानासि न लुब्धकक्रमम् ।
यदत्र विद्वेषिणि लक्षिते मया
निपातितः प्राग्भवता शिलीमुखः ॥ 29

ततस्स तं सस्मितमेवमब्रवी
द्वने मदीये बहुसत्त्वसंकुले ।
सहाङ्गनाभिर्मृगयाविधायिना
मया मृगो दूरममावनुद्रुतः ॥ 30

दयापरस्य त्वयि मे शरो महा
नपातयिष्यत्प्रथमं न चेदमुम् ।
तवैष बाणं प्रतिहत्य घोणया
तपोधनं त्वामहनिष्यदुद्धतः ॥ 31

इदं वचस्तस्य निशम्य दुःश्रवं
मृषाकिरातस्य रुषारुणेक्षणः ।
मुखेन्दुना भ्रूकुटिभङ्गलक्ष्मणा
पुनर्जगाद स्फुरदोष्ठमर्जुनः[2] ॥ 32

वनेचरस्त्वं गिरिकन्दरास्पदो
न वेत्सि पुंसो भुवि बाहुशालिनः ।

---

1. विनाशयामासतु० B.   2. स्फुरितोष्ठ० B.

विकत्थनं त्वां पुरतो मृगीदृशां
नयामि बाणैरिह पोत्रिणो गतिम् ॥ 33

इति ब्रुवन्नीषदमर्षचुम्बितै
रितस्ततः पारिषदैर्विलोकितः ।
किरन्पृषत्कानिषुवर्षिणाऽऽहवं
वृषध्वजेनाऽकृत वानरध्वजः ॥ 34

विहायसि च्छादितदिग्भिरावृते
पिनाकगाण्डीवविनिस्सृतैश्शरैः ।
क्षणेन निश्शेषमिवाथ चूर्णिता
रवेरलक्ष्यन्त न कुत्रचित्कराः ॥ 35

[1-]तदा त्रिनेत्रज्वलनोष्मतापिताः[-1]
कपर्दसिन्धोः परिपीतपाथसः ।
फणामणीनां कषणेन भोगिनां
शिलीमुखाः शातमुखाः किरीटिनः ॥ 36

पुरा पुरारिर्मृदुसम्प्रहारवा
न्मुनेर्दृढाकृष्टशरासनच्युताः ।
प्रहृष्टरोम्णा वपुषा शरावली
र्बभार भक्त्येव निवेदिताः स्रजः ॥ 37

निषङ्गबाणेषु गतेषु सङ्क्षयं
नितान्तमक्षीणसमीककौतुकः ।
पतिं पशूनामवरोपितज्यया
स चापयष्ट्या प्रजहार फल्गुनः ॥ 38

1-1. ललाटनेत्र० B.

स निर्दयैर्गाण्डिवताडनैर्यथा
मुदं दधौ मूर्ध्नि विमर्दितेन्दुभिः ।
तथा न लीलाकलहेषु सन्नतः
पदप्रहारैर्दुहितुर्महीभृतः ॥ 39

विशीर्णगङ्गाम्बुकणानुषङ्गिणा
सुधानिषेकेण तुषाररोचिषः ।
प्रवीरचापाहतिमूर्च्छिताः[1] प्रभो[2]
रुदश्वसन्मौलिगता महोरगाः 40

ततः प्रभावेन हृते च कार्मुके
रजोविमृष्टक्षतजार्द्रपाणिना ।
स्थिरो भवेति ब्रुवता किरीटिना
किरातनाथस्सुचिरं न्ययुध्यत ॥ 41

हरार्जुनौ मुष्टिभिराहतौ मिथो
भुजाभिराश्लिष्य भुवं गतावुभौ ।
गिरिश्चलन्नुत्कटनिर्झरस्रुति-
र्दधौ कथंचिद्भुजगेन्द्रधारितः ॥ 42

सुमेरुवप्रप्रतिमेन वक्षसा
निपीड्य मुक्तः शबरेण मूर्च्छितः ।
स लब्धसंज्ञः पुनरुत्थितो जयं
चकाङ्क्ष तस्यार्चनया पुरद्विषः ॥ 43

स मन्त्रवत्सैकतलिङ्गमूर्धनि
न्यधत्त यद्यत्कुसुमं वनाहृतम् ।

---

1. स वीर० A. 2. विभोः A.

सविस्मयस्तत्तदरालकुन्तले
पुलिन्दभर्तुः शिरसि व्यलोकयत् ॥ 44

स तस्य हर्षादुपपत्य[1] पादयोः
कृतप्रणामस्य पुरः प्रसेदिवान् ।
वरोक्षमास्थाय[2] निषेवितो गणै
रुमासखस्सन्निदधे दयानिधिः ॥ 45

कृतं विमर्दं युधि दारुणं मम
क्षमस्व देवेति वदन्तमर्जुनम् ।
तवास्मि तुष्टो नतमौलिसिन्धुभि
र्धनुःप्रहारैरिति शम्भुरब्रवीत् ॥ 46

यथा पुरं सन्निहिते शरासने
निषङ्गयुग्मे च पृषत्कपूरिते ।
स मन्त्रपूर्वं ज्वलदूर्ध्वलोचनं
स्वकीयमस्त्रं विततार जिष्णवे ॥ 47

तिरोहितेऽस्मिंत्सह भूतसैनिकै
स्स लब्धवानस्त्रमनन्यदुर्लभम् ।
न केवलं भीष्ममुखाञ्जितान्कुरू
नमंस्त लोकांत्ससुरासुरानपि ॥ 48

ततः पतिभ्यः पितृयक्षयादसां
प्रहृष्टमस्त्राण्युपलभ्य पाण्डवम् ।
निजानि च प्रापयितुं कुतूहली
निनाय नाकं स्वरथेन वासवः ॥ 49

---

1. ०दुपसृत्य B. 2. महोक्षं० B.

स तत्र निष्पन्दविलोचनोत्पलै
विलोकितस्सस्पृहमप्सरःकुलैः[1] ।
अधिष्ठितोऽर्धासनमस्य सन्ततं
ययौ जयन्तादपि माननीयताम् ॥ 50

कृताभिसारां स कदाचिदूर्वशीं
स्मरस्य मूर्तामिव शस्त्रदेवताम् ।
उपाचरन्मातृवदादृतो वशी
शशाप सा वर्षवरो भवेति तम् ॥ 51

निशम्य वृत्तान्तमिमं सविस्मयो
रहस्तमाहूय च सत्कृतं सुरैः ।
त्रयोदशे शापमुपैतु हायने
भवानिति व्याहरदात्मजं हरिः ॥ 52

गुरोस्स तस्माद्बलवत्प्रहृष्यतः
कृतास्त्रजातः कृतलक्षणाग्रणीः ।
क्रमेण गन्धर्वपतेस्सुहृद्वरा
दवाप सङ्गीतकलासु कौशलम् ॥ 53

दिवोऽवतीर्णादुपगम्य[2] रोमशा
दुदन्तमस्याद्भुतमूढसंमदः
युधिष्ठिरस्सावरजस्सहामुना
निनाय कालं भुवि तीर्थसेवया ॥ 54

क्रमादुदीचीं दिशमेत्य पाण्डवाः
पुलिन्दभर्तुः[3] पुरि वारितानुगाः ।

1. अप्सरोगणैः B. 2. ०अवगम्य B. 3. कलिन्द० B.

घटोत्कचस्कन्धगता गिरीन्बहू
न्विलङ्घ्य भेजुर्बदरीतपोवनम् ॥ 55

नरेण नारायणसङ्गतेन ते
महर्षिणा सत्कृतिपूर्वमीक्षिताः ।
हतैनसः पार्षदकन्यया समं
चिराय तत्र न्यवसन्महौजसः ॥ 56

कदाचिदादाय नभस्वदाहृतं
सुगन्धिसौगन्धिकमेकमुज्ज्वलम् ।
अयाचतान्यानि च तादृशानि सा
कुतूहलेन प्रियसाहसं प्रियम् ॥ 57

तथेति तद्गन्धहरानुसारिणा
गदासहायेन धनुष्मताऽमुना ।
वनानि जङ्घाजवभग्नशाखिना
हतेभयूथेन पथा ललङ्घिरे ॥ 58

अपश्यदाग्रे कदलीवनास्पदं
निशाचरास्त्रव्रणकन्दराचितम् ।
असौ मरुन्मानितमञ्जनात्मजं
पतिं गिरीणामिव गन्धमादनम् ॥ 59

कपिस्तदस्मै प्रथमं दिदृक्षवे
वपुर्निजं वारिधिलङ्घनक्षमम् ।
अदर्शयत्खेचरदृष्टिगोचरं
ततस्सरोवर्त्म च हृष्टमानसः ॥ 60

स तेन गच्छन्निभृतत्वमात्मनः
प्रकाशनं रामकथोक्तिचातुरीम् ।
वपुश्च विन्ध्योपमितं हनूमतो
विभावयन्दिव्यमथासदत्सरः ॥ 61

कुबेरयोषित्कुचमर्दितोर्मि त
त्प्रविश्य कल्हारशतानि साहसी ।
नखैर्लुनाति स्म तदीयरक्षिणां
शरैश्च तत्रोत्पलकाननानि सः ॥ 62

स्वशौर्यविद्रावितयक्षसैनिकः
सरस्तटे तत्र घटोत्कचाहृतैः ।
अयुज्यत भ्रातृभिरर्जुनाग्रजो
निजाश्च सौगन्धिकमञ्जरीयैर्वधूः ॥ 63

कदाचिदस्मिन्मृगयावनं गते
जटासुरस्त्रीन्धनदाद्रिवर्तिनः ।
जहार पत्न्या सह पाण्डुनन्दना
नृचेव वेदांस्वबलेन सोमकः ॥ 64

सुखेन[1] धावन्करभग्नपादपो
निजौजसा स्कन्धगतेन भूभुजा ।
निरुद्धवेगो विदधे मदोद्धतः
शिताङ्कुशेनेव गजो निषादिना ॥ 65

अथांसपीठादवतार्य पाण्डवान्
निशाचरः काननगर्भनिर्गतम् ।

---

1. जवेन॰ A.

स्फुरद्भुजास्फोटनिनादभीषणं
निबोधयामास हिडिम्बवैरिणम् ॥ 66

बकद्विषा कृत्तमरत्निधारया
गभीरनिर्ह्रादि शिरो विरोधिनः ।
पपात निष्पिष्टतटद्रुमं गिरे
रुपत्यकासीमनि गण्डशैलवत् ॥ 67

ततस्तदुद्देशमपास्य पाण्डवा
निविश्य दिव्यर्षितपोवने क्वचित् ।
प्रतीक्षितश्वेततुरङ्गमागमा
श्चिरं धनेशस्य गिरौ विजह्रिरे ॥ 68

धृतास्त्रमाहूय सिताश्वमेकदा[1]
समीयुषां स्वस्य रणेष्ववध्यताम् ।
सुरद्विषामम्बुधिमध्यवर्तिनां
वधं ययाचे गुरुदक्षिणां हरिः ॥ 69

स तं प्रतिश्रुत्य तथेति वज्रिणे
वहन्किरीटं शिरसा तदर्पितम् ।
अधिष्ठितो मातलिसारथिं रथं
जगाम शृण्वन्दिविषज्जयाशिषः ॥ 70

विलङ्घ्य नीलाब्जनिभं[2] वियत्पथं
सुवर्णवप्रच्छविकेसरावलिम् ।
अपश्यदग्रे हरिसूनुरासुरीं
मुदन्वदिन्दीवरकर्णिकां पुरीम् ॥ 71

1. कृतास्त्र० Cv. 2. नीलाम्बुधरं A; नीलाब्जवनं B.

गतं मुखाब्जस्य मुदावहं[1] सतां
स देवदत्तं जलजं व्यपूरयत् ।
स्वनेन तस्याकुलसत्त्वमादधे
महार्णवेन त्रिदशद्विषत्कुलम् ॥ 72

स्वसिंहनादप्रसरेण भूयसा
प्रतिष्ठशङ्खध्वनयः किरीटिनः ।
पुरान्निरीयुः स्फुरदाहवादरा
स्त्रिकोटिसङ्ख्यास्त्रिदिवेशविद्विषः ॥ 73

क्षणेन ते शस्त्रभुजङ्गधारिणः
शताङ्गमातङ्गतुरङ्गयादसः ।
शरार्चिरुग्रं परिवव्रुरर्जुनं
युगान्तवह्निं जलधेरिवोर्मयः ॥ 74

निरन्तरैर्गाण्डिवनिस्वनैर्दिशो
महासुराणां क्षतजेन सागरम् ।
सुतो यशोभिश्च हरेरपूरय
द्रसातलं भोगवतीजलामलैः ॥ 75

इत्थं निवातकवचांस्स निहत्य दैत्या
न्पातालतस्सह जयेन निवर्तमानः ।
भ्रातुर्वरेण दनुजैर्मनुजैरवध्यैः[2]
गुप्तं विहायसि हिरण्यपुरं रुरोध ॥ 76

पौलोमानथ बलिनश्च कालकेया
नापत्य प्रथनविधायिनो जिघांसुः ।

1. मराळकवं C; मुहूर्तहंसतां B. 2. अवार्यैः A.

स्मृत्वान्तः पशुपतिमन्त्रघोरमस्त्रं
प्रायुङ्क्त ज्वलितदिगन्तमिन्द्रसूनुः ॥ 77

कतिचिदुरगाः केचित्ताक्ष्याः परे रजनीचराः
कतिचनगजाः केचित्सिंहाः परे च तरक्षवः ।
मुहुरुदयिनस्तस्मादस्त्रात्प्रमथ्य महासुरान्
पुरमपि च तत्स्वेन प्लुष्टं व्यतन्वत तेजसा ॥ 78

ततो नाकं यातो नयनगलदानन्दपयसा
विसृष्टस्संभाव्य त्रिदशपतिना भूषणशतैः[1] ।
शताङ्गेनाऽश्वानामवयवरुचा शाद्वलदिशा
सकाशं भ्रातॄणां त्रिदशविनुतः प्राप विजयः ॥ 79

अमुना सह गन्धमादनाद्रौ
निवसन्तस्सुचिरं सुखेन पार्थाः ।
त्रिदिवाय विसृज्य रोमशं ते
प्रययुर्द्वैतवनं पुनः प्रहृष्टाः ॥ ८0

॥ इत्यगस्त्यकृतौ[2] बालभारते महाकाव्ये[3] अष्टमस्सर्गः ॥

---

1. ०गणैः B. 2. ०पण्डित० B. 3. B omits.

अथ नवमस्सर्गः

तत्र स्थितान् जातु निशम्य पार्थान्
तेभ्यः श्रियं दर्शयितुं कृशेभ्यः ।
पतिः कुरूणां महता बलेन
जगाम लक्षीकृतघोषयात्रः ॥ 1

स स्मारणानन्तरमात्मसेनां
निवेशयन्द्वैतवनस्य पार्श्वे ।
गन्धर्वसैन्यैर्मघवन्नियुक्तै-
र्न्यरोधि विश्वावसुसूनुमुख्यैः ॥ 2

तेषां कुरूणां च कृतोद्यमानां
कृतान्तयज्वक्रतुराहवोऽभूत् ।
अनुक्षणं क्ष्वेलितमन्त्रहूतै
स्सान्निध्यमानीयत यत्र देवैः ॥ 3

वीणागुणान्वादयतामजस्रं
किं कार्मुकास्फालनकर्मणा वः ।
गन्धर्वयोधानिति भाषमाणो
विव्याध[1] राधातनयो विषाणैः[2] ॥ 4

तस्येषुभिर्विद्धसमस्तगात्रा-
नितस्ततो विद्रवतस्स्वसैन्यान् ।

---

1. रुरोध B. 2. विपाटैः B.

निर्वर्तयन्कार्मुकनिस्वनेन
तमभ्ययात्संयति चित्रसेनः ॥ 5

शरं शरेण क्षिपता विसृष्टं
प्रयुक्तमस्त्रेण निरस्यतास्त्रम् ।
मायाविना तेन महारथेन
पराजितः प्राद्रवदङ्गराजः ॥ 6

आगत्य[1] दृष्टोरगतार्क्ष्यवेगो
जितं[2] गृहीत्वा युधि रज्जुबद्धम् ।
रथे निचिक्षेप निजे स दिव्यः
कौरव्यमिन्द्रस्य हृदि प्रमोदम् ॥ 7

आदाय तं यात्सु नभश्चरेषु
क्रोशंस्तदन्तःपुरिकानिकायः ।
प्राग्वंशभाजं शशिवंशकेतु-
मजातशत्रुं शरणं प्रपेदे ॥ 8

कृताञ्जलीनां कृपणोक्तिगर्भा-
ण्युदश्रुपारिप्लवलोचनानि ।
मुखानि तासां रिपुसुन्दरीणा-
मालोक्य भीमः प्रहसन्नवादीत् ॥ 9

राज्ये स्थितः कौरव एष युक्तो
रिक्तान्बलौघैरिह केवलान्नः ।
आजह्निवान्द्रष्टुमनेन दिष्ट्या
गन्धर्वभर्त्रा ह्रियते निबद्धः 10

1. आपात्य B. 2. दृढं B.

अस्माकमारभ्य शिशुत्वकेलि-
मनागसामारचितापकारः ।
यः पर्यभूत्संसदि याज्ञसेनीं
दुष्कर्मणस्तस्य फलं स भुङ्क्ते ॥ 11

इत्युक्तवन्तं तमुवाच राजा
वत्साधुना नार्हसि वक्तुमेवम् ।
दायादवर्गस्य परस्परस्य
स्थाने निकारः परतो हि निन्द्यः ॥ 12

युष्माकमग्रे सुरवांशिकेन
बद्धो हृतश्चेदयमीदृशोऽपि ।
जगत्त्रयेऽपि व्यपदेश्यताया
भवेन्न पात्रं भरतान्ववायः ॥ 13

तद्विक्रमवत्त्वं शरणागताना
मासां वधूनां सहसापनेतुम् ।
शत्रोरमुं मोचयतात्तचापा
यशो महीयः किमतः परं वः ॥ 14

तथेति चादाय वृकोदराद्या
स्तच्छासनं सज्यशरासनास्ते ।
निरीयुरुद्योगमुदीक्ष्य तेषां
गन्धर्वयोधाश्च पुनर्निवृत्ताः ॥ 15

विमुञ्चथ भ्रातरमस्मदीयं
नचेच्छरैर्वश्शमयामि गर्वम् ।
इत्यर्जुनस्याऽविगणय्य वाचं
बाणानमुञ्चन्नसुयोधनं ते ॥ 16

समुत्पतन्तः पतता रयेण
तेषामिषून्पार्थशराः प्रतीयुः ।
आसारपातान्प्रलयाम्बुदानां
ज्वालाकलापा इव कालवह्नेः ॥ 17

विक्रम्य गन्धर्वपतिश्चिराय
शौर्येण हृष्टो विजयस्य सख्युः ।
तेनाचितज्ञेन समेत्य राज्ञो
जगाम पार्श्वं रुरुशृङ्गपाणेः ॥ 18

स सत्कृतस्तेन जगाद राजन्
हितैषिणस्ते वचसा मघोनः ।
इहागतं वैभवदर्शनाय
नयामि बद्धं युधि धार्तराष्ट्रम् ॥ 19

इत्युक्तवान्धर्मभुवोऽनुरोधा
दग्रे निधायास्य पतिं कुरूणाम् ।
सैन्यैस्समं शक्रसुतं प्रशंस-
न्प्रीतो दिवं प्रास्थित चित्रसेनः ॥ 20

तं रज्जुभिस्संयतसर्वगात्र-
मवाङ्मुखं दीनमुदीक्ष्य शत्रुम् ।
कराङ्गुलीसंवृतवक्त्रपद्मा
वल्गत्कुचं पार्थवधूर्जहास ॥ 21

नरेश्वरस्तं सहसा विमुक्तं
दरोच्छ्वसल्लोहितबन्धमार्गम् ।
मैवं पुनस्साहसमाचरेति
न्ययुङ्क्त गन्तुं कुरुराजधानीम् ॥ 22

गच्छत्सुमार्गे सहितोऽवरोधैः
प्रभातिकश्चन्द्र इवास्तकान्तिः ।
सैन्यानि गन्धर्वबलार्दितानि
न्यवीविशद्रोधसि निम्नगायाः ॥ 23

स तत्र बन्धूनवदत्समेता-
न्दत्तानमित्रैरनुकम्पमानैः ।
त्यक्ष्याम्यसून्प्रायमिहास्थितोऽहं
वरं हि जीवन्निकृतस्य मृत्युः ॥ 24

यात्रामिमामुक्तवतो दुरन्तां
द्रष्टुं न शक्नोमि पितामहादीन् ।
सवाहनाः प्राप्य पुरं भवन्तः
कुर्वन्तु दुश्शासनमात्तराज्यम्[1] ॥ 25

आकर्ण्य तस्योदितमात्तभीति
र्दुश्शासनो दुःखनिमग्नचेताः ।
कृतप्रणामो नयनाम्बुधौतौ
विधाय पादाविदमाबभाषे ॥ 26

अनार्यगृह्यां शुचमार्य हित्वा
यथापुरं पाहि महीमशेषाम् ।
ज्याबद्धमुक्तः कृतवीर्यसूनोः
न किं शशास त्रिजगद्दशास्यः ॥ 27

अघं वदन्त्यात्मवधेन वृद्धा
धियं त्यजेमां सुधियामधीश ।

---

1. ०माभिराज्ये A.

प्रसीद पातुं पितरावनाथा
वस्मान्विषण्णान्सुहृदश्च दीनान् ॥ 28

कर्णोऽवदद्धेत्सि सखे न किञ्चि-
द्बिभर्षि हर्षावसरे विषादम् ।
यद् द्यूतदासैस्तव तत्र कृच्छ्रे
भर्तुः प्रियं पाण्डुसुतैर्वितेने ॥ 29

उत्तिष्ठ तावद्धृतिनं भवन्तं
श्रुत्वा तु यावद्रिपवो हसेयुः ।
पुरीमृते त्वां क इहात्र गच्छे-
द्रविं विनाम्ते दिवि किं प्रकाशः ॥ 30

उक्त्वैवमस्मिन्विरते सरोषं
गान्धारनाथो गिरमुज्जगाद ।
वृथा भवांच्छोचति वत्स मोहा
ज्जहाति शोकोपहतं हि लक्ष्मीः ॥ 31

स त्वं कृतघ्नोऽसि नचेन्नरेन्द्र
संरक्षितस्संयति पाण्डुपुत्रैः ।
मात्सर्यमुत्सार्य चिराय तेभ्यो
राज्यं मयोपाहृतमर्पयेति ॥ 32

इत्थं स तेषामवधूय[1] वाच
स्साकं विभूषाभिरलुप्तधैर्यः ।
प्रायोपवेशं धृतवल्कवासा
वाचंयमत्वेन समाललम्बे ॥ 33

1. परेषां A.

अपास्य वालव्यजनादिचिह्नं
तत्रैव पार्श्वे निभृतं वसन्त्या ।
सुस्निग्धयाऽसौ कुशतल्पशायी
न तत्यजे बन्धुतयेव लक्ष्म्या ॥ 34

तथाविधं तं निशि बन्धुभूता
दैतेयनाथा बलिसद्मभाजः ।
उत्पाद्य कृत्यामनया सवेग-
मानाययामासुरथात्मपार्श्वम् ॥ 35

अलं शुचा भद्र[1] जहीहि भीतिं
संशप्तकान्सम्यगनुप्रविष्टाः ।
वयं रणे भाविनि भारते ते
शत्रून्विजेष्यामह इत्यशंसन् ॥ 36

[2-]आश्वासितस्तैरसुरैः पुरेव
तत्कृत्यया प्रापितदर्भशय्यः[-2] ।
वधं प्रतिज्ञातवताऽर्जुनस्य
सख्या सह प्राप पुरं प्रहृष्टः ॥ 37

हतावशिष्टैर्मृगयासु सत्वै
र्भियेव रक्षाविधिमर्दितेन ।
दयालुना द्वैतवनं विहाय
राज्ञा पुनः काम्यकमाशु भेजे[3] ॥ 38

शुचौ महर्षेस्तृणबिन्दुनाम्न-
स्तपोवने तत्र चिरं वसन्तः ।

---

1. वत्स B. 2–2. आश्वासितस्तैरनुजेषु सर्वेष्वलं तथा प्रायमुपागतेषु A.
3. लेभे B.

कदाचिदाखेटरसेन कृष्टाः
पार्था दिशो जग्मुरधिज्यचापाः ॥ 39

अत्रान्तरे काम्यकमध्यभाजा
गच्छन्पथा साल्वपुरं बलौघैः ।
तपोवनद्वारि निरीक्ष्य कृष्णां
जयद्रथो मन्मथगोचरोऽभूत् ॥ 40

स तां गृहीत्वा प्रसभाद्रथं स्व-
मारोप्य सीतामिव राक्षसेन्द्रः ।
वचांसि तस्याः परुषाणि शृण्व-
न्प्रहृष्टचेताः प्रययौ निवृत्तः ॥ 41

वनादुपेत्याश्रममश्रुकंठ्या
धात्र्याः प्रियाया उपलभ्य वार्ताम् ।
प्रमन्यवः पाण्डुसुतास्तथैव
रथैस्सुवीराधिपमन्वधावन् ॥ 42

विगाह्य तत्सैन्यवनानि तेषां
राजन्यशार्दूलवधोद्यतानाम् ।
इतस्ततस्सादितशूरसिंहा
बभूव संयन्मृगयैव भूयः ॥ 43

ततो धृतिपार्थवधूं[1] च हित्वा
सौवीरनाथो हतबन्धुवर्गः ।
शरक्षतैर्बन्धुभिराचिताया
रणक्षितेरारभतापयातुम् ॥ 44

---

1. पाण्डुवधूं B.

सद्भिः क्रियेवापहृतान्तराया
ज्योत्स्ना चकोरैरिव मेघमुक्ता ।
रिपूज्झिता पाण्डुसुतैः प्रहृष्टा
पाञ्चालभर्तुर्दुहिता प्रपेदे ॥ 45

तया समं पार्थिवमाश्रमाय
प्रस्थाप्य भीमस्सह फल्गुनेन ।
पार्श्वद्रुमच्छिन्नपटध्वजेन
रथेन यान्तं रिपुमन्वधावत् ॥ 46

क्व जाल्म गच्छस्यधुनेति वक्तु-
र्विलोकनादस्य विजृम्भमाणः ।
त्रासो महांस्सिन्धुपतिंससूता
मग्नौ च रथ्यांस्त्वरयांबभूव ॥ 47

पार्थप्रयुक्तेषुहताश्वसूता-
द्रथादवप्लुत्य पलायमानम् ।
एणं तरस्वीव तरक्षुरेनं
जग्राह केशेषु जटासुरारिः ॥ 48

क्षितौ निपात्य प्रहृतं पदेन
सौवीरभर्तारमसौ जिघांसुः ।
भ्रातुर्निदेशं वदता दयालो-
र्निवारितोऽभूदनुजेन भीमः ॥ 49

भयाकुलं भल्लविमुक्तमौलिं
सपञ्चमौलीकमुखव्यलीकम्[1] ।

---

1. ०चूलीक० B.

आदाय तं तौ रथरज्जुबद्ध-
माजग्मतुः पार्श्वमजातशत्रोः ॥ 50

तं वीक्ष्य राज्ञा हसता नियुक्तः
पाञ्चालकन्यामनुमान्य हृष्टाम् ।
अवाङ्मुखं व्रीडभरादमित्रं
विमुक्तबन्धं विततान भीमः ॥ 51

त्वं दुश्शलां वीक्ष्य ममानुकम्प्यां[1]
वध्योऽपि सौवीर मया विमुक्तः ।
मैवं पुनस्साहसकर्म कार्षी-
रित्युक्तमेनं विससर्ज भूपः ॥ 52

प्रणम्य दीनस्स तथेति यात-
स्त्रिस्रोतसस्तीरतपोवनस्थः ।
पार्थान् जिगीषुः प्रयतस्तपोभिः
प्रसादयामास पतिं पशूनाम् ॥ 53

निवारणं संयति दुर्जयानां
तेषां चतुर्णामपहाय पार्थम् ।
वरं ततो भक्तजनैकभव्या-
दासाद्य हृष्टः स्वपुरं प्रतस्थे ॥ 54

कर्णस्य कारुण्यनिधेः कदाचि-
दातस्थुषस्तल्पमलुब्धवृत्तेः ।
आत्तद्विजन्माकृतिरर्धरात्रौ
सान्निध्यमादत्त सहस्ररश्मिः ॥ 55

1. ममानुरूप्यां B.

तेजोनिमीलद्गृहदीपभासं
तं वीक्ष्य विस्मेरमनास्स वीरः ।
विहाय शय्यां विहितप्रणाम
स्सप्रश्रयं प्राञ्जलिराबभाषे ॥ 56

दृष्टोऽसि दत्तार्गल एव गेहे
देवेषु कस्त्वं द्विजवेषगूढः ।
कस्मिन्पुनः कर्मणि मां नियोक्तुं
प्रसादमेनं भगवन्विधत्से ॥ 57

निशम्य तद्वाचमशीतरश्मि-
रवोचदह्नामहमस्मि नाथः ।
पुत्रोऽसि कुन्त्या मदवाप्तजन्मा
पुष्णास्यतस्त्वं मयि भक्तिमग्र्याम् ॥ 58

वचो हितं मे शृणु पार्थगृह्यो
रूपं द्विजातेः परिगृह्य शक्रः ।
त्वामागतो दिव्यमिदं तनुत्रं
याचिष्यते कुण्डलयोर्युगं च ॥ 59

इमान्यदत्वा सहजानि वित्तै-
रन्यैरुपच्छन्दय तं विशिष्टैः ।
ददासि चेदर्थिजनैकबन्धो
संख्ये रिपूणां भवितासि वध्यः ॥ 60

श्रुत्वा वचस्तत्स जगाद भास्व-
न्वदेत्क इत्थं त्वदृते हितं मे ।
त्वमेव जानासि मम व्रतं त-
दत्याज्यमर्थिव्रजतोषणं यत् ॥ 61

द्विजन्मनां लब्धसमीहितानां
तुष्यामि पश्यन्वदनानि दाता ।
फुल्लानि बालातपलम्भनेन
भवानिव प्रत्यहमम्बुजानि ॥ 62

स्वान्याचमानाय जनाय कर्णः
प्राणानपि स्पर्शयतीति रूढा ।
सुपर्वभर्तुः[1] प्रणयस्य भङ्गा-
ज्जनश्रुतिः काचिदियं प्रणश्येत् ॥ 63

त्रिलोकनाथश्शतमन्युरर्थी
राधासुतोऽयं पुनरर्थनीयः ।
आत्मा न विश्राणयितुं न योग्यः
कियन्त्यहो वर्म च कुण्डले च ॥ 64

पृथासुतानां कुशलाय दिष्ट्या
याचेत चेदेष दिवोऽवतीर्णः ।
इमानि विश्राण्य विनश्वराणि
लप्स्ये स्थिरं कीर्तिमयं शरीरम् ॥ 65

त्वय्यस्ति भक्तिर्यदि मे प्रहृष्टः
स्नेहादिकस्ते मयि विद्यते चेत् ।
मनोरथं पूरयितुं मघोनः
प्रसीद याचे पुनरेतदेव ॥ 66

इत्युक्तवन्तं स्फुरदश्रुनेत्रः
पूषा पुनः पुत्रमिदं बभाषे ।

---

1. बलस्य हन्तुः B.

तवैष सर्गो यदि वत्स कुर्याः
क्षेमङ्करं कञ्चन मन्निदेशम् ॥ 67

सकुण्डलं दित्सुरिदं तनुत्रं
शतक्रतोस्स्वीकुरु शक्तिमादौ ।
[1]–इयं च नोऽभीष्टफलं प्रदास्यन्
भक्तिं यथाऽराधयितुस्समग्राम् ॥ 68

तया सुरारातिनितम्बिनीनां
प्रत्यूषलक्ष्म्या स्मितचन्द्रिकायाः–[1] ।
विजिष्यसे विद्विषमित्युदीर्य
तिग्मद्युतिस्तत्र तिरोहितोऽभूत् ॥ 69

महायशास्सोऽपि निधाय चित्ते
स्वाप्नानुभूतामिव तां प्रवृत्तिम् ।
शक्रोपयानं प्रतिपाल्य तस्थौ
कृती जनः काङ्क्षति कीर्तिमेव ॥ 70

कदाचिदेनं द्विजमूर्तिरर्थी
वृषा बलिं विष्णुरिवाभ्यगच्छत् ।
नीचैर्हि वृत्तिं क्वचिदाश्रयन्ते
सतां हिते सज्जधियो महान्तः ॥ 71

कर्णस्तनुत्रं सह कुण्डलाभ्यां
कृताशिषा तेन स याचितोऽभूत् ।
ज्ञातो हरिस्तेन च तद्विनान्य-
न्निर्बध्यमानो न जिघृक्षुरासीत् ॥ 72

1–1. B omits.

ततो हसन् व्याहरदङ्गराजो
जाने भवन्तं भगवन्महेन्द्रम् ।
शक्तिं तवादाय विपक्षहन्त्री-
मिच्छामि सम्पादयितुं त्वदर्थम् ॥ 73

अथ प्रभावोपनतां स्वशक्तिं
प्रदर्शयन्सूतसुताय शक्रः ।
हत्वेयमेकं तव शत्रुमाजौ
मामेष्यतीति व्यतरत्प्रदीप्ताम् ॥ 74

दैत्यासृगारञ्जितचामराङ्का-
मादाय तामात्तकृपाणयष्टिः ।
अङ्गान्यमावच्छिनदात्मनैव
हर्षाम्बुभिन्नक्षतजांबुलेशः ॥ 75

उत्कृन्ततस्तत्कवचं तदानीं
न जातु जाता विकृतिश्शरीरे ।
न किञ्चिदप्यस्य निकुञ्चिता भ्रू-
रपाटवं वा करयोर्न दृष्टम् ॥ 76

बिडौजसा विस्मितचेतसाऽयं
विलोकितो लोहितवर्षिगात्रः ।
रागेण दिग्धाकृतिमौषसेन
विडम्बयामास दिनाधिनाथम् ॥ 77

कृत्तं कृपाणेन सुजातवर्ण-
मुरश्छदं कुण्डलयोश्च युग्मम् ।
दत्त्वा महेन्द्राय भुवि स्थितोऽपि
स दिव्यवृक्षानधरीचकार ॥ 78

आश्चर्यमेघप्रसवाभिवृष्ट-
मापृच्छ्य राधेयमवाप्तकामः ।
नवं पुरस्कृत्य यशस्तदीयं
पतिस्सुराणां त्रिदिवं प्रतस्थे ॥ 79

उदन्तमाश्चर्यमथोपलभ्य
दिनेशपुत्रस्य दिगन्तमित्रम् ।
उवाह शोकं धृतराष्ट्रसूनु
स्सहानुजैः पाण्डुसुतश्च हर्षम् ॥ 80

स काम्यकाद्द्वैतवनं प्रयात
स्तपोवने तत्र वसन्नरेन्द्रः ।
कदाचिदागत्य ससंभ्रमेण
द्विजन्मना केनचिदाबभाषे ॥ 81

राजन्मृगः कोऽप्यरणिं मदीयां
हृत्वा विषाणेन तरौ विषक्ताम् ।
इतस्तरस्वी विपिनं विगाह्य
मूर्तो नभस्वानिव धावतीति ॥ 82

तस्याग्निहोत्रस्य विशङ्क्य विघ्नं
प्रत्याजिहीर्षन्नरणिं महीशः ।
पदानुसारेण जिघांसुरेणं[1]
सहानुजैर्धन्विभिरन्वधावत् ॥ 83

क्षणं धरित्र्यां क्षणमन्तरिक्षे
शृङ्गाग्रलग्नारणिरीक्ष्यमाणः ।

---

1. जवात्कुरङ्गं A.

नेत्रामिषूणामिव लोचनाना-
मलक्ष्यभावं हरिणः प्रपेदे ॥ 84

चिरं तमन्विष्य वने निषण्णा
रवौ ललाटंतपतां प्रयाते ।
किमप्युदन्यातुरतां गतास्ते
वन्या इवेभा वटमूलमापुः ॥ 85

आरुह्य सालं नकुलो ददर्श
सुस्निग्धमूलद्रुममञ्जचारु ।
सरस्समीपस्थितमेघवृन्दं
पर्यस्तनक्षत्रमिवान्तरिक्षम् ॥ 86

ततोऽवतीर्णस्सहसा सहर्षं
भ्रातॄन्विलोक्य प्रथमानतर्षान् ।
सरोजिनीपत्रपुटैर्विशालैः
पानीयमानेतुमनाः प्रतस्थे ॥ 87

गत्वा सरः पद्मनिषण्णहंस-
मस्मिन्नपः पातुमथावतीर्णे ।
प्रश्नान्ममाख्याय पयः पिबेति
निगूढरूपा दिवि वागुदीर्णा ॥ 88

स तामनादृत्य पिपासयार्तो
निपीय पङ्केरुहगन्धि पाथः ।
विक्षिप्तबाहाविटपं[1] क्षणेन
निर्मूलशाखीव पपात कूले ॥ 89

1. ०बाहाविटपः A; Cv.

चिरायितेऽस्मिन्ननुजस्तदीयः
राज्ञा नियुक्तस्सरसीं प्रयातः ।
दिव्यामवज्ञाय तथैव वाचं
भ्रातुर्दशां प्राप निपीततोयः ॥ 90

तयोर्विलम्बेन नृपानुशिष्टः
क्रमेण पार्थः पवनात्मजश्च ।
अनुष्ठितैवंविधकृत्यजाता-
मुभावयातामुभयोरवस्थाम् ॥ 91

चिरायमाणेषु तदानुजेषु
किमेतदित्याकुलचित्तवृत्तिः ।
शुचा तृषा च ग्लपितो नरेन्द्रः
पदैःस्खलद्भिस्सरसीमयासीत् ॥ 92

तत्रानुजान्वीक्ष्य मृतान्भयार्तः
पपात साक्रन्दमुपर्यमीषाम् ।
विगाह्य शोकं पुनराप्तसंज्ञ-
श्चकार चिन्तां प्रभुरश्रुवर्षी ॥ 93

अमी समीकेष्वविकारिशौर्या
निबर्हिताः केन विधेर्विपाकात् ।
चिह्नं सरस्येव पदं न दृष्टं
न किञ्चिदेषां वपुषि क्षतं च ॥ 94

इदं सरस्याद्विषदूषितं वा
मृताः किमेते परिपीय पाथः ।
न चैतदङ्गेषु विसृत्वरेण
विवर्णभावेन पदं वितेने ॥ 95

एभिर्विना जीवितनिर्विशेषै-
मर्मैकमत्यन्तविगाढदु:खम् ।
दूरे निरीक्ष्यैव पराभिभूता
प्राणान्परित्यक्ष्यति याज्ञसेनी ॥ 96

हतानमूनत्र यदि त्यजेयं
ममात्महत्या श्रुतिगर्हिता स्यात् ।
कथं सहे दु:खमिति प्रताप्य:
पपात शोकोपहतो धरित्र्याम् ॥ 97

ततस्स्मतर्षस्य विधाय शान्ति
जिज्ञासुरेषामवसानहेतुम् ।
सरोऽवतीर्ण: पुरत:स्थितेन
केनापि यक्षाकृतिना बभाषे ॥ 98

इदं सर: पार्थ परिग्रहो मे
प्रश्नाननादृत्य तवानुजाता: ।
पीताम्भसो हन्त हता मयैव
त्वमप्यमीषां न गतिं प्रयाया: ॥ 99

निपीय तां श्रोत्रपुटेन वाच-
मुन्मृज्य वारांणि कराहृतानि ।
प्रश्नाननेनाभिहितान्क्रमेण
प्रत्युत्तरै: प्राह नृप: स्फुटार्थै: ॥ 100

प्रीतोऽस्मि ते प्राज्ञतमाय राज-
न्यमिच्छसि भ्रातृषु तं ददामि ।
उक्तस्स्मनेनैवमुपोढहर्षो
जीवन्तमैच्छन्नकुलं नरेन्द्र: ॥ 101

स तं जगादार्य न वेत्सि कार्यं
द्विषद्धृतश्रीहरणे प्रवीणौ ।
भीमार्जुनौ ते सहजौ विहाय
कथं सपत्नीसुतमिच्छसीति ॥ 102

कुन्त्यां यथा भद्र ममास्ति भक्ति
स्तथैव माद्र्यामपि निर्विशेषा ।
जीवामि मे मातुरहं तु तस्या
जीवत्वसावित्यवदत्स यक्षम् ॥ 103

धर्मोऽहमस्मि तव वेदितुमानृशंस्यं
यातो मृगत्वमरणिं हृतवान्द्विजातेः ।
सर्वेऽप्यमी त्वदनुजा मदनुग्रहेण
जीवन्त्वमुं प्रमदवानवदत्स दिव्यः ॥ 104

तीरात्तेषु समुत्थितेषु सहसा सुप्तप्रबुद्धेष्विव
प्रीतं विस्मयिनं च पुत्रमवदद्भूयोऽपि धर्मस्तदा ।
इष्टं रूपमयत्नमेव दधतो भूम्ना प्रसादस्य मे
भूमौ कश्चिदपि त्रयोदशमिदं वर्षं न जानातु वः ॥ 105

इत्युक्तवत्यरणिमाशु वितीर्य तस्मि-
न्नन्तर्हिते सवितरीव दिनावसाने ।
वैतानहव्यवहधूममिलत्तमिस्रं
पार्थास्तपोवनमवापुरवाप्तहर्षाः ॥ 106

इत्यगस्त्यपण्डितकृतौ[1] बालभारते महाकाव्ये
॥ नवमस्सर्गः ॥

1. A omits ०पण्डित

दशमस्सर्गः

पार्था मात्स्यपुरे गूढमन्त्यमब्दं निनीषवः ।
प्रस्थाप्य द्वारकां सर्वाननुगांस्तद्वनं जहुः ॥ 1

उपप्लाव्यमुपागम्य पितृकाननशाखिनि ।
निधाय शस्त्रसंभारं वेषान्तरभृतोऽविशन् ॥ 2

यति पौरोगव क्लीब सादि गोपालकाकृतीन् ।
कृष्णां च पौरा नाजानन् सैरन्ध्रीरूपधारिणीम् ॥ 3

अथ धर्मात्मजो मात्स्यमासदत्सदसि स्थितम् ।
नृपैर्युतं[1] प्रश्रयाद्यैश्शमो धर्मं गुणैरिव ॥ 4

संवीतनवकाषायो धृतदण्डकमण्डलुः ।
सन्ध्यांशुभिन्नो विद्युत्वानभ्यर्णेन्दुरिवाम्बुदः ॥ 5

तं वीक्ष्य तेजसां राशिं विराटस्सह राजभिः ।
उदस्थादासनात्तूर्णं गुरुं शक्र इवामरैः ॥ 6

स्वेनैव वत्सरस्यान्ते साफल्यं यास्यतीं यतिः ।
प्रायुङ्क्त प्रणतायाऽस्मै जनेशाय जयाशिषम् ॥ 7

भगवन्प्राकृतस्त्योऽसि किमर्थं त्वमिहागतः[2] ।
अनुयुक्तो नृपेणैवमाचचक्षे युधिष्ठिरः ॥ 8

---

1. ॰र्वृतं A. 2. मामिहागमः A.

कङ्को नाम जगत्यस्मिन्विदितो धर्मभूरहम् ।
न्यवसं वासवप्रस्थे पार्थचारित्रतोषितः ॥ 9

द्यूते परहृतस्वेन व्रतिना वनमेयुषा ।
दिक्षु सेविततीर्थेन प्राप्तं पुरमिदं मया ॥ 10

वर्षमेकं तवाभ्याशे वत्स्यामि श्रेयसे यतः ।
आसादितोदयश्लाघ्यः साधयामि ततः परम् ॥ 11

उक्तवन्तमिति प्रीतो मात्स्यस्सौहार्दनिम्नधीः[1] ।
भिक्षुमर्धासने चक्रे कुबेर इव धूर्जटिम् ॥ 12

आजगाम तदास्थानं वसानो मलिनांशुकम् ।
भिन्दन्निव पदैरुर्वीं दर्वीपाणिर्वृकोदरः ॥ 13

उपसृत्य नृपं भीमो दृष्टः कौतुकिभिर्जनैः ।
गम्भीरेण स्वरेणाह सर्वां मुखरयन् सभाम् ॥ 14

वल्लो नाम पार्थस्य गेहे रसवतीपतिः ।
आगतोऽस्मि समं तेन दीव्यन्तं त्वां मिषेविषुः ॥ 15

श्लाघयिष्यसि मत्सेवां सेवमानो नवान् रसान् ।
इत्युक्तः प्रीतिमान्भीमं सूदाध्यक्षं चकार सः ॥ 16

रुषो विवर्तमूर्वश्याः क्लीबत्वं बिभ्रदर्जुनः ।
आययौ कञ्चुकच्छन्नज्याघातौ धारयन्भुजौ ॥ 17

आगुल्फलम्बिकौशेयं निक्वणन्नूपुरद्वयम् ।
स्त्रीवेषं कुण्डलप्रेक्ष्यं वेणीबन्धोज्ज्वलं वहन् ॥ 18

1. °नीरधिः A.

कोऽयं शम्भुरिवानर्हं महौजा वेषमास्थितः ।
चिन्तयन्तमिति क्ष्मापमुपसृत्य जगाद सः ॥ 19

अहं बृहन्नला नाम नर्तकी त्वामुपस्थिता ।
मया हि सख्या कृष्णायाश्शक्रप्रस्थे पुरा स्थितम् ॥ 20

साहमन्तःपुरे राजन्नाज्ञया तव कन्यकाः ।
शिक्षयिष्यामि गान्धर्वं यदि ते मयि कौतुकम् ॥ 21

तथेत्युत्तरमाख्याय नृपः प्रीतो गुणोत्तराम् ।
तस्योत्तरकुरून् जेतुः शिष्यामादिशदुत्तराम् ॥ 22

प्रविश्य नकुलस्तावदुपधृत्य कशां शुभाम् ।
जगाद जगतीपालं सौन्दर्यहृतचेतसम् ॥ 23

दामग्रन्थिरिति ख्यातः पुरा कौन्तेयमानितः ।
आगतोऽस्मि तवाभ्याशं सेवार्थी वाजिशिक्षकः ॥ 24

रक्षार्थमस्मिन्नश्वानां स्थापिते मत्स्यभूभुजा ।
ददृशे सहदेवोऽपि गोपवेषो यथाऽच्युतः ॥ 25

प्रणम्य जातिनैच्येन व्याजहार वचो नृपम् ।
अहं तु तन्त्रपालाख्यः पार्थगोधनरक्षकः ॥ 26

अद्यारभ्य निदेशात्ते धेनवो मयि गोप्तरि ।
निरामयाश्च पुष्टाश्च भविष्यन्ति च सुव्रताः ॥ 27

इत्युक्तवन्तं वसुभिस्संभाव्य नकुलानुजम् ।
चक्रे गोपपतिं मात्स्यः प्रतीक्ष्यो हि गुणी सताम् ॥ 28

दुश्शासनबलाकृष्टां बिभ्रती वेणिमाकुलाम् ।
सुधेष्णामासदत्कृष्णा गङ्गामिव कलिन्दजा ॥ 29

तां दृष्ट्वा विस्मिता राज्ञी रूपस्येवाधिदेवताम् ।
इमां यदि नृपः पश्येत्त्यजेन्मामित्यचिन्तयत् ॥ 30

तां कृष्णा व्याहरद्राज्ञीं सैरन्ध्री मालिनीत्यहम् ।
पत्रकादिकलाभिस्त्वामाराधयितुमागता ॥ 31

पतयस्सन्ति मे पञ्च गन्धर्वा गूढचारिणः ।
तद्गुप्तां मां स्पृशेत्को वा पञ्चास्यामिव पन्नगीम् ॥ 32

ततः प्रमुदिता देवी शङ्कां निर्वास्य चेतसः ।
स्वगृहे वासयामास तामुक्तप्रबलाश्रयाम् ॥ 33

मात्स्यमक्षविनोदेन धर्मसूनुरतोषयत् ।
इतरेऽपि प्रतिदिनं स्वाधिकारैर्गुणोत्तरैः ॥ 34

कदाचित्कीचकः कृष्णां सुधेष्णासद्मनि स्थिताम् ।
दृष्ट्वा ययौ स्मरेषूणां कृतान्तस्य च लक्ष्यताम् ॥ 35

कन्दर्पोरगदष्टेन स्विद्यता रोमभेदिना ।
कम्पभाजा स्खलद्वाचा सा बभाषे हतात्मना ॥ 36

अयि का त्वं चरस्यत्र मूर्तेव गृहदेवता ।
नैव मे दृष्टपूर्वासि श्रीरिवापुण्यभागिनः ॥ 37

किं न संभावयस्यङ्गैर्भूषणार्हैर्विभूषणम् ।
अथवा सगुणा सूक्तिर्नालङ्कारमपेक्षते ॥ 38

भजस्व कृतिनं कश्चिन्नवयौवनभूषिता ।
वीरुधोऽपि न शोभन्ते विना वृक्षावलम्बनम् ॥ 39

घनोदयं समासाद्य श्लाघ्या मधुरया गिरा ।
सौधेषु विहर स्वैरं क्रीडाद्रिष्विव बर्हिणी ॥ 40

श्रुत्वा तद्वचनं तस्य सान्तःक्रोधा नृपात्मजा ।
दुरासदं परैराख्यत्तं गन्धर्वपरिग्रहम् ॥ 41

तया लुब्धगिरेवार्थी स भग्नप्रणयस्तदा ।
व्रीडितो दुःखितश्चान्ते प्रपेदे केकयात्मजाम् ॥ 42

हेतुभिर्वारितेनापि सा तेनाभ्यर्थिता मुहुः ।
सैरन्ध्रीसंगमे दूत्यं प्रत्यपद्यत दुःखिता ॥ 43

तया निर्भर्त्स्य मध्वर्थं प्रहिता दौत्यशंसिनी ।
प्रेष्यत्वं गर्हयन्ती सा कीचकस्य गृहं ययौ ॥ 44

करपल्लवलग्नेन हेमपात्रेण सा बभौ ।
स्फुरता स्वर्णपद्मेन स्वर्णदीनलिनी यथा ॥ 45

ससर्पमिव वल्मीकं सव्याघ्रमिव कन्दरम् ।
आससाद शनैस्त्रस्ता सदनं सूतजन्मनः ॥ 46

विधिनेव समुक्षिप्तस्स तल्पात्तूर्णमुत्थितः ।
प्रत्युज्जगाम पाञ्चालीं पदैर्हर्षविसृत्वरैः ॥ 47

अब्रवीच्च जगत्यस्मिन् सुकृती नास्ति मत्समः ।
सम्भावयसि यत्पद्भ्यां गृहं मे श्रीरिवाम्बुजम् ॥ 48

आरोह तल्पमास्तीर्णं वरारोहे करद्वयम् ।
मदर्थं क्लेशितौ पादौ संवाहयितुमीहते ॥ 49

सा तं प्रत्याह मद्यर्थं प्रेषिताऽस्मि सुधेष्णया ।
तदुपाहर यास्यामि नैवं मां वक्तुमर्हसि ॥ 50

कीचकस्त्ववदत्किं ते मदिरार्थमिहागमः ।
अधरामृतमत्यर्थं मां पाययितुमागता ॥ 51

ततोऽवलम्बितं तेन हस्तमाधूय सत्वरम् ।
सभां मात्स्यस्य सन्त्रस्ता दुद्राव द्रुपदात्मजा ॥ 52

अनुसृत्य स तां भीरुं हस्तेनाकृष्य पातिताम् ।
प्रजहाराङ्घ्रिणा क्रुद्धो लतां मत्त इव द्विपः ॥ 53

सा पांसुधूसरकचा वमन्ती रुधिरं बहु ।
ददृशे मेघराजीव कीचकोत्पातशंसिनी ॥ 54

भीमस्तु तत्र निर्वर्ण्य प्रियायाः केशकर्षणम् ।
कीचकारण्यदावेन क्रोधेन परिषस्वजे । 55

पश्यन्तमङ्गणे वृक्षमात्मानं च युधिष्ठिरः ।
वारयामास तं क्रुद्धं वचसा वक्रिमस्पृशा ॥ 56

अकाले सूद किमिदमेधसे तरुरुच्छ्रितः ।
न भज्यतामयं सर्वे छायामस्य वयं श्रिताः ॥ 57

दारुणाकृतिना सिद्धिः क्वाऽपि निर्वर्त्यतां त्वया ।
कर्म सर्वाविरोधेन कुर्वन्कुशलमश्नुते ॥ 58

तेन स्तम्भितसंरम्भे हिडिम्बद्विषि पार्षदी ।
द्विगुणां पूर्वमापेदे शुचं पश्चात्सभान्तरम् ॥ 59

रुदती तत्र मात्स्येन्द्रं पतीन् गन्धर्वसंज्ञितान् ।
अगर्हयत्कृतोपेक्षानपचारिणि कीचके ॥ 60

गच्छ भीरु शुचं कालाच्छमयिष्यन्ति ते प्रियाः ।
इत्थमाश्वासिता भर्त्रा यतिना भवनं ययौ ॥ 61

कीचकेन पदाक्रान्तां क्लिष्टां वेणीं च बिभ्रती ।
वैरनिर्यातने यत्नं चक्रे कृष्णोरगी यथा ॥ 62

तमसा हृदि तस्येव जगति स्थगिते निशि ।
वासवेरग्रजस्याप वासवेश्म महानसम् ॥ 63

यः प्राङ् मृगमदालेपः शिश्ये सद्मनि भूषिते[1] ।
सधूमे तत्र संसुप्तं मषीमलिनमैक्षत ॥ 64

प्रियं चन्दननिष्पेषकिणचिह्नेन पाणिना ।
बोधयन्त्याह किं निद्रां यासि दीर्घां न ते रिपुः ॥ 65

स तु प्रबुध्य प्रेयस्यां तल्पस्थायां न्यवेशयत् ।
रुषा स्तम्भितयेवान्तर्निद्रया कलुषे दृशौ ॥ 66

दीनामालिङ्ग्य तां प्राह प्राप्तासि किमिहाधुना ।
किमर्थमश्रुणा क्लिष्टं हिमेनाब्जमिवाननम् ॥ 67

तच्छ्रुत्वा वचनं कृष्णा लज्जामन्युभयाकुला[2] ।
तं प्रत्युवाच किं यूयं दुःखं जानीथ मामकम् ॥ 68

दिष्ट्या वेषान्तरं प्राप्य सुखिनां परसेवया ।
किं विक्रमेण किं कीर्त्या किं दारैः किं ह्रिया च वः ॥ 69

---

1. धूपिते A. 2. ०मन्युभराकुला A.

कौरवादप्युपेक्ष्योऽभूद्भवतामद्य कीचकः ।
यत्कचेषु विकृष्टाहं प्रहताऽस्मि पदामुना ॥ 70

नृपो निरूष्मो निर्वीर्यो मन्ये क्लीबतयार्जुनम् ।
मुग्धौ यमौ सदा मान्यौ न जानेऽद्य कथं भवान् ॥ 71

वने यद्यदभूत्कृच्छ्रं तत्तन्मे शमितं त्वया ।
इयं च ध्रियते वेणी हनिष्यसि रिपूनिति ॥ 72

क्षुद्रोऽयं ते न वध्यश्चेद्भूयः प्राप्तपराभवा ।
हतानिमानसून् वोढुं न शक्ष्याम्यप्रतिक्रियान् ॥ 73

इत्याख्याय पुनस्तस्या रुदत्या बाष्पवृष्टिभिः ।
ववृधे हृदि भीमस्य क्रोधात्मा वैद्युतोऽनलः ॥ 74

स तां स्मेरमुखोऽवादीदयं मुग्धे जरासुरात् ।
अधिकः किं त्वदामर्शी विघ्नोऽभून्मत्क्रुधो नृपः ॥ 75

तथापि पुनरार्तां त्वां नोपेक्षितुमहं क्षमः ।
श्वः प्रातरनुकूलेव वक्ष्यस्येवं तमागतम् ॥ 76

नृत्तवेश्म तमोगर्भमेको निशि समेष्यसि ।
अहमप्यागमिष्यामि गन्धर्वैरप्यलक्षिता ॥ 77

त्वयेति दत्तसंकेतमागतं तत्र हन्म्यहम्[1] ।
इत्याश्वास्य प्रमृष्टाश्रुमालिङ्ग्य विससर्ज ताम् ॥ 78

अन्येद्युस्सूतपुत्राय ससान्त्वमुपतस्थुषे ।
भीमोपदिष्टमाचष्ट सङ्केतं मुदितेव सा ॥ 79

---

1. तं निहन्म्यहम् A.

तन्निशम्य स चात्मानममंस्तातिशचीपतिम् ।
स्वदते प्रणयालापः सङ्गमादिव योषिताम् ॥ 80

भवनं प्रति यातस्य स्वं प्रसादयतो मुहुः ।
आयुषा सूतपुत्रस्य सह क्षयमगादहः ॥ 81

अग्रे कृतेन यामिन्या जगाहे तमसा जगत् ।
चोदितेन च पार्षत्या नृत्तागारं त्वकारिणा ॥ 82

तस्मिन्किरीटिनस्तल्पे शयानो निभृताकृतिः ।
मृगं कुञ्ज इव व्याघ्रः स शत्रुं प्रत्यपालयत् ॥ 83

स मुदा कामुकस्तावदेकाकी तद्गृहं गतः ।
तमोवृतमुपासर्पत्सैरन्ध्रीति वृकोदरम् ॥ 84

प्रीतस्स धृतिमान्नाम तस्य पार्श्वस्थितोऽब्रवीत् ।
अयि मानिनि धन्योऽस्मि यन्मां दासं प्रतीक्षसे ॥ 85

उत्थाय कृतिना लभ्यैरेभिः पुलकभूषणैः ।
अङ्गैरनङ्गतापार्तं मामालिङ्गितुमर्हसि ॥ 86

तूष्णीं भवसि सुभ्रु त्वं क्रुद्धा किं मे विलम्बनात् ।
अथवा हतपादस्य प्रहारः स्मृतिगोचरः ॥ 87

यद्येवं ताडय स्वैरं मां यावत्कोपविप्लवः ।
नूपुरोद्वहनक्लेशरहितेनाङ्घ्रिणाऽमुना ॥ 88

स्तम्भान्तरितया पत्न्या साकमाकर्ण्य तद्वचः ।
स्त्रीवन्मञ्जुलमाचष्ट वचनं पवनात्मजः ॥ 89

अस्मिन्प्रहर्षावसरे कुतोऽमर्षस्य सम्भवः ।
न त्वं जानासि शीलं मे गन्धर्वैर्विदितं पुरा ॥ 90

मां तु या काचन स्त्रीति न मन्येथाः स्मरातुरः ।
रंभास्पर्शसुखं यायान्मदीयोरुनिपीडनात् ॥ 91

इत्युक्तः किंञ्चिदानम्य परिरम्भणसत्वरः[1] ।
शयानेनैव भीमेन केशेषु जगृहे रिपुः ॥ 92

अयोषिदुचितं मत्वा कचग्रहमुरुव्यथम् ।
मुष्टिसन्ताडिताद्भीमान्मोचयामास कुन्तलान् ॥ 93

परबोधभयत्यक्तसंरंभवचनावुभौ ।
नियुद्धमुद्धतामर्षौ कुर्वाते भीमकीचकौ ॥ 94

निहतं क्षुण्णसर्वाङ्गं वायुरुग्णमिव द्रुमम् ।
दर्शयित्वा रिपुं पत्न्यै ययौ भीमः स्वमन्दिरम् ॥ 95

तस्या भियेव क्रोशन्त्याः श्रुत्वा सूतसुतं हतम् ।
आजग्मुरनुजास्तस्य रङ्गपालैर्निवेदिताः ॥ 96

ते दृष्ट्वा ज्यायसोऽवस्थां श्रुत्वा हेतुं च दुःखिताः ।
शिबिकायां तमारोप्य संस्कर्तुं निरयासिषुः ॥ 97

आर्येण प्रार्थिता सेयं दिवि वा भुज्यतामिति ।
कृष्णां सह शवेनैव दग्धुं निन्युस्सुसंयताम् ॥ 98

तच्चिकीर्षितमाख्याय क्रन्दन्तीं मारुतिः प्रियाम् ।
वारिगतां वशां हस्ती विक्रोशन्तीमिवारुणत्[2] ॥ 99

---

1. ०तत्परः A.　　2. वाश्रृणोत् A.

निर्गत्य सत्वरं क्रुद्धो गन्धर्वव्यपदेशवान् ।
ययौ पितृवनोद्देशं जिघांसुरुपकीचकान् ॥ 100

नदन्भयेन पार्षत्याः समुद्धृत्य पादपम् ।
भूतानां तैर्हतैः प्रीतिं चक्रे पितृवनौकसाम् ॥ 101

विद्रुतेषु प्रतिदिशं नृषु गन्धर्वशङ्किषु ।
बन्धमुक्तां प्रियां भीमो मुक्तानन्दाश्रुमब्रवीत् ॥ 102

सूतपुत्रान्हतवता शतं त्वदपकारिणः ।
निधने धार्तराष्ट्राणां योग्येव विहिता मया ॥ 103

गच्छ गेहमितो भीरु त्वां गन्धर्वभयाद्ध्रुवम् ।
नाशयित्रीमपि भ्रातन्नत्यजेन्मात्स्यगेहिनी ॥ 104

इत्थमुक्त्वा गते तस्मिन्विकस्वरमुखाम्बुजा ।
दिनलक्ष्मीर्द्वितीयेव प्रत्यावर्तत पार्षती ॥ 105

अथ शुश्राव कौरव्यः पाण्डवान्वेषिणश्चरात् ।
स्त्रीहेतोर्निशि गन्धर्वैः पञ्चभिः कीचकं हतम् ॥ 106

तां स्त्रियं पार्षतीं गूढां निश्चिकाय महीपतिः ।
तेषामन्यतमं भीमं बलिनस्तस्य भञ्जकम् ॥ 107

हते तु गोधने योद्धुं पुरान्मात्स्यस्य निर्गतान् ।
अपूर्णसंविदः शत्रून्भूयः कुर्यामरण्यगान् ॥ 108

इति संमन्त्र्य सामात्यस्त्रिगर्तपतिना कचित् ।
अहारयद्गोधनानि हरिष्यंस्त्वयमन्यतः ॥ 109

विराटस्तु हृतास्तेन श्रुत्वा गा निरगात्पुरः ।
गजताश्वीयपादातैः[1] कल्पितैरन्वितो रथी ॥ 110

निस्तीर्णसमयः पार्थश्चिकीर्षुस्सुहृदः प्रियम् ।
तस्मै शशंस स्वं भीमं यमौ च रणकोविदान् ॥ 111

प्रीतेनानुमतस्तेन सन्नद्धो रथिभिस्स तैः ।
मन्त्रोत्साहप्रभावैर्वा मूर्तैरनुगतो ययौ ॥ 112

मात्स्यः पथि सुशर्माणं रुरोध हृतगोधनम् ।
आकृष्टशरदभ्रौघं शैलसानुरिवानलम् ॥ 113

ततो मात्स्यः त्रिगर्तानां प्रावर्तत रणोत्सवः ।
शरकृत्तशिरःपातरवरुद्धानकध्वनिः ॥ 114

बलानां गैरिकाभेन रजसेव विसर्पता ।
आलोहितातपो भानुरपराब्धिमगाहत ॥ 115

कालस्य कायकान्त्येव संग्रामभुवमेयुषः ।
छायया शस्त्रधाराणां द्विगुणं ववृधे तमः ॥ 116

चत्वारश्शरनिकरैः कुरुप्रवीरा
स्त्रैगर्तीं किमपि वरूथिनीममृन्दन् ।
दिक्पालद्विपपतयो रदप्रकाण्डैः
गङ्गाया इव सरितस्तटीमुदग्राम् ॥ 117

प्रसभं हृतं प्रकटयन्कृतज्ञता-
मनुजेन मात्स्यमहितादमोचयत् ।

---

1. सरथाश्वीय० A.

अमुना गृहीतमथ तेन वा रथात्
सुहृदस्ततः प्रिययशाः पृथासुतः ॥ 118

हित्वा सुशर्मणि यशस्सह गोधनेन
ह्रीते गते निहतशेषबलानुगोऽयात् ।
चन्द्रातपक्षपितसैन्यसमीकखेदां
तां यामिनीमवसदध्वनि मात्स्यराजः ॥ 119

इत्यगस्त्यपण्डितकृतौ[1] बालभारते महाकाव्ये दशमस्सर्गः ।

1. A omits ०पण्डित

अथैकादशस्सर्गः

अपरेद्युरुपेत्य वल्लवो वरयोषिज्जनमध्यवर्तिने ।
निजगाद विराटसूनवे कुरुराजेन हृतं गवां कुलम् ॥ 1

स तु सत्वरमाह सारथिं यदि लभ्येत मृधे विरोधिनः ।
विमथिष्यति मे भुजः कृती विजयः प्रागिव खाण्डवौकसः ॥ 2

सुतया द्रुपदस्य चोदिता सदसि भ्रातरमुत्तराऽवदत् ।
मम शंसति मालिनी सखी रथचर्यानिपुणां बृहन्नलाम् ॥ 3

स निशम्य वचस्तदद्भुतं सुतमानाय्य तया मरुत्वतः ।
अयि कौरवरोधकांक्षिणः कुरु मे सारथिकृत्यमित्यशात् ॥ 4

प्रकटस्तव संगरक्षितौ विजयः स्यादिति सस्मितं ब्रुवन् ।
अनभिज्ञ इवाग्रहीदबात्स्कवचं शक्रसुतस्तदर्पितम् ॥ 5

जहसुर्वलदङ्गयष्टय स्तमुदीक्ष्याकुलकुण्डला स्त्रियः ।
वदनैर्नवनीलमुद्रिका भ्रमरीचारुकराम्बुजावृतैः ॥ 6

अथ[1] चोदितधुर्यमास्थितो रथमामोचितवर्मणाऽमुना ।
नगरान्निरगच्छदुत्तरः प्रतिगृह्णंस्सुदृशां जयाशिषः ॥ 7

रथवेगजितो भयादिव प्रतिकूलत्वमपास्य मारुतः ।
हरिसूनुमसेवताहृतस्मितलीलानवपुष्पसौरभः ॥ 8

---

1. इति B.

कुरुमात्स्यकुमारयोस्तयोरहितानीकमदृश्यताग्रतः[1] ।
रजसा परिपाण्डुनावृतं हिमसच्छादितकाननोपमम् ॥ 9

तदुदीक्ष्य पयोधिसन्निभं सितवाहेन तितीर्षुणा दृशौ ।
बहुशः किल दृष्टसारयोर्निदधाते भुजयानपात्रयोः ॥ 10

तडिदुज्ज्वलहेतिमुत्तरः कुरुराजध्वजिनीं विलोकयन् ।
प्रिययेव भियासकम्पया परिरेभे धृतधर्मपाथसा ॥ 11

धृतिमस्य मनस्तदा जहौ धनुरालम्बितवेपथुः करः ।
रसनासरसत्वमाकुलस्त्वरथं सोऽपि पलायनोद्यतः ॥ 12

रभसेन विभूषणैश्च्युतैर्गुणजालैरिव भीरुरुज्झितः ।
प्रपलायत दूरमुद्वहन् श्वसितं भूरि भिया श्रमेण च ॥ 13

अमुमाशु विलोकितः परैरनुदुद्राव जिघृक्षुरर्जुनः ।
जयकुञ्जरचारुचङ्क्रमो जवशिञ्जानमनोज्ञभूषणः ॥ 14

तमशङ्कत कौरवीचमू रपि गुप्तं गमनेन फल्गुनम् ।
प्रथितं भुवि वस्तुगूढमप्यधिगम्येत गुणेन केनचित् ॥ 15

स धृतस्तमुवाच विस्फुरन् बहु[2] दास्यामि धनं विमुञ्च माम् ।
कुरवो निखिला हरन्तु गाः प्रबलैर्योद्धुमहं न तैरलम् ॥ 16

इह मृत्युमुखाच्च्युतस्य मे यतते मातरमीक्षितुं मनः ।
नियतं रणभीरुरक्षितस्सुकृतं भूरिजनस्य जायते ॥ 17

इति वाचिनमेनमब्रवीत्प्रहसन्सानुनयं धनञ्जयः ।
अयि वीर कृतं भयेन ते विनिवृत्यारिषु तन्निधीयताम् ॥ 18

---

1. ०अपश्यत० A.   2. अयि A.

कृततादृशवीरभाषितं सदसि त्वामधुना पलायितम् ।
प्रहसिष्यति कामिनीजनो निधनं ते रिपुभिर्वरं ततः ॥ 19

अलमस्मि न तां निरीक्षितुं कुरुवीरप्रवरांशुकार्थिनीम् ।
भज सारथितां करोम्यरीन् सह गोभिस्तृणचर्वणैषिणः ॥ 20

अनुनीतमभीक्ष्णमेष तं रथमारोप्य विधाय सारथिम् ।
प्रययौ पितृकाननद्रुमं स्थितिमातन्वत यत्र हेतयः ॥ 21

स शमीमधिरोपितोऽमुना चकितश्शस्त्रभरान्महौजसः ।
परिगृह्य धनुर्महेषुधी मकुटं शङ्खमतोऽवतीर्णवान् ॥ 22

दधती विबुधायुधोपमा मयि केषामियमस्त्रसंहतिः ।
इति पृच्छति मात्स्यनन्दने कथयामास यथार्थमर्जुनः ॥ 23

इदमायुधजातमात्मनां विटपिन्यत्र निधाय पाण्डवाः ।
निभृताः पितुरन्तिके तव द्विषदज्ञातनिवासमासते ॥ 24

मम विद्धि किरीटिनोऽग्रजौ यतिसूदौ हयधेनुपालकौ ।
अनुजौ द्रुपदात्मजां सरवे तव मातुर्नवशिल्पकारिकाम्[1] ॥ 25

किणलक्ष्म परीक्ष्य हस्तयो मुदितः पार्थमवोचदुत्तरः ।
अपि शक्रशतान्न मे भयं यदसि त्वं शरणं महाभुजः ॥ 26

विजयस्तु विसृज्य षण्डतां धनुरादत्त किरीटमण्डनः ।
मकुटाहतिलग्नमीशितु र्दधदिन्दोरिव धाम चामरम् ॥ 27

समदृश्यत सज्जतां गतो गुरुविस्फारयुतश्च कार्मुकः ।
अमुमाहवबन्धुमागतं प्रणतः स्वागतमाचरन्निव ॥ 28

---

1. ०कारिणीम् A.

परिफुल्लकपोलमण्डलं मुखमुत्पक्ष्मविलोचनं वहन् ।
अलिकेन सितच्छदायितं जलजं पूरयति स्म फल्गुनः ॥ 29

क्षुभिताऽजनि कौरवीचमूर्ध्वनिना तस्य गभीरतास्पृशा ।
प्रलयोदधिसत्त्वसंहतिर्गलघोषेण यथादिपोत्रिणः ॥ 30

वदति स्म गुरुर्निशम्य तौ निनदौ गाण्डिवदेवदत्तयोः ।
ध्रुवमर्जुन एव दृश्यते कुरवस्सन्तु धृतायुधाः पुरः ॥ 31

परिवर्तकृतान्तभीषणं हरशक्राधिगतास्त्रसम्पदम् ।
इह योत्स्यति यः किरीटिनं सुभटोऽस्मासु स एव सम्मतः ॥ 32

कुपितोऽङ्गपतिर्जगाद तं किमयं शत्रुरतिप्रशस्यते ।
अमुनैव हि योद्धुमागता वयमेते न तु मात्स्यभूभुजा ॥ 33

इषुरेष शिरः किरीटिनो मिषतां वस्सहसा हरिष्यति ।
अयमेव महीमशात्रवीं भुजभूम्ना भजतां कुरूद्वहः ॥ 34

कुपितस्तमुवाच गौतमः किमिदं कर्ण वृथा विकत्थसे ।
तव तस्य च वेत्ति विक्रमं ननु गन्धर्वरणे सुयोधनः ॥ 35

कुरुभूभृदुवाच वीक्षितो विजयोऽस्माभिरपूर्णवत्सरः ।
पुनरेष वनं प्रतिष्ठितां कृतकृत्योऽस्मि कृतं रणेन वः ॥ 36

वदति स्म ततो[1] सरित्सुतो नृप तेषां खलु शास्त्रनिश्चयात् ।
कृतिनां समयोऽधिको ययावुदयेदेष किमन्यथा सुधीः ॥ 37

वितरिष्यसि पाण्डुसूनवे चरितार्थाय यथांशमुर्वराम् ।
स यशोनिधिरन्यथापि तां न विमुञ्चेदधिविक्रमानुजः ॥ 38

---

1. सतां A.

प्रहसन्नवदत्सुयोधनः परिपूर्णस्समयोऽस्तु वा न वा ।
भुवि गोष्पदमात्रमप्यहं वितरिष्यामि न धर्मसूनवे ॥ 39

अथ पार्थरथः पुरोदधच्चटुलां केतनयष्टितर्जनीम् ।
द्रुतमभ्यपतद्द्विषच्चमूं निजनेमिध्वनिनेव भर्त्सयन् ॥ 40

विजयः प्रसृतेन शङ्खतो निनदेन क्षुभिता निवर्त्य गाः ।
गुरुभीष्मपुरस्सरान्कुरून्प्रतिजग्राह पृषत्कवृष्टिभिः ॥ 41

सभयं सुरसिद्धचारणैर्दिवि दृष्टाः प्रविसारि तेजसः ।
रथिषु न्यपतन्महेषवः प्रलयोल्का इव शैलमूर्धसु ॥ 42

प्रसृता रणरेणुरातपं दिवि तां बाणगणो धनुष्मताम् ।
अरुधत्प्रतिलोमपातिनं तमसा शक्रसुतेषु संहतिः ॥ 43

स्खलदद्रिनिभेषु हस्तिषु प्रत[द्व]ीरभुजोर्मिसङ्कुलम् ।
कटपूतनमज्जनोचितं प्रससार क्षतजापगाशतम् ॥ 44

वरणे विबुधत्वमेयुषां सुभटानामपि विस्मृतादरम् ।
अतिराघवशौर्यमाहवे सुरगाणिक्यमपश्यदर्जुनम् ॥ 45

प्रहतोऽस्य शरैः पलायितो रविसूनुर्हतसारथिः कृपः ।
दलितध्वजकार्मुको गुरुस्ससुतश्शान्तनवश्च मूर्च्छितः ॥ 46

चिरनिर्मितजन्यविह्वलं विकलच्छत्रमुदीक्ष्य कौरवम् ।
अभियात्सु पुनर्विरोधिषु व्यमुचत्स्वापनमस्त्रमर्जुनः ॥ 47

क्षतिनिद्रितपत्तिभिस्तदा तुरगस्कन्धशयानसादिभिः ।
गजसुप्तनिषादिभिर्बलैरजनि स्यन्दनसंविशन्नृपैः ॥ 48

नृपदक्कमलैर्निमीलितैः क्षितिरेणुच्छुरिताग्रपक्ष्मभिः ।
समभाव्यत पाकशासनेः शशिनः कीर्तिमयस्य जृम्भणम् ॥ 49

श्लथमुष्टिपरिच्युतायुधानवशान्मीलितचक्षुषो भटान् ।
श्वसितेन विवेद जीवता निहता इत्युपसृत्य जम्बुकः ॥ 50

रणसीम्नि ददर्श नारदो विजयं सुप्तनृपान्तरस्थितम् ।
स्वमूर्च्छितहस्तिमध्यगं मृगराजं विपिनक्षिताविव ॥ 51

अमलानि महार्हतां गतान्यतिचित्राणि चिरं धृतानि च ।
द्विषतां सिचयान्यहारयत्स्वयशांसीव विराटसूनुना ॥ 52

निजसूतगृहीतवाससो नृपतीन्वीक्ष्य ननन्द वासविः ।
अरुणापहृतच्छवीनुडून्दिवसारम्भ इवोष्णदीधितिः ॥ 53

वियदन्तविशृङ्खलक्रमं जयशङ्खध्वनिमस्य धन्विनः ।
श्रुतिशूलमशृण्वतामभूत्स्वपनं तत्कुशलाय भूभुजाम् ॥ 54

अथ गन्तुमना जयावहं उपसंहृत्य[1] तदस्त्रमर्जुनः ।
इषुभिः प्रणनाम तद्विदं चरणान्तः प्रहितैः पितामहम् ॥ 55

प्रतिबुध्य सलज्जमुत्थितो विजयं द्रष्टुमपारयन्पुनः ।
हतशेषमवाङ्मुखं ह्रिया बलमादाय जगाम कौरवः ॥ 56

पुनराहितकार्मुकस्तरौ श्रितपोटाकृतिरिन्द्रनन्दनः ।
रथिना सह मात्स्यसूनुना धृतरश्मिः पुरसंमुखोऽभवत् ॥ 57

विजयी गृहमागतो नृपः श्रुतवान्गोपमुखात्सुतोदयम् ।
प्रजहर्ष सतां हि योगतः सुजनो याति पुनः पुनश्शुभम् ॥ 58

1. प्रति० A.

कृतिनां प्रथमो धनञ्जयः पथि भूमिञ्जयमित्थमब्रवीत् ।
स्वजनाय निवेद्यतामियं विजयस्स्वेन समार्जितस्त्वया ॥ 59

त्रपया विधुरोऽसि चेदिमं वद पित्रे सुरपुत्रनिर्मितम् ।
कथयिष्यसि मत्कृतं पुन र्नृपतौ श्वः प्रकटीकृतात्मनि ॥ 60

प्रतिपद्य तथेति तद्वचो नवधूपच्छुरितध्वजांशुकम् ।
पुरमाप पुरस्कृतोत्तरां ध्वजिनीं प्रत्युदितां समानयन् ॥ 61

विजयस्तु सखीजनैस्स्तुतः कुरुवीरांशुकदानतोषितैः ।
नयति स रथं नृपालयं प्रविकीर्णप्रसवेन वर्त्मना ॥ 62

अवरुह्य रथान्नृपात्मजः प्रणमत्कञ्चुकिवर्गसेवितः ।
अवरोधनसद्मनि स्थितं पितरं प्रीतमना ननाम सः ॥ 63

शकलीकृतवर्मनिस्सृतक्षतजज्ञेयशरव्रणाचितम् ।
सदयं परिषस्वजे सुतं दृढमालिङ्गितुमुत्सुकोऽपि सः ॥ 64

तमुपान्तगते सविस्मयं यतिनि न्यस्तदृशं नृपोऽवदत् ।
अयि वत्स[1] पृथेव जिष्णुना भवता सूतसुता प्रवीरसूः ॥ 65

वद वीर कथं तवाहवो गुरुमुख्यैरजनिष्ट कौरवैः ।
न हि जातु चरित्रमद्भुतं श्रुतमप्यातनुते वितृष्णताम् ॥ 66

स तु सस्मितमाह लज्जितो नृप जय्या भुवि कस्य कौरवः ।
चकिते मयि कश्चिदागत स्सुरसूनुः प्रबलान्व्यजेष्ट तान् ॥ 67

अचिरान्मम साध्यकारिणं कृतिनं द्रक्ष्यसि तं कृपानिधिम् ।
बहुना किमियं बृहन्नला ननुसर्वस्य शुभस्य कारणम् ॥ 68

---

1. वीर A.

इति वादिनमात्मजं नृपो बहु सत्कृत्य सुतं च वज्रिणः ।
मुदितस्स्वममंस्त पुत्रिणामखिलानामपि मूर्धनि स्थितम् ॥ 69

अपरेद्युरमी पृथासुता धृतदिव्यांशुकभूषणस्रजः ।
दिवमर्ककरा इव प्रगे विविशुर्मात्स्यसभां महौजसः ॥ 70

इति लंघितदुर्दशांश्च तान्मुदिता शोभयति स्म पार्षती ।
च्युतनैशतुषारविप्लवान्दिवसश्रीरिव पङ्कजाकरान् ॥ 71

अधिकं बभुरासनेषु ते निवसन्तो भुजदीप्तहेतयः ।
मलयाद्रितटेषु चन्दना विटपालीनभुजङ्गमा इव ॥ 72

नृपतिस्ससुतो गतस्सभां कृतिनस्तानवलोक्य विस्मितः ।
अवदत्क इमे ममासनान्यधितिष्ठन्ति विशङ्कचेतसः ॥ 73

यतिवेषभृता तवस्थितं सविधेयेन स एव धर्मजः ।
चतुरम्बुधिमध्यवर्तिनश्चरणावस्य नृपास्सिषेविरे ॥ 74

अनिलस्य सुतोऽयमूर्जितो भवता सूदपतिर्व्यधायि यः ।
अवतंसति यक्षसुभ्रुवां नवसौगन्धिकगन्धियद्यशः ॥ 75

इति वादिनमीषदुद्धतं स्मितवान्मात्स्यमवोचदर्जुनः ।
मरुतामपि विष्टराण्यमी ध्रुवमर्हन्ति न तावकं पुनः ॥ 76

अभिजातगुणाविमौ यमौ स्मरवाचस्पतिसन्निभावुभौ ।
तनयौ नवयौवनोद्धतौ[1] तुरगाणां च गवां च रक्षकौ ॥ 77

द्रुपदस्य सुतेयमुज्ज्वला निहिता या स्वगृहे सुदेष्णया ।
निहताः प्रबलेन यत्कृते निशि भीमेन शतं च कीचकाः ॥ 78

---

1. ०दयौ A.

इति वादिनि शुभ्रवाजिनि क्षितिपं व्याहरति स्म मारुतिः ।
अयमिन्द्रसुतो धनुष्मतां वशिनां च प्रथमो जगत्त्रये ॥ 79

बहुशोऽस्य परीक्ष्य विक्रमं भजतस्संयति कान्दिशीकताम् ।
स सुरस्य हरेर्ध्रुवं यशो मलिनं खाण्डववह्निधूम्यया ॥ 80

पुरवैरिणि यस्य सन्ततं चरितश्लाघनकम्प्रमूर्धनि ।
स्मृतनिर्दयगाण्डिवाहतिश्चकितेवाभ्रसरित्प्रकंपते ॥ 81

युधि नर्तयति स्म यो धनुर्ध्वनयन्दैत्यकबन्धसंहतिम् ।
तव वेश्मनि नर्तयंस्त्रियः स्थितवानेष मृदङ्गवादकः ॥ 82

विरताविति मारुतेर्गिरं पितरं व्याहरदुत्तरो वचः ।
युधि देवसुतस्स एष मां सुकृती मोचितवान्भयादिति ॥ 83

स तु मात्स्यपतिर्यथोचितं मदकार्षीन्मुदितः पृथासुतान् ।
अदिशद्विजयाय चोत्तरां वशिनेयं जगृषे स्नुषामुना ॥ 84

अथ दूतनिवेदितोदयांस्तान्हरिरागत्य कृती स भागिनेयः ।
वसुवृष्टिभिराततान पूर्णान् स्तनयित्नुर्नभसि ह्रदानिवाद्भिः ॥ 85

द्रुपदमगधकेकयाधिपप्रभृतिषु संमिलितेषु बन्धुषु ।
दुहितरमभिमन्यवे ददौ महितगुणेऽहनि मात्स्यभूपतिः ॥ 86

धौम्येन तस्य मिथुनस्य समागतेन
निर्वर्तिते परिणये विधिवत्प्रहृष्टाः
साकं मुकुन्दमुखबन्धुजनेन पार्था
मात्स्यस्य सद्मनि सुखं न्यवसन्प्रतीताः ॥ 87

॥ इत्यगस्त्यपण्डितकृतौ[1] बालभारते महाकाव्ये एकादशस्सर्गः ॥

---

1. A omits पण्डित.

अथ द्वादशस्सर्गः

धर्मात्मजो बन्धुतया समेत
स्सुयोधनाल्लोभ्यविधेयबुद्धेः ।
हर्तुं भुवं स्वामथ विक्रमेण
वैरोचनेर्विष्णुरिवोदयुङ्क्त ॥ 1

प्रोत्सारिता दूतघनै र्भ्रमद्भिः
प्रत्याशमुद्गीर्णनिदेशतोयैः ।
उच्चेलुरुर्वीपतयस्तमाप्तुं
सरित्प्रवाहा इव वारिराशिम् ॥ 2

आपृच्छ्य पार्थोनतिहृष्टचेताः
प्रत्यागमिष्यन्पुनरम्बुजाक्षः ।
पुरीं निजां मात्स्यपुराद्यासी
त्पूषेव पूर्वाचलतः प्रतीचीम् ॥ 3

पार्थस्य विज्ञाय चरैः प्रवृत्तिं
विसृज्य राजन्यगणायदूतान् ।
अर्थी स्वयं द्वारवतीमगच्छ
त्सुयोधनस्सोऽपि सुतो मघोनः ॥ 4

प्रणम्यमानो धृतराष्ट्रसूनु
र्दौवारिकैर्वासगृहं प्रविष्टः ।
तल्पे शुभे दुग्धपयोधिकल्पे
शयानमालोकत शार्ङ्गपाणिम् ॥ 5

तस्मिञ्छिरोभागनिवेशितेऽस्य
भद्रासने मानधने निषण्णे ।
प्रविश्य पार्थो निभृतः प्रहृष्य
न्पादान्तिके शिष्य इवावतस्थे ॥ 6

प्रबुध्य शौरिः पुरतः स्थितेऽस्मि
न्निवेश्य निद्रालसपक्ष्मचक्षुः ।
वलन्मुखेनांसविवर्तितेन
कौरव्यमालोकयदासनस्थम् ॥ 7

श्रुत्वा तयोरागमनस्य हेतुं
कार्यं समं कर्तुमियेष शौरिः ।
भर्तुः कुरूणां प्रथमागतस्य
दृष्टस्य च प्राक् पुरुहूतसूनोः ॥ 8

नारायणाख्यान्दशकोटिसङ्ख्या
न्योधानशस्त्रं स्वमयोद्धृभावम् ।
विधाय भागौ वरणक्रियाया
मचोदयत्तावरविन्दनाभः ॥ 9

पुत्रो मघोनस्सुधियां पुरोगो
वव्रे सरोजाक्षमशस्त्रपाणिम् ।
अवाप्य गोपानपरस्तु सिद्धिं
स्वस्यैव मत्वा निरियाय मूढः ॥ 10

लब्ध्वा सहायं प्रथितप्रभावं
हृष्टे गतेऽस्मिन् सहगोपसैन्यैः ।
पृतो विशस्तः किमहं त्वयेति
कृतस्मितः पार्थमुवाच कृष्णः ॥ 11

बद्धाञ्जलिश्शौरिमसौ[1] बभाषे
सान्निध्यमात्रेण तवाहमेकः ।
अमन्दशस्त्रार्चिरमित्रसेनां
धक्ष्यामि वन्यां मरुता यथाग्निः ॥ 12

ततस्स तेनार्थितमन्वमंस्त
सारथ्यमीशो जगतां त्रयाणाम् ।
समाश्रितानामवनाय कर्म
नीचैरपि स्वीक्रियते महद्भिः ॥ 13

प्रीतस्स तस्यां पुरि वासराणि
द्वित्राणि नीत्वा सह माधवेन ।
लिप्सोर्निजां भूमिमजातशत्रो
र्ययौ सकाशं विघ्निनेव यत्नः ॥ 14

अक्षौहिणीनां महता भरेण[2]
क्षोणीमशेषामपि कम्पयन्तः ।
युयुत्सवः क्ष्मापतयोऽध्यवात्सु
र्विराटकौरव्यपुरोपकण्ठान् ॥ 15

कौन्तेयपार्श्वं महता बलेन
गच्छन्प्रहृष्टः पथि सत्क्रियाभिः ।
साह्यं प्रतिश्रुत्य सुयोधनाय
मद्राधिपो मात्स्यपुरीमयासीत् ॥ 16

1. ०चैनं० B. 2. बलेन A.

स तत्र पार्थं श्रुतमार्गवृत्तं
भूत्वा नियन्ता तनयस्य पूष्णः ।
तेजो निहन्यामिति भाषितेन
सन्तोष्य कौरव्यसकाशमागात् ॥ 17

पार्थोऽयमं सञ्जयतोऽवगम्य[1]
सन्धित्सतो बन्धुजनस्य वाचः ।
यथा न भेजे धृतराष्ट्रसूनु
स्तदाधिजज्ञे बहुदोषलिङ्गैः ॥ 18

अल्पैरहोभिश्शरणागतायाः
भारं हरिर्मे लघयिष्यतीति ।
भुजङ्गभर्तुः फणरङ्गभूमौ
हर्षान्ननर्तेव मही सकम्पा ॥ 19

आयोधनार्थं मिलतां नृपाणा
मुदञ्चिता सैन्यपरागराजिः ।
दिवो निवृत्तेव जवेन भूयः
पपात दिग्भित्तिषु पांसुवृष्टिः ॥ 20

आगामिनीनामसृगापगाना
मालिङ्गनायेव महार्णवौघाः ।
विघूर्णिताः क्षोणितलेऽतिमात्रं
प्रसारयन्ति स्म तरङ्गहस्तान् ॥ 21

नभस्स्थलाच्छोणितबिन्दुराजि
रारञ्जयन्तीगजवाजियोधान् ।
परिभ्रमन्त्याशिशत्रिकान्तरेषु
पपात मृत्योरिव पादलाक्षा ॥ 22

1. निशम्य B.

पुरं कुरूणामभितोऽनुवेलं
परिभ्रमत्कङ्कसृगालसङ्घः ।
मिथश्शशंसाऽऽरसितच्छलेन
रणक्षितौ भाविनृमांससेवाम् ॥ 23

प्रसाधिकाभिः परिकर्मणोऽन्ते
धृतान्पुरस्तात्कुरुवीरवर्याः ।
आदर्शबिम्बानमलान्निजाभि
श्शून्यानपश्यन्प्रतियातनाभिः ॥ 24

वचांसि हाहेत्यशरीरसंस्था
न्याकर्णयामास जनोऽनुगेहम् ।
पिशाचिकानां पिशितोत्सुकानां
छाया अपि प्रैक्षत तालदीर्घाः ॥ 25

इत्थं तदुत्पातशतोपसृष्टं
पुरं कुरूणां पुरुषः पुराणः ।
अभ्यापतत्पाण्डवकौरवाणां
शान्तिं विधातुं प्रतिपन्नदौत्यः ॥ 26

तमागतं केतुपरिष्कृतायाः
पुरो विनिर्गत्य विचित्रयानाः ।
सर्वेऽपि दुर्योधनमन्तरेण
प्रत्युद्ययुश्शन्तनुसूनुमुख्याः ॥ 27

यथाक्रमं सत्क्रियया प्रहृष्ट[1]
स्सतैः परीतो नगरं विवेश ।

---

1. प्रहृष्टैः B.

राज्ञां निवेशैर्मुखरोपकण्टं
वसुन्धराचक्रमिवार्णवोघैः ॥ 28

दिदृक्षवे पौरवधूजनाय
मुरारिमुख्यानुमिवापयान्तम् ।
पुरे पटीयान्प्रतिसौधगर्भं
बभ्राम माङ्गल्यमृदङ्गघोषः ॥ 29

त्यक्त्वा तदा मण्डनमर्धक्लृप्तं
क्रियासु चान्यासु कृतानपेक्षाः ।
अभ्रेषु विद्युल्लतिका इवाशु
नार्यः पदं हर्म्यतलेषु चक्रुः ॥ 30

प्रसाधिकामप्रतिपादयन्ती
लाक्षारसेनारचिताङ्गरागा[1] ।
त्रिलिप्तपादा हरिचन्दनेन
विनिर्ययौ काचन संभ्रमेण ॥ 31

स्नातोत्थिता काचन दीर्धिकाया
स्तथैव यान्ती सलिलार्द्रमूर्तिः ।
प्रागेव सन्दर्शनतो मुरारेः
प्रस्वेदबिन्दुच्छुरितेव रेजे ॥ 32

काचित्प्रयान्ती पथि संभ्रमेण
विशेषकं कुंकुमकर्दमेन ।
पर्याप्तलग्नप्रतिमामुखेन्दौ
करस्थिते दर्पण एव चक्रे ॥ 33

1. ०आकलिताङ्गरागा B.

मा याहि गोपीजनचित्तचोरः
चेतस्त्वदीयं[1] स हरिष्यतीति ।
सख्यावचश्शौरिवचौघपूर्णे
नालं प्रवेष्टुं श्रवसी परस्याः ॥ 34

नितम्बिनीनामनुगामिनीनां
विघ्नं ततः कर्तुमिवेर्ष्ययान्या ।
वीथीं स्वकण्ठच्युतहारयष्टि
मुक्ताफलैश्शर्करिलां वितेने ॥ 35

मुरारये मूर्तमिवोपहर्तुं
चेतो निजं सम्भृतरागमन्या ।
करेण लीलाकमलं वहन्ती
जगामलक्ष्मीरिव जालमार्गम् ॥ 36

जगन्ति जेतुं जगतोमनोभू
रेकोनपर्याप्त इतीव मत्वा ।
प्रत्येकमेतासु परार्ध्यरूपो
जनार्दनस्तं जनयाम्बभूव ॥ 37

काचित्तदा साध्वसकम्पगात्री
प्रवातमाकन्दलतेव दृष्ट्वा ।
बिम्बं मणिस्तम्भगतं स्वकीयं
सखीति मुग्धा[2] मुहुराललम्बे ॥ 38

स्वेदाम्बुभिर्दन्तुरगात्रयष्टे
स्तत्राधिकश्वाससमीरणायाः ।

---

1. चित्तं० B. 2. मत्वा B.

कस्याश्चिदग्रे सवयोजनस्य
व्याजोऽभवत्सौधतलाधिरोहः ॥ 39

विलोकयन्ती घनकालमेनं
प्रवेपमानाङ्गुलिपल्लवाग्रा ।
रराज काचित्पुलकाञ्चिताङ्गी
सकुट्मलश्रीरिव नीपयष्टिः ॥ 40

अवाकिरन्नन्तिकमम्बुजाक्षं
क्रमेण पुष्पांजलिभिः पुरन्ध्रयः ।
नवारवेर्दीधितयो दिनादौ
बृन्दैरुडूनामिव मन्दराद्रिम् ॥ 41

क्रमादतिक्रम्य स राजमार्गं
द्वारक्षितौ स्यन्दनतोऽवतीर्णः ।
आलम्ब्य हस्तं विदुरस्य शौरि
र्विवेश हृष्टो द्रतराष्ट्रगेहम् ॥ 42

प्रत्युद्गतस्तत्र कुरूद्वहेन
भद्रासनस्थो विहितातिथेयः ।
अतोषयत्सूनृतया स वाचा
बन्धूनमर्त्यांत्सुधयेव पूर्वम् ॥ 43

ततो गतः क्षत्तुरसौ निकेतं
दृष्ट्वा पृथां पुत्रवियोगखिन्नाम् ।
आश्वासयद्द्रक्ष्यसि निर्जितारी
नल्पैरहोभिस्तनयांस्तवेति ॥ 44

कृताह्निकस्तत्र कृतार्थभाव
मासेदुषस्तल्पसमीपभाजः ।
रणैषिणां पाण्डुभुवामुदन्तं
क्षत्तुर्वदन्नेव निशामनैषीत् ॥ 45

बालातपप्रेक्ष्यतराम्बरोऽय
मानन्दिताशेषविलोचनाब्जः ।
प्राचीमिव प्रातरिनोऽम्बुजाक्षो[1]
वैचित्रवीर्यस्य सभां विवेश ॥ 46

स सर्वतोभद्रमिति प्रशस्त
मातस्थिवानासनमम्बुजाक्षः ।
निष्पन्दसभ्येक्षणलभ्यमूर्तिः
प्रज्ञादृशं भूपतिमाबभाषे ॥ 47

शमाय राजन्कुरुपाण्डवानां
समागतोऽस्मि प्रतिपन्नदौत्यः ।
सन्धत्स्व पार्थैर्निभृतैस्त्वदीया
न्निवार्य पुत्रानपथप्रवृत्तान् ॥ 48

उदग्रशौर्यैरुररीकृतैस्तैः
कैकेयपाञ्चलविराट्युक्तैः ।
एभिश्चपुत्रैर्गुरुभीष्ममान्यै
र्गुप्तात्वदिन्द्रोऽपि न किं बिभेति ॥ 49

भेदे तु जाते यदिपाण्डुपुत्रान्
हन्युस्सुतास्ते त इमान्मदोग्रान् ।

---

1. B ॰अब्जपाणिः A.

अथोभये वा विलयं व्रजेयुः
को नाम लाभो भवतस्तदा स्यात् ॥ 50

प्रणम्य पार्थाश्च भवन्तमाहु
रियन्ति वर्षाण्यनुभूतदुःखाः ।
तवाज्ञया केवलमंशभूतां
महीं पुनस्तात लभेमहीति ॥ 51

तत्संप्रति स्वीकुरुतान्प्रवीरां
स्तवोज्ज्वलस्यस्थितये कुलस्य ।
त्वदर्थमेते च नृपास्समेता
निवृत्तकृच्छ्राः प्रतियान्तु देशान् ॥ 52

नृपस्तमाभाषत किं नु कुर्या
मयं सुतो मे न वचः शृणोति ।
सान्त्वेन दाशार्ह निवर्तयैनं
कदध्वनस्सौहृदनिघ्नचेताः ॥ 53

उक्तश्च तेनैवमथासुरारि
र्विवृत्य वक्षो वलमानहारः ।
एकासनाध्यासितभानुसूना
वुपाश्रितं कौरवमाबभाषे ॥ 54

उत्पत्तिभाजश्शशिनोऽन्ववाये
भीष्मादिभिश्शासितशात्रवस्य ।
शतेन च भ्रातृभिरर्चिताङ्घ्रे
र्न ते मतिर्मुञ्च कुवर्त्मनीतिम् ॥ 55

साधं दुरन्तैस्सचिवोपदेशै
लोभं विसृज्योभयलोकशत्रुम् ।
सङ्गम्य पार्थैस्सह सौहृदेन
हतद्विषं भुङ्क्ष्व महीमशेषाम् ॥ 56

तावत्सुतं व्याहरदाम्बिकेयः
प्रसीद बद्धोऽयमिहाञ्जलिस्ते ।
मन्युज्वरस्यौषधमार्तबन्धोः
शौरेर्वचः पथ्यमिदं पिबेति ॥ 57

तमूचतुश्शान्तनवो गुरुश्च
क्षेमाय सन्धत्स्व युधिष्ठिरेण ।
चापेषु मात्स्यप्रमुखा रणाग्रे
न सायकांत्सन्दधतां नरेन्द्राः ॥ 58

चिराय योगं कुरु पाण्डवानां
निरीक्ष्य राजन्यगणस्समेतः ।
प्रमोदजं मुञ्चतु वारिनेत्रै
र्न शोणितं पार्थशरक्षताङ्गैः ॥ 59

वचांसि लोकः प्रणयोचितानि
शृणोतु तेषां भवतां च हृष्टः ।
निर्घातघोरान्कुपितस्य सङ्ख्ये
समीरपुत्रस्य न सिंहनादान् ॥ 60

आलिङ्गनायोभयसैनिकानां
मिथोऽधिकं सम्प्रसरन्तु हस्ताः ।
विलापभाजां न तदङ्गनानां
विस्रस्तबद्धा भुवि केशहस्ताः ॥ 61

जगाद शौरिं धृतराष्ट्रसूनु
द्यूते न किं त्वत्सुहृदो जितास्ते ।
गता न किं वा विपिनं हृतस्वा
वक्तुं न युक्तं तव मध्यनीतिम् ॥ 62

क्लिष्टा वनान्तेषु चिराय लब्ध्वा
वृद्धौ विराटद्रुपदौ सहायौ ।
इच्छन्ति ते सम्प्रति हन्तुमस्मा
न्किं ब्रूमहे हास्यमिदं लघीयः ॥ 63

भुवं समस्तां द्विषतो निहत्य
लप्स्यामहे तैर्निहता दिवं वा ।
पुंसां पुनः क्षत्रकुलोद्भवानां
यशस्करोऽयं विहितो हि धर्मः ॥ 64

इत्युक्तवन्तं सदसः प्रयान्तं
राधेयदुःशासनसौबलास्ते ।
अन्वय्ययुः पापमुपात्तरूपं
मूर्ता इव क्रोधमदप्रमोहाः ॥ 65

गते तु तस्मिन्नवमत्य वाच
स्त्रस्तांस्समस्तानवदन्मुकुन्दः ।
इयं कुरूणामपि भूर्यदि स्या
द्भवेदशेषेयमकौरवा भूः ॥ 66

अन्यैस्त्रिभिस्सार्धममुं निबध्य
विधीयतां राज्यमजातशत्रौ ।
पुरावमन्ता पितरं स्वमेव
न मातुलः किं निहतो मयासीत् ॥ 67

प्राङ्निग्रहादस्य दुराग्रहस्य
वंशस्सुधांशोर्भविताऽनपायः ।
निर्वासनात्कालियपन्नगस्य
कलिन्दजाया इव पूर्वमोघः ॥ 68

तावत्सभां सात्यकिरेत्य सद्य
स्सर्वांत्सदस्यानिदमाबभाषे ।
निर्वर्त्यते साधु चिराय सन्धिः
श्रीः कौरवी च स्थिरतामुपैति ॥ 69

निरुद्यमाः पाण्डुसुता मुरारौ
बद्धे भवन्तीति चिराय मूढः ।
त्रिभिस्सहान्यैर्धृतराष्ट्रसूनु
र्बन्धुं सतामिच्छति बन्धुमेनम् ॥ 70

यदूद्वहस्तेन निबध्यते चे
न्निरुध्यतेऽग्निस्सिचयाञ्चलेन ।
निस्तीर्यते दोर्युगलेन वार्धिः
पतिर्गिरीणां ध्रियते च मूर्ध्ना ॥ 71

अत्राहमेकः कुरुराजपुत्रा
नद्यैव बाहुद्रविणावलिप्तान् ।
अन्यांश्च हन्यां युधि वीरवर्या
न्यथा भवेत्पाण्डुसुतप्रतिज्ञा ॥ 72

नृपो वचस्तस्य निशम्य भीतः
क्षत्त्रा समानाय्य जगाद पुत्रम् ।
त्वया न बध्येत बलेर्निबद्धा
त्वमेव बद्धोऽसि कृतान्तपाशैः ॥ 73

अथाच्युतः कौरवमाह साध्यं
सञ्चिन्त्य संयन्तुमिहेच्छसि त्वम् ।
पश्यासहायत्वमिति ब्रुवाणः
प्रादर्शयत्संसदि विश्वरूपम् ॥ 74

घोरं वपुर्धारयतो महीय
स्सभां द्विधेवारचयंत्समस्ताम् ।
अस्याट्टहासध्वनिरष्टदिक्षु
मुमूर्छ तस्य श्रवणाच्च लोकः ॥ 75

देवो महानम्बुजभूरमर्त्याः
पार्था धृतास्त्रा यदवश्च सर्वे ।
अङ्गुष्ठमात्राद्वपुषस्तदीया
दाविर्बभूवुः प्रलयार्कभासः ॥ 76

उत्तुङ्गदोस्तम्भसहस्रभीमं
विजृम्भमाणामलदीप्तिजालम् ।
समस्तलोकाश्रयतामवाप्तं
सभान्तरे धाम तिरश्चकार ॥ 77

इतस्ततः कण्वपुरोगमाना
मुद्भिन्नरोम्णां परिषन्मुनीनाम् ।
अंसस्खलच्चीरजटाकलापा
मानन्दनृत्तोत्सवमन्वतिष्ठत् ॥ 78

पतिः कुरूणामपि लब्धचक्षुः
गूढं गिरामर्थमकर्तृकाणाम् ।
दृष्ट्वा निधिं रिक्त इव प्रहृष्ट
श्चिराय तुष्टाव पुमांसमाद्यम् ॥ 79

तस्याकृतिं वीक्ष्य निमीलयन्तो
नेत्राणि तेजोनिहतानि भूपाः ।
भूयः श्लथैर्वेपथुमद्भिरङ्गै
रपेतसंज्ञा इव पेतुरुर्व्याम् ॥ 80

त्वां वीक्ष्य धन्यो भगवत्प्रभावा
त्पश्येयमन्याननया दृशेति ।
नृपस्य वक्तुस्सह चक्षुषैव
दिव्यं त्रिधाम्ना समहारि रूपम् ॥ 81

दिष्ट्या चिरात्परिणतं रणमेव ताव
न्निर्यान्तु भूमिपतयस्सह वाहिनीभिः ।
द्रक्ष्यन्ति तत्र चरितानि पृथासुताना
मित्युक्तवान्मुररिपुर्निरगात्सभायाः ॥ 82

अथ रथवरमाश्वैस्सैन्यमुख्यैश्चतुर्भिः
दृढतरमधिरूढः क्षत्तुरालम्ब्य हस्तम् ।
अनुगतमखिलं तद्राजकं वारयित्वा
परिमितपरिवारः पार्थपार्श्वं प्रतस्थे ॥ 83

इत्यगस्त्यकृतौ बालभारते महाकाव्ये
द्वादशस्सर्गः

अथ त्रयोदशस्सर्गः

अथापरेद्युः कथिताभिजात्या
कर्णं विभेत्तुं धृतराष्ट्रजेभ्यः ।
भागीरथीतीरमवाप कुन्ती
यत्र स्थितोऽसौ नियमेन युक्तः ॥ 1

मातात्मजस्यार्कनिविष्टदृष्टेः
ध्यानावसानं प्रतिपाल्य तस्थौ ।
प्रायस्तदंशं चिरसङ्गृहीतं
पयः स्तनाभ्यां मुहुरुद्वहन्ती ॥ 2

ततो जपान्ते जननीं विलोक्य
कृती तदीयागमकारणज्ञः ।
राधाभुवं सूतसुतं स्वमुक्त्वा
ननाम गौरीमिव कार्तिकेयः ॥ 3

आनन्दजं दर्शनरोधि दृष्टे
रावर्तयन्त्यश्रुविवर्तितायाः ।
उदीरिताशीर्यदुराजपुत्री
कृताञ्जलिं पुत्रमिदं जगाद ॥ 4

माता न राधा जनको न सूतः
कौन्तेय नन्वेष रविः पिता ते ।
भ्रातॄन्भवान्पाण्डुसुतानबुध्वा
वृतशिशुत्वे धृतराष्ट्रपुत्रैः ॥ 5

ततः परं प्राप्नुहि तानमीषु
स्थातुं न युक्तं विदितात्मनस्ते ।
किमन्यपुष्टश्चिरवर्धितोऽपि
करोति वासं बलिपुष्टयूथे ॥ 6

अरीनसह्यप्रसरान्विजित्य
सिंहासनारूढमजातशत्रुः ।
त्वां राजसूयावभृथाप्लुतेन
मूर्ध्ना नमत्वञ्जलिमादधानः ॥ 7

गृहीतदेहाविव वह्निवातौ
भुवं प्रपन्नाविव पुष्पवन्तौ ।
सहोदरौ वामभिजातयोगौ
कर्णार्जुनौ नन्दतु वीक्ष्य लोकः ॥ 8

स्मित्वा ततोऽसौ जननीमवादी
दुपस्थिते वीरविनोदकाले ।
भजामि ते यद्यहमत्र पुत्रा
न्किं मां क्षितौ वक्ष्यति वीरलोकः ॥ 9

गृहीतहेमाम्बुघटेन येन
ममाङ्गराज्ये विहितेऽभिषेकः ।
राजन्यकोटीरनिवेशिताङ्घ्रे
रर्धासने यस्य सुखं न्यषीदम् ॥ 10

विश्वस्य मां यः प्रबलैरजस्र
माशैशवात्पाण्डुसुतैर्व्यरौत्सीत् ।
मद्दोःप्लवेनैव दुरुत्तरेण
जागर्त्यनीकार्णवमुत्तितीर्षुः ॥ 11

त्यजामि तं चेदनघं सखायं
त्यक्तो यशोभिश्चिरसंगृहीतैः ।
उपघ्नभूतश्च कृतघ्नताया
गर्ह्यो भविष्याम्युभयत्र लोके ॥ 12

तदब्जिनीपत्र इवाम्बुलेश
स्सक्तो न मे चेतसि ते निदेशः ।
तथापि नैवागमनं वृथा स्या
त्पार्थादृतेऽन्यांश्चतुरो न हन्याम् ॥ 13

साम्येन शौर्यस्य समीकभूमौ
स मां हनिष्यत्यथ वाऽहमेनम् ।
मातस्सुताः पञ्च तव स्युरस्मि
न्हते सकर्णा मयि वा सपार्थाः ॥ 14

इत्थं वदन्तं कुरुवीरपत्नी
सुतं सधैर्याऽच्युतमालिलिङ्ग ।
भयेन पर्याकुलितो वचस्त
त्सत्यापयामास च सत्यसन्धः ॥ 15

अनन्तरं त्वावनतिप्रहृष्टौ
निजं निकेतं प्रतिजग्मतुस्तौ ।
पुत्रं सुता भोजपतेरलब्ध्वा
मातुस्स चाशामविधाय कर्णः ॥ 16

तदागते पुण्य इव द्वितीये
दिने जयाशंसिनि पुण्यलग्ने ।
अभ्यर्च्य शस्त्राण्यखिलानि योधै
र्नृपः कुरुक्षेत्रमथ प्रतस्थे ॥ 17

व्रजत्सु शीघ्रं चलतां रथानां
निधिष्ववपां चक्ररजोभरेण ।
अक्षौहिणीस्सप्त जनः पयोधी
नन्यानमंस्त द्रुहिणोपसृष्टान् ॥ 18

बले चलत्याकुलशैलसन्धे
र्बभार भारातिशयेन भूमेः ।
निमग्नरत्नानि नितान्तमन्त
रुद्वृत्तनेत्राणि शिरांसि शेषः ॥ 19

सेनारजोभिः प्रसरद्भिरग्रे
निर्पीततोयानि सरांसि नागाः ।
पूर्णानि चक्रुर्मदवारिपूरैः
श्रेयो विधत्ते महतां हि योगः ॥ 20

सरस्वतीरोधसि तत्र तत्र
सुशीतलच्छायतमालषण्डे ।
अतीतवर्त्मानि महीपतीनां
निवेशयामास बलानि पार्थः ॥ 21

उदस्तनानातटवेश्मजाल
मुद्घोषमृद्धापणपण्यमार्गम् ।
उदाररथ्यं शिबिरं तदीयं
पुरादपि प्रेक्ष्यतरं बभूव ॥ 22

ततश्च दक्षाध्वरदेशमिन्द्रो
रुद्रैरिवैकादशभिः प्रतीतैः ।
अक्षौहिणीशैरनुगम्यमानः
पतिः कुरुक्षेत्रमगात्कुरूणाम् ॥ 23

उत्तम्भितैर्भूपनिवेशसीम्नि
स्थूलैस्तदाकीर्णमनेकवर्णैः ।
तुषारहेमाञ्जनशैलशृङ्गै-
स्तलं धरित्र्या इव वज्रभग्नैः ॥ 24

गाङ्गेयमाकर्ण्य सुयोधनेन
कृताभिषेकं पृतनाधिपत्ये ।
स्कन्दं वृषेव द्रुपदस्य पुत्रं
चकार सेनान्यमजातशत्रुः ॥ 25

आगामि संयद्भुवि बान्धवाना-
माभीलमालोकयितुं न शक्तः ।
सारस्वतान्काञ्चनतीर्थभेदां-
सिषेविषुः प्रास्थित सीरपाणिः ॥ 26

भीष्मेण भर्तुः पुरतः कुरूणा-
मर्धाधिभूरर्धरथो व्यधायि ।
सोऽपि क्रुधा सङ्गिरते स्म हेते-
रधारणं संयति तद्वधान्तम् ॥ 27

श्रुत्वा प्रतिज्ञां सुहृदो विषण्णं
सुयोधनं सिन्धुसुतो बभाषे ।
पार्थादयः प्राक् प्रबला मयोक्ता
ये वत्स योत्स्ये युधि तैस्त्वदर्थम् ॥ 28

शिखण्डिनं त्वेकमहं न हन्यां
भूत्वा पुरा स्त्री स जगाम पुंस्त्वम् ।
नेक्षे रणाग्रे न च योधयामि
स्त्रीं पूर्वमेषा खलु मत्प्रतिज्ञा ॥ 29

शिखण्डिनो वृत्तमतीव चित्रं
शुश्रूषमाणेन सुयोधनेन ।
पृष्टः कुमारस्त्रिदशापगाया
स्तत्सर्वमप्यारभताभिधातुम् ॥ 30

स्वयं वरे बाहुबलेन पूर्वं
कन्यात्रयं काशिपतेरहार्षम् ।
साल्वस्य रक्तान्तिकमापदेका
भ्रात्रा परे द्वे तु ममोपयेमे ॥ 31

अम्बा तु तेनारिहृतेत्यपास्ता
परानुरक्तेति मया च पश्चात् ।
वधाय मे बाढमनर्थहेतो
स्तप्तुं तपः प्राप वनं मुनीनाम् ॥ 32

स सन्निधिं तत्र कृती तदानीं
मुनीन्दिदृक्षुर्भृगुभूरकार्षीत् ।
क्रौञ्चच्छिदा येन सराजहंसा
चक्रे हतक्षत्रकुला च भूमिः ॥ 33

तैस्सत्कृतेन प्रबलार्तिरग्रे
ऽबला शुचो हेतुमनेन पृष्टा ।
बाष्पेण पर्याकुलितैः कथंचि
त्पदैर्यथावृत्तमशंसदस्मै ॥ 34

अलं शुचा मद्वचनेन भीष्मः
शिष्यस्य विद्यामिव मानये त्वाम् ।
साल्वोऽथ वा स्वीकुरुतां न चेत्तौ
वृत्तं न वेत्तः किमुभौ मदीयम् ॥ 35

ते नैवमुक्तेयमुवाच भूयो
न मे द्वयेऽस्मिन्नभिलाषि चेतः ।
तथा प्रसादं कुरु घातयेयं
त्वया रिपुं शौर्यनिधे यथेमम् ॥ 36

वक्ष्यामि शस्त्रं शरणागतानां
त्राणार्थमित्याचरितां प्रतिज्ञाम् ।
संस्मृत्य रामो मुनिभिः परीतः
साम्बः कुरुक्षेत्रमुपाजगाम ॥ 37

आनाय्य शिष्यैरुपतस्थिवांसं
मामर्हणान्ते मुदितश्शशास ।
विभ्रंशिता सौख्यपथस्त्वयेयं
संयोज्यतां वत्स यवीयसीति ॥ 38

इमां ग्रहिष्ये न परत्र सक्ता
मिति ब्रुवाणं सरुषाऽवदन्माम् ।
हसो न गृह्णासि न चेद्वचो मे
बाणो हरिष्यत्यधुना शिरस्ते ॥ 39

तमब्रवं क्रुद्धमुदीर्णमन्युं
न बन्धकीं सद्मनि वासयेयम् ।
न त्वां सहे धर्मविरुद्धवाच
मुन्मार्गवर्ती गुरुरप्यमान्यः ॥ 40

उद्वृत्तशासी ननु पौरवोऽहं
त्वां योधयिष्यामि गृहाण शस्त्रम् ।
न ब्रह्महत्या च न चायशो मे
मृधे हतेऽपि त्वयि योद्धरि स्यात् ॥ 41

मा भून्मदस्तावदनीकभूमि
ष्वेकेन भूपा निहता मयेति ।
तदा तु जातो यदि जाह्नवेयो
दोर्दर्परूपो दवथुः कुतस्ते ॥ 42

ततस्तु रक्तह्रदमज्जनेन
प्रायो दधानं परिपाटलत्वम् ।
अमर्षकम्पश्लथबन्धमीष
द्रुध्वा जटाभारमिषूंत्ससर्ज ॥ 43

आवामुभौ वर्मभृतौ रथस्था
वाकृष्टचापोदितबाणवर्षौ ।
सामर्षमन्योन्यमयोधयेतां
निवार्यमाणावपि जह्नुपुत्र्या ॥ 44

क्रौञ्चच्छिदो निर्जितकार्तिकेया
न्विज्ञातवीर्यान्कृतवीर्यसूनौ ।
परासिताशेषनरेन्द्रमूर्ध्नः
प्रायुङ्क्त बाणान्मयि रैणुकेयः ॥ 45

मिथश्शरैर्मर्मसु विध्यतोर्नौ
दृष्ट्वा जयं तस्य विपर्ययं च ।
अम्बा मदीया च रथोपकण्ठे
प्रहर्षशोकौ मुहुरन्वभूताम् ॥ 46

वैमानिकानां विदधन्ति भीति
मस्त्राण्यवर्षन्मयि जामदग्न्यः ।
तैरेव तस्मादहमप्यवाप्तै
रवारयं तान्यनिवार्यसत्त्वः ॥ 47

समे यदस्त्रं वसुभिर्वितीर्णं
प्रस्वापनं तन्मयि सन्दधाने ।
रामो गुरुस्ते न विमाननीय
इत्यम्बरे चेरुरमर्त्यवाचः ॥ 48

तथेति संहृत्य तदस्त्रवर्यं
रथावतीर्णो रचितोपयानः ।
जन्यान्निवृत्तं जमदग्निसूनुं
प्राणंमिषं प्राणहरं नृपाणाम् ॥ 49

स मामवादीन्मुदितो मुनीन्द्र
स्त्वया जितोऽस्मि प्रथितास्त्रभामा ।
जगत्त्रये कोऽपि न ते समानः
शिष्यप्रकर्षो यशसे गुरूणाम् ॥ 50

अम्बामथाहूय नदीसुतोऽयं
मया न जय्यो महनीयसत्त्वः ।
व्रजे हितं देशमिति ब्रुवाण
स्तिरोदधे तिग्मकरप्रकाशः ॥ 51

पुरं प्रयाते मयि सा पुनर्मां
जिघांसती हैमवतीवनान्ते ।
आगधयामास तपोभिरीशं
स्त्रियो विशेषेण हि बद्धवैराः ॥ 52

आसेदिवांसं कृतसन्निधानं
पतिं पशूनां कृतिनां निधानम् ।
स्वेनैव हन्तुं विजयोत्थितं मां
वव्रे वरं काशिनृपस्य पुत्री ॥ 53

770 — 22

स्मित्वा स तामाह विसृज्य देहं
पाञ्चालभर्तुर्दुहितुस्त्वमेहि ।
कालेन पुंस्त्वं प्रतिपद्य भद्रे
भीष्मस्य मृत्युर्भवितासि युद्धे ॥ 54

इत्थं वरं दातरि कालहन्त
र्यन्तर्हिते संभृतरोषवह्निः ।
प्राविक्षदुद्दीप्तमसौ कृशानुं
ज्योत्स्नामहस्सान्ध्यमिव प्रभाते ॥ 55

मया जितः प्राग्द्रुपदोऽन्तरेऽसि
न्पुत्रार्थमानर्च पुरामरातिम् ।
स चाविरासीद्वरदानशौण्डः
कृता भवे त्कामदुघा हि भक्तिः ॥ 56

जगाद चैनं नृपते सुता ते
सम्पत्स्यते यास्यति साऽथपुंस्त्वम् ।
यथेच्छसि त्वं स तथा निहन्ता
भीष्मस्य जायेत वधे निमित्तम् ॥ 57

इत्थं वरं लब्धवतोऽस्य शम्भो
र्नेहसाल्पेन नृपस्य देवी ।
शिखण्डिनीं नाम सुतामसूत
सिद्धिं क्रिया सम्यगनुष्ठितेव ॥ 58

स्त्रीत्वं प्रयत्नेन नृपस्स तस्याः
प्राच्छादयत्प्राज्ञ इवाभिमानम् ।
हृष्टः शिखण्डीति कृताभिधायाः
पुंवत्क्रियाः कारयति स्म सर्वाः ॥ 59

प्रतिष्ठमात्तं सुलभस्तनेन
        वपुस्तदीयं वयसा विलोक्य
तां शिक्षिताशेषकलां स धीमा
        नुद्वाहयामास दशार्णकन्याम् ॥ 60

तां भर्तृभूतां विजने नवोढां
        स्त्रियं विदित्वा वदति स्म धात्र्यै ।
विज्ञाय तस्याश्च दशार्णनाथः
        प्रतारितः पार्षतमभ्ययासीत् ॥ 61

श्रुत्वाऽभियान्तं तमुदग्रसैन्यं
        पाञ्चालभर्ता बलवद्भयार्तः ।
अभ्यर्च्य पुण्यायतनेषु देवं
        वरं वितीर्णं सफलं ययाचे ॥ 62

त्रासं विदित्वा स्वनिमित्तमस्य
        शिखण्डिनी नक्तमुदूढदुःखा ।
एकाकिनी काननमेत्य कण्ठा
        त्खड्गेन शीर्षं यतते स्म हन्तुम् ॥ 63

यदृच्छयागत्य ततो दयालु
        स्तथोद्यतां तां विनिवार्य यक्षः
श्रुतप्रवृत्तिर्निजगाद दत्त्वा
        स्त्रीत्वं तदेवं मम धत्स्व पुंस्त्वम् ॥ 64

उपप्लवेऽस्मिन्महति प्रशान्ते
        ततो गतेऽन्हेहसि मासमात्ते ।
आयास्यसि त्वं भवनं मदीयं
        स्वचिह्नयोर्नौ परिवर्तनाय ॥ 65

इत्थं मिथस्तौ समयं विधाय
स्वलक्षणव्यत्ययमादधाते ।
हृष्टौ गृहांश्च प्रतिजग्मतुस्तौ
सतामयत्नः खलु भद्रलाभः ॥ 66

शिखण्डिनोक्तं स निशम्य वृत्तं
शिवं प्रशंसन्नृपतिः प्रहृष्टः ।
पुरोहितेन प्रहितेन मार्गं
सम्बन्धिनं शान्तरुषं वितेने ॥ 67

अथ व्यतीते समये शिखण्डी
यक्षान्तिकं प्रास्थित सत्यसन्धः ।
स चावदत्त्वं कृतवान्यथोक्तं
त्वद्रक्षणादन्यदिदं ममासीत् ॥ 68

ह्रिया गृहेष्वेषु दिने स्थितं मां
सदस्यदृष्ट्वा धनदः कदाचित् ।
स्थाणुः कुतो वा वसतीति पृष्ट्वा
शुश्राव सख्युर्मम वृत्तमेतत् ॥ 69

अयं तु दत्तो वनितैवभूया
न्नरः शिखण्डीत्यशपत्सरुष्टः ।
यक्षानुरोधेन ततः प्रसन्नो
भवद्वधान्तं वदति स्म शापम् ॥ 70

निशम्य तत्प्रीतमनाश्शिखण्डी
कृताभ्यनुज्ञो धनदानुगेन ।
प्रत्यागतस्स्वं नगरं क्रमेण
द्रोणादवापास्त्रविशारदत्वम् ॥ 71

इत्थं तदम्बाचरितं निशम्य
भीष्मं प्रशंसत्सु नराधिपेषु ।
तेनैव मेने जितभार्गवेण
पार्थान् जितां स्संयति धार्तराष्ट्रः ॥ 72

शशिधरणिभुजां शुभाः प्रतिज्ञा
निशमितवान् सदसः क्षणादुदस्थात् ।
नियमिततिमिरोघतद्विभूषा-
मणिरुचिनिष्फलहस्तदीपभासः ॥ 73

अन्तः प्रविश्य पटमण्टपमध्यभाजि
तल्पे भुजे सुखमशेत नराधिनाथः ।
वाचालकंकणमनोज्ञकराम्बुजाभि-
रास्फालितोरुयुगलो वरवर्णिनीभिः ॥ 74

इत्यगस्त्यपण्डितकृतौ[1] बालभारते महाकाव्ये त्रयोदशस्सर्गः

1. A omits पण्डित.

अथ चतुर्दशस्सर्गः

तावच्च प्रथनमुखे मरुत्त्वभाजां
शूराणां गणमभिसर्तुमुत्सुकानाम् ।
श्रेयोभिस्सह सुरवारसुन्दरीणां
सा रात्रिः परिणतिमासदत्क्रमेण ॥ 1

निस्साणध्वनिभिरनीकिनीचराणां
सन्नाहं शिबिरयुगे निवेदयद्भिः ।
सन्त्रस्ताकुलमकरा निशात्ययेऽपि
प्रक्षोभं जलनिधयोऽभजन्त भूयः ॥ 2

शीतांशु र्निजकुलजन्मनां नृपाणां
संग्रामे निधनमवेक्षितुं न शक्तः ।
शृङ्गाणि क्षण मवलम्ब्य रश्मिहस्तै
रस्ताद्रेरपरमपां निधिं प्रपेदे ॥ 3

उन्नम्रध्वजपटपल्लवाहतिभ्यः
सन्त्रस्तैर्ध्रुवमुडुभिर्विमुच्यमाने ।
आकाशे पुनरपि सैन्यहस्तिमुक्तै
रापेदे वमथुकणैस्तदाबलक्ष्मीः ॥ 4

तत्कालस्फुटदिभगण्डभित्तिनिर्य-
द्दानाम्भोलहरिविहारकाङ्क्षयेव ।
आमीलद्दलपुटमीलिताग्रपक्ष्मा
ण्यत्याक्षुः कुमुदवनानि चञ्चरीकाः ॥ 5

आरूढद्विपरथवाजिनां भटानां
धौतस्य प्रहरणमण्डलस्य भासा ।
राजन्यव्यतिकरदर्शनाभिलाषा
दावृत्तिं पुनरपि रात्रिराततान ॥ 6

आवातक्षणकबलीकृतान्तरिक्षे
द्राघिष्णोः कलकलतो बलाम्बुराशेः ।
सन्त्रस्ता इव निजवल्लभान्पतत्रै
रालिंगंत्सपदि रथाङ्गसन्नताङ्ग्यः ॥ 7

तिष्ठन्तीं समरविहारकौतुकेन
स्मेरेषु क्षितिपतिवक्त्रपङ्कजेषु ।
सन्द्रष्टुं श्रियमिव तादृशीमभूव
न्नुन्नम्रस्मितमुखवारिजा नलिन्यः ॥ 8

आगच्छद्रविरवरणोन्मुकच्युपोषा
भूषांशुप्रकरधियं प्रकाशयन्तः ।
काश्मीरद्रवरुचयः कठोरभानो
राकामन्च्छतमखदिङ्मुखं मयूखाः ॥ 9

निर्गच्छद्बलयुगलं निवेशभूमेः
संक्षुभ्यज्जलधिनिभं ध्रुवं दिदृक्षुः ।
आरूढः प्रजवितुरङ्गमं शताङ्गं
पूर्वाद्रेस्तटभुवमाससाद पूषा ॥ 10

आकम्पध्वजलतिकावनाभिरामैः
पर्यन्तप्रस्तमदापगाप्रवाहैः ।
प्रख्यातं दिशि दिशि संश्रितैरवादी
द्वीपत्वं द्विपपत्तिभिर्बलाम्बुराशेः ॥ 11

भूपालव्रजभुजभूषणेषु भूपा
खड्गेषु प्रतिफलिताकृतिर्बभासे ।
आशङ्कय प्रतिफलमात्मबिम्बभेदं
शूराणां निधनमिवागतो निषेद्धुम् ॥ 12

आदिष्टा इव सुभटैर्घटा गजाना
मालोक्य श्रवणनिरस्तभूपरागम् ।
विक्षिप्तैर्दिवि करशीकरैर्वितेनुः
संसिक्तं सुरवनितावतारमार्गम् ॥ 13

छत्राणामुपरि निरुद्धभानुभासा
मुद्भूतं तिमिरमधस्तिरस्कृताशम् ।
क्षोणीभृन्मुकुटमतल्लिकामणीनां
श्रेणीभिर्निखिलमुदंशुभिर्निरस्तम् ॥ 14

तत्तादृग्भृगुसुतशौर्यमाक्षिणीं क्ष्मां
दीप्तश्रीस्तिलकयति स्म पाण्डुसेना ।
जैत्रस्तां विजयरथः प्लवङ्गकेतु
दैत्यारिस्तमपि गृहीतसूतभावः ॥ 15

पर्यन्तस्थितयमदेशिकप्रणुन्नौ
सञ्चारप्रचलितविश्वमेदिनीकौ ।
दुर्दान्ताविव करिणौ रणोत्सवाय
व्यूहौ द्वावभिमुखतां रयादयाताम् ॥ 16

भीष्मादीनुरुबलवर्तिनः किरीटी
गाण्डीवानलशलभान्विचिन्त्य बन्धून् ।
शोकार्तो बहलदयारसार्द्रचेता
यन्तारं यदुकुलधुर्यमावभाषे ॥ 17

कृष्णैतान् कुरुसुतमित्रबन्धुभूतान्
सङ्ग्रामे विगतघृणं निहत्य लभ्ये ।
दुष्कर्मव्यतिकरतापकीर्तिपात्रे
वाञ्छा मे सुखलवलाञ्छिते न राज्ये ॥ 18

इत्युक्त्वोज्झितधनुषं रथे निषण्णं
कृष्णस्तं कृतमधुरस्मितो बभाषे ।
गाण्डीविन्किमिदकाण्ड एव तावत्
कातर्यं कलयसि शैलराजसारः ॥ 19

धीराणां त्रिजगति मानभूषणानां
शूराणां शुभयशसां त्वमग्रगण्यः ।
आचारं न निजकुलोचितं विहातुं
युक्तं ते विजयफलाभिमुख्यभाजम् ॥ 20

कारुण्यं यदि वितनोषि बन्धुतायां
सज्जस्त्वं रणभुवमागतः किमर्थम् ।
त्यक्तास्त्रं गणयति भूभुजां गणस्त्वां
त्रस्तं न स्वजनवधे दयालुमेषः ॥ 21

सर्वेषां भवनिधने निमित्तमेषां
पश्यैते ननु निहता मयैव पूर्वम् ।
उक्त्वैवं कुरु सदसि प्रदर्शितं प्राक्
पार्थाय प्रकटयति स्म विश्वरूपम् ॥ 22

स्वं वीक्ष्य प्रकटचराचरप्रपञ्चं
भीष्मादीन्वदनशतैर्ग्रसन्तमुग्रैः ।
त्रस्ताय प्रथितमदर्शयत्स तस्मै
सारथ्यव्रतनिरतं तदेव रूपम् ॥ 23

दैतेयद्विषदुपदिष्टदिव्यतत्त्व-
ज्ञानाम्भःपरिहृतमोहपङ्कबन्धः ।
पूतात्मा रथगतमाददे किरीटी
गाण्डीवं सह विजयाशया रिपूणाम् ॥ 24

आखेटस्तदनु नरेन्द्रसिंहयूनां
पाञ्चालीपरिभवदुःखदावदूष्मा ।
अस्त्राणां नवरुधिरासवोत्सुकाना
मापानं बलयुगलस्य जन्यमासीत् ॥ 25

पादातप्रहितनिशातभल्लकृत्ता
हुङ्कारव्यतिकरिताः खमुत्पतन्तः ।
मूर्धानः श्रितकरिणां धनुर्धराणा
मुत्क्रान्तास्त्वरितमसूनिवाभिजग्मुः ॥ 26

शस्त्रौघत्रुटितमदद्विपाश्वयोधं
वीराणां विमतबले चचार बृन्दम् ।
दंष्ट्राग्रक्रकचविदारितोग्रयादः
पाथोधौ मकरकुलं यथा महीयः ॥ 27

नाराचप्रविदलितात्कपोलभागा
न्नागानां यदुदयति स्म शोणिताम्भः ।
आचूतं श्रवणपुटानिलेन शश्वत्
सम्प्राप्तं तदरुणकर्णचामरत्वम् ॥ 28

उन्मीलन्नरपतिकीर्तिकाशभाजि
प्रारम्भे रणशरदो विजृम्भमाणे ।
रुन्धन्तो गगनपथं गरुत्मद्भिः
कादम्बास्सुभटमुखाम्बुजेषु पेतुः ॥ 29

भूपाग्रैर्जलकणवद्गतान्विसृष्टान्
युद्धाब्धौ प्रहरणशुक्तिषु प्रविष्टान् ।
सम्प्राप्तानिमिषभूयमौक्तिकत्वं
स्वर्नार्यो गुणकलितांस्स्तनेषु चक्रुः ॥ 30

मुञ्चद्भिर्मुखरहरिन्मुखान्पृषत्कान्
धानुष्कैर्युधि निहता अपि द्विपेन्द्राः ।
तन्मार्गानचलनिभैर्वपुर्भिरग्रे
रुन्धाना विदधुरिवाशु वैरशुद्धिम् ॥ 31

आमूलं सुभटनिपातखण्डितानां
शुण्डाभिर्व्यतिकरमेयुषां गजानाम् ।
कृत्तानां रणभुवि भूभुजां भुजानां
केयूरैस्समजनि केवलं विभेदः ॥ 32

मुक्तानामधिसुभटं सुपर्ववृन्दैः
मन्दारद्रुमसुमनस्स्रजां रजांसि ।
विच्छेदं सपदि गतस्य शोणितौघैः
सन्धानं विदधुरनीकभूमिरेणोः ॥ 33

वाहित्थप्रहरणतः परस्परेषां
भग्नेषु स्वकरधृतेषु मुद्गरेषु ।
उत्खातैस्सपदि मिथो विषाणकाण्डैः
रातेनुः कतिचन हस्तिनस्समीकम् ॥ 34

पादातैरिपुभिरिव स्थितैर्विसृष्टं
मुग्धेन त्रिदशवधूजनेन चक्रम् ।
एकैकं युधि हतवीरभिन्नमध्यं
विभ्रश्यद्दिनकरमण्डलं शशाङ्के ॥ 35

कुम्भेभ्यस्सुभटकृपाणपातवेगात्
नागानां मणिनिकराः खमुत्पन्तः ।
तद्बुध्द्या भ्रुवमुपकण्ठचारिणीनां
वक्षोजेष्वनिमिषयोषितां निपेतुः ॥ 36

विक्षिप्तं नभसि जिघांसया न यावत्
दन्ताभ्यां प्रतिसुभटं प्रतीच्छतीभः ।
तद्बन्धुर्निशितशरेण तावदुग्रा
वापत्य भ्रुवमसिना लुलाव तावत् ॥ 37

एकस्याजनि हृदयङ्गमा प्रयुक्ता
वीरेण प्रणदितरत्नकिङ्किणीका ।
शक्तिः प्राक् तदनु सुराङ्गना नियुक्ता
कामेन प्रणदितमेखलाकलापा ॥ 38

विक्रान्ताभिसरणकेलिसंभ्रमेण
भ्रष्टेषु स्तनसिचयेषु लज्जितानाम् ।
तत्कृत्यं क्षणमलघूनि खेचराणा
मासन्नध्वजपटपल्लवानि तेनुः ॥ 39

निस्त्रिंशक्षतनरपालकालखण्डा
न्यादातुं परिपततां विहङ्गमानाम् ।
सङ्ग्रामक्षितितलविप्रकीर्णमारात्
वित्रासभ्रमकरमान्त्रजालमासीत् ॥ 40

स्मेरं मे धृतकुटिलोद्भटभ्रु सख्युः
पुत्रस्य सितकमलच्छवीति कश्चित् ।
दिव्यस्सन्विहगमुखाद्धृतानि वीरः
स्वर्नार्यै दिवि समदर्शयच्छिरांसि ॥ 41

काश्मीरद्रवरुचिशोणितं कपाला
दादाय द्विपरदतूलिकामुखेन ।
कान्ताया रजनिचरः कपोलभित्तौ
रोमाञ्चस्पृशि विलिलेख पत्रभङ्गान् ॥ 42

मञ्छन्नाखिलनभसा पृषत्कवृष्ट्या
संरुद्धोत्पतनसुखैश्चमूरजोभिः ।
शोषस्याद्दिति चकिता इवाजिभूमे
र्वाहिन्यश्चिरमपसस्रुरस्रमय्यः ॥ 43

छिन्नानि श्रवणपुटाञ्जिनीपलाशा
न्युत्प्लुत्यापरि विततानि कुञ्जराणाम् ।
शुण्डाभिस्सरसिजनालसन्निभाभिः
कीलालह्रदमपिबन् पिशाचडिम्भाः ॥ 44

आर्द्रार्द्रा रुधिरकरोत्करेण तन्त्री
र्वीणायाश्चिरमपरामृशन्निजायाः ।
आमृष्टप्रमदभवाश्रुरालुलोके
वीराणां विबुधमुनिर्विहारमार्गान् ॥ 45

इत्याराद्भिमुखयोधखड्गधारा
सङ्घट्टज्वलनदलद्रजोऽन्धकारे ।
सङ्ग्रामे निजभुजदण्डचण्डिमानं
प्रारब्ध प्रकटयितुं सरित्कुमारः ॥ 46

निर्भिन्नान्निरवधिकत्वरस्तदीयो
बाणौघः प्रतिसुभटान्मतङ्गजेभ्यः ।
पर्यस्यद्भुजविटपानपातयत् प्राक्
संवर्तश्वसन इव द्रुमान् गिरिभ्यः ॥ 47

प्राक्क्रौञ्चक्षितिधरभेददृष्टसारा
नाराचा भृगुतनयस्य यैर्विभिन्नाः ।
आच्छिन्दन्नचलनिभानिदानीं
तद्बाणास्त इति यदत्र किन्नु चित्रम् ॥ 43

वीराणामपि भयमादधानमारा
दारावं मुहुरतिघोरमुत्सृजद्भिः ।
निर्लूनैररिकरिमूर्धभिः पतद्भि
र्निर्घातैरिव विदधे भुवः प्रकम्पः ॥ 49

दूरस्थेष्वपि पुरतः शरा न यावत्
लक्ष्येषु त्रिदशनदीसुतस्य पेतुः ।
दुर्लक्षभ्रमणविशेषचारुचक्रः
तावत्तानतिपतति स्म तच्छनाङ्गः ॥ 50

प्रख्यातं प्रकटयता वरत्वमस्त्रे
प्वाधत्ते समग्रमसौ मयैव माधेन ।
इत्येवं विशिखमुचः किरीटिमुख्याः
प्रत्येकं सुचिरममंसत प्रवीराः ॥ 51

संघट्टस्फुरदनलस्फुलिङ्गसङ्ग
प्रेष्ठेषु च्छदपटलेष्वमन्दवेगाः ।
आच्छिन्दन्ननुपतितेषु दष्टपुङ्खा
लक्ष्याणि द्रुतगतयस्तदीयबाणाः ॥ 52

नाकौकःपुरगणिकाविमुक्तनाना-
पुष्पान्तःपरिगलितः परागराशिः ।
त्रिस्रोतस्सुतरथकेतनांशुकस्य
प्रत्यग्रं युधि पटवासचूर्णमासीत् ॥ 53

चापज्याभिहतिहतैककुण्डलाना-
मास्कन्दं विशिखनिकृत्तकन्धराणाम् ।
पर्यस्यन्मकुटभृतां ततामतानीत्
सेनानीर्भुवमयुतेन राजमूर्ध्नाम् ॥ 54

इत्थं तद्दिवसमसौ विधाय जन्यं
राजन्यप्रकरतमःप्रभातसूर्यः ।
पर्यस्ते दिनकृति मूर्ध्नि पश्चिमाद्रेः
स तेने बहुमहिमा बलापहारम् ॥ 55

सेनानीरिति नव वासराणि कृत्वा
सङ्ग्रामानथ दशमेऽह्नि जाह्नवेयः ।
युद्धाग्रे विहितशिखण्डिना पुरस्तात्
पार्थेन प्रहितशरोत्करेण भेजे ॥ 56

स्त्रीपूर्वं प्रतिभटसङ्गमप्रसङ्गात्
सन्त्यक्तायुधमवलोक्य सत्यसन्धम् ।
जिष्णुस्तं तदनु ततान तालकेतुं
नाविद्धं विदलितमर्मभिर्विपाठैः ॥ 57

मेदिन्यां हरिसुतसायकैर्धृतात्मा
धाम स्वं प्रयतमनाः प्रयातुकामः ।
भीष्म त्वं व्रज दिवमुत्तरायणादा-
वित्युक्तस्त्रिदशगिरा जहौ न देहम् ॥ 58

यो विक्रमेण भुजयोरगृहीतहेति-
सङ्ग्राहयन्मधुरिपुं रणसीम्नि चक्रम् ।
तस्मिन् हते न खलु कौरवमेव सैन्यं
शोकाकुलं बलमभूदपि शात्रवाणाम् ॥ 59

अभीशुभिरधोमुखैरथ परीतबिम्बे रवौ
विडम्बयति सायकैर्धृततनुं सुतं शन्तनोः ।
पतत्यपरवारिधेः पयसि दूरमुक्तारवं
निवेश भुवमाविशन्नृपतिवर्यसैन्यद्वयम् ॥ 60

इत्यगस्त्यपण्डितकृतौ बालभारते महाकाव्ये
चतुर्दशस्सर्गः

अथ पञ्चदशस्सर्गः

अथ पूर्वमहीभृतोऽपरेद्युः
शिरसो जग्मुषि पूष्णि भूषणत्वम् ।
अभिषिक्तमनीकिनीपतित्वे
गुरुमाचष्ट कुरूद्वहः प्रहृष्टम् ॥ 1

युधि धर्मसुतं हठाद्गृहीतं
भवता द्यूतविधौ विजित्य भूयः ।
अटवीगृहमेधिनं विधास्या-
म्यनुजैस्सार्धमतीव दुःखदीनैः ॥ 2

ध्वनयन् जगदण्डकं स्वरेण
ध्वजिनीनामधिभूर्जगाद भूपम् ।
यदि सन्निहितो न तस्य जिष्णुः
कलयिष्यामि नृप त्वया यदुक्तम् ॥ 3

घनसारमयत्वदर्शितश्री
रथ सद्वृत्ततयाभिनन्दनीयः ।
तिलकत्वमनीकनीमुखस्य
प्रचलत्कर्णविभूषणं विरेजे ॥ 4

उभयोरपि सैन्ययोर्विमर्दे
महति द्रोणभुजोष्मजृम्भणानि ।
विबुधत्वमुपेयुषोऽपि वीरा
नविलोक्याप्सरसां कुलान्यपश्यन् ॥ 5

प्रियमाणरणोत्सवात्किरीटी
गतशङ्कोऽपि गुरोर्विशङ्कमानः ।
तदहः कुरुसैनिकेषु बाणा
नमुचत्पार्श्वभुवं न धर्मसूनोः ॥ 6

शरवर्षभृतं भियेव हित्वा
गगनं भास्वति याति पश्चिमाद्रिम् ।
कलशानलसम्भवौ प्रवीरा
वपहारं बलयोर्वितेनतुस्तौ ॥ 7

अपरेद्युरथ त्रिगर्तनाथो
दधदाज्ञां गुरुचोदितस्य राज्ञः ।
नरमाजुहुवे परत्र योद्धुं
स च नारायणसारथिः प्रतस्थे ॥ 8

उरुसन्नहनाः कुरुप्रवीरा
रहितं गाण्डिवगर्वितेन पुंसा
अविशङ्कमजातशत्रुसैन्यं
गतसिंहं गहनं गजा इवापुः ॥ 9

कुरुपाण्डवसैन्ययोर्दिदृक्षु
र्नरसंशप्तकवर्गयोश्च युद्धम् ।
कलहप्रणयी मुनिः प्रहृष्य
न्नुभयत्रापि गतागतान्वितेने ॥ 10

युधि तत्र युधिष्ठिरं जिघृक्षो
रिषुदण्डाश्च गुरोर्मनोरथाश्च ।
अनिलानलसम्भवादिभिस्ते
विफलत्वं शरदुर्दिनेन नीताः ॥ 11

भगदत्तवशंवदो वितन्व
न्विविधानि भ्रमणानि सुप्रतीकः ।
क्षुभितं द्विषतां बलं द्विपेन्द्रो
विदधे मन्दरवन्महाम्बुराशिम् ॥ 12

चरणैः कतिचित्करेण कांश्चि-
द्दशनाभ्यां कतिचिद्विरोधियोधान् ।
बहुलेन च बृंहितेन कांश्चि
द्धृतमन्युर्नमयाम्बभूव दन्ती ॥ 13

भगदत्तगजेन हन्यमानं
युधि विज्ञाय निजं बलं प्रपेदे ।
पवनास्त्रनिरस्तकृत्तशेष-
प्रतियोधो जविना रथेन पार्थः ॥ 14

दृढपीडितचूलिकेन नुन्न
श्चरणाङ्गुष्ठपुटद्वयेन धर्त्रा ।
निभृतश्रवणं प्रसार्य हस्तं
द्रुतमभ्यद्रवदर्जुनं द्विपेन्द्रः ॥ 15

रथमुत्तरतोऽपवाह्य किञ्चि
द्वितथीकुर्वति कुञ्जरस्य वाञ्छाम् ।
नरकस्य रिपौ तदन्वयेन
प्रहितां पार्थशरश्चकर्त शक्तिम् ॥ 16

स निरङ्कुशमङ्कुशोऽभिमन्त्र्य
ज्वलितं वैष्णवमस्त्रमस्ततन्द्रः ।
प्रजिघाय किरीटिने जिघांसुः
कुलिशं क्रुद्ध इवाचलाय शक्रः ॥ 17

द्रुतमात्तभियापसृत्य दूरं
गगने सिद्धगणेन वीक्षितं तत् ।
शरणागतरक्षणावतीर्णः
प्रतिजग्राह भुजान्तरेण शौरिः ॥ 18

रथवाजिरजोऽङ्गरागभाजि
स्थितमस्योरसि तन्मुहूर्तमात्रम् ।
ददृशे मृदुनानिलेन नुन्नं
शिखरिग्रावणि यथा शिरीषपुष्पम् ॥ 19

विजयप्रहितेन तैक्ष्ण्यभाजा
विशिखेन द्विरदाद्रिभिन्नमूर्ध्नः ।
न्यपतन्मणयः कुमारशक्त्या
दलितात्क्रौञ्चगिरेरिवाशु हंसाः ॥ 20

निपतन्नसुहारिभल्लविद्धो
गजमल्लस्स्थलमग्नदन्तकुन्तः ।
प्रभुणा नरकात्मजेन सार्धं
प्रविशन् गर्भमिव क्षितेर्बभासे ॥ 21

अपरेण पुनः शरेण कृत्तं
रुधिरोद्गारि रिपोः शिरः कबन्धात् ।
अपतद्भुवि शोणशोचिरद्रे
रपरादप्यधिपस्य बिम्बमह्नाम् ॥ 22

दिवसप्रलयावसानवेशौ
विरतोग्रप्रसरौ जवेन भूयः ।
निजमेव यथापुरप्रदेशं
बलपूर्वापरसागरावयाताम् ॥ 23

शिबिरद्वितये ततः प्रभाते
रणसन्नाहिषु राजकुञ्जरेषु ।
समराय हृतोऽपरत्र भूय
स्त्रिदिवेशस्य सुतस्त्रिगर्तयोधैः ॥ 24

रणसीमनि शूलिनाप्यभेद्यं
विमतव्यूहमुदीक्ष्य दुर्निरीक्षम् ।
अपहाय विलोचनं तु वामं
बलमस्पन्दमलक्षि पाण्डवानाम् ॥ 25

अथ धर्मसुतस्य बिभ्रदाशा
मभिमन्युर्विशिखैस्सहस्रसङ्ख्यैः ।
अभिनत्किरणैरिवोष्णरश्मिः
कमलव्यूहमुदूढबालभावः ॥ 26

विशतोऽस्य धनुर्विनिर्गतानां
लुलितादावलिभिश्शिलीमुखानाम् ।
स्थगयन्दिवमुत्पपात पश्चा
त्कनकक्षोदसहोदरः परागः ॥ 27

तमनुप्रविविक्षु पार्थसैन्यं
पिहितव्यूहमुखेन सिन्धुभर्त्रा ।
हरदत्तवरोद्धतेन सर्वं
सरितः स्रोत इवाचलेन रुद्धम् ॥ 28

पुरुहूतसुतस्य पुत्रताया
यदुनाथस्य च भागिनेयतायाः ।
स विमर्दसहो महारथानां
सदृशं कर्म समाचचार वीरः ॥ 29

अभिमन्युशिलीमुखाभियोगा
त्पततां हेमकिरीटमण्डलानाम् ।
मणिकुण्डलिनां महीशमूर्ध्नां
भरमुद्वोढुमभूदलं न भूमिः ॥ 30

रणरेणुनिवारणार्थमिन्द्र
स्स्वशरीरादपनीय वारवाणम् ।
प्रमदेन दृशां शतैस्सबाष्पै
र्दिवि पौत्रस्य ददर्श पौरुषाणि ॥ 31

शरभग्नरथद्विपः प्रयातः
शरभत्वं प्रतियोधिसिंहयूनाम् ।
सुदृशस्सुरसुभ्रुवां वितेने
सदृशः पुष्पशरस्य साभिलाषाः ॥ 32

युधि लक्ष्मणमात्मसायकानां
प्रथमं पार्थसुतश्चकार लक्ष्यम् ।
दिवि कामविकल्पमार्गणानां
तदनु स्वर्गणिकाविलोचनानाम् ॥ 33

धनुरस्य चकर्त भानुसूनु
र्गुरुरश्वान्छ्ररसम्भवश्च सूतम् ।
इषुभिस्तमवाकिरन्प्रवीरं
हृदिकद्रोणसुतौ बृहद्बलश्च ॥ 34

विरथस्स हतस्सखड्गखेटः
सुरचाटूनि खमुत्पपात शृण्वन् ।
कति वा निहता मया प्रवीरा
दिवि सन्तीति दिदृक्षयेव तेषाम् ॥ 35

स नदन्फलकासिपट्टकौ च
भ्रमयन्व्योमनि रेचकानि चक्रे ।
शिततुण्डविखण्डितस्य विभ्र-
त्फणभोगाविव पन्नगस्य तार्क्ष्यः ॥ 36

गुरुकर्णशरक्षतासिचर्मा
भुवमासाद्य गदी गदासहायम् ।
कुरुभूरमणानुजस्य सूनुं
निजघान स्वयमप्यनेन जघ्ने ॥ 37

प्रशमय्य विरोधिनोऽन्धकारा
नभिमन्यौ तपनेऽपि चास्तभाजि ।
हृदयानि च पाण्डुनन्दनाना
मरविन्दानि च मीलितान्यभूवन् ॥ 38

कुरवो दधतश्शरीरमग्ना-
ञ्छरशल्यानभिमन्युनामचिह्नान् ।
प्रययुश्शिबिरं परेऽपि सर्वे
निदधाना हृदयेषु शोकशल्यान् ॥ 39

कवचानि जयद्रथेषुकृत्ता
न्यपनीयोपनतैस्समं नरेन्द्रैः ।
विषसाद विषादलुप्तचेताः
सदसि स्थण्डिल एव धर्मराजः ॥ 40

अवरोधगृहेषु सुन्दरीणां
करुणं क्रन्दितमुल्बणं जजृम्भे ।
शबराहतशावविह्वलानां
कुररीणामिव कूजितं वनेषु ॥ 41

श्रवसि प्रथमं सुतप्रवृत्तिर्
हृदये शोकमयं ततोऽन्धकारम् ।
अपतद्विवशा स्वयं सुभद्रा
भुवि पश्चात्पवनाहतेव वल्ली ॥ 42

अपसृत्य नरेन्द्रयोषितस्तां
पयसां बिन्दुभिरश्रुवर्षमिश्रैः ।
श्वसितोपचितैश्च लब्धसंज्ञां
तरसातन्वत तालवृन्तवातैः ॥ 43

भुवि केशकलापसंस्कृतायां
विलुठन्ती विललाप वीरपत्नी ।
दधती मृदुशिञ्जितापदेशा
द्विलपन्तीव विभूषणानि गात्रैः ॥ 44

युधि वत्स निपातितोऽसि वीरै
रनवद्यास्तरणां विहाय शय्याम् ।
शरशल्यरुजा वलद्भिरङ्गै
र्भुवि शेषे कथमद्य केवलायाम् ॥ 45

मृदुना व्यजनानिलेन यस्ते
व्यपनेयो रणभूविहारघर्मः ।
असृगासवगृध्नुगृध्रपक्ष
श्वसनेनैव तनोषि तत्प्रशान्तिम् ॥ 46

शरपक्षमरुत्प्रमृष्टरोषा
रणरेणुस्तव पक्ष्मपङ्क्तिलीना ।
परिरभ्य मयेव वन्दनान्ते
परिमृज्येत कथाद्य कौतुकिन्या ॥ 47

पुरतश्चटुलं कुलं शिवानां
वदनोल्कामयदीपिकाशतेन ।
भवतः पुरुषप्रकाण्डसेव्यं
विजयारात्रिकमङ्गलं विधत्ते ॥ 48

तव वारविलासिनीसहस्रै-
र्भरिताभ्यासभुवः पुरा निशासु ।
अधुना रचयन्ति पार्श्वसेवां
पिशितग्रासभृशोद्धताः पिशाच्यः ॥ 49

त्वयि जाग्रति वीर मानिनो ये
भुवि जाता दिनदीपदैन्यभाजः ।
अपदानविकत्थनासु तेषा
मलघुप्रीतिरितःपरं भवित्री ॥ 50

त्वयि दिव्यवधूविलोचनाना
मतिथित्वं विधिना हतेन नीते ।
असपत्नतया वसुन्धरायां
कुसुमास्त्रः कुशली चिराय जातः ॥ 51

कुरुवंशनिधिं बिभर्ति गर्भे
कुशलं मात्स्यमहीभृतः कुमारी ।
असमाप्य च दौहृदान्यमुष्या
न हि युक्ता भवतः परत्र यात्रा ॥ 52

सुतमङ्कनिषण्णमुद्वहन्तं
गिरिशस्येव कपर्दमूढचन्द्रम् ।
अवलोकयितुं भवन्तमेत
त्सुकृतं तादृशमाचरन्नचक्षुः ॥ 53

इति सा विविधं विलप्य मूर्छा
मसकृत्प्राप शुचा जनेन संज्ञाम् ।
कमला शशिनेव हन्त निद्रां
दिवसेनेव विबुद्धतां क्रमेण ॥ 54

स्वसखीविधृता वधूश्च तस्या
रुदती मुग्धतया विना विलापम् ।
अभिचन्नयनोदकेन गर्भं
दृढशोकानलदाहशङ्कयेव ॥ 55

अनिवर्तिनमेव युद्धभूमे
रथ संशप्तकवर्गमारचय्य ।
शिबिरं प्रति शीलवान्निवृत्तः
पथि कंसद्रुहमाह शुभ्रवाहः ॥ 56

अयि शश्वदक्षिणं मदीयं
वहति स्पन्दमिदं मुकुन्द चक्षुः ।
शिबिरं च यथापुरं न भाति
क्षितिपस्याकुशलं भवेदमित्रात् ॥ 57

इति तस्य वचो निशम्य शौरि-
र्विनिगृह्णञ्शुचमन्तराचचक्षे ।
धृतिमान्भव पार्थ सानुजस्य
क्षितिभर्तुः क्षतिरस्ति नैव काचित् ॥ 58

परमन्दिरमूकयोधलोकं
निभृतारात्रिकतूर्यशङ्खघोषम् ।
प्रविवेश कपिध्वजो निवेशं
मथनानन्तरशान्तसिन्धुकल्पम् ॥ 59

स रथादवतीर्य रुद्धबाष्प-
प्रसरैः कञ्चुकिभिः प्रणम्यमानः ।
विमना विशति स्म राजगेहं
सह लोकत्रयपालकेन यन्त्रा ॥ 60

स ददर्श सदस्युदश्रुधारं
सिच्चयैरावृतमौलि राजबृन्दम् ।
गिरिचक्रमिवात्तनिर्झरौघं
शरदभ्रैरवगुण्ठितोरुशृङ्गम् ॥ 61

उपसृत्य ततः कृतप्रणामो
नृपतेर्नित्यममुक्तपार्श्वसेवम् ।
अभिमन्युमधीरधीरदृष्ट्वा
विकसन्मन्युरपृच्छदन्तिकस्थान् ॥ 62

अथ नम्रमुखेषु तेषु तस्मै
नृपतिर्गद्गदिताश्रुसन्नकण्ठः ।
भयविस्मयहर्षशोकमोहान्
जनयन्तं तदुदन्तमाचचक्षे ॥ 63

अथ दत्तपदं विजित्य शोकं
हृदये वानरकेतनस्य रोषः ।
उदभूदभिभूय बाडबाग्निं
कलशाब्धेः पयसीव कालकूटः ॥ 64

स्फुरिताधरमश्रुपूरिताक्षं
प्रभवद्वेपथु बिभ्रतं शरीरम् ।
भ्रुकुटेरुदयादमंस्त पूर्वं
भृशमुद्विग्नशुचं जनः प्रवीरम् ॥ 65

प्रसरेण घनेन घर्मवारा
मभिषिक्तो विजयश्रियेव वीरः ।
स्तनितप्रतिरोधिना स्वरेण
प्रतिजज्ञे शतयज्वसूनुरित्थम् ॥ 66

सुभटाः शृणुतोदयन्नयाव
त्पतति श्वो हरिदश्वबिम्बमब्धौ ।
रणसीमनि पातयामि ताव
द्विशिखाग्रेण शिरो जयद्रथस्य ॥ 67

यदि न क्रियते मयैवमाजौ
पुरतः कर्णसखस्य कौरवस्य ।
ज्वलिते सह गाण्डिवेन वह्नौ
शलभत्वं मम लप्स्यते शरीरम् ॥ 68

इति दत्तसुदुस्तरप्रतिज्ञो
विजयः पूरयति स्म देवदत्तम् ।
परिपन्थिकलत्रगर्भपाते
ऽप्यदयं दैत्यरिपुश्च पाञ्चजन्यम् ॥ 69

हृषिताङ्गरुहः प्रहृष्टचेता
बकशत्रुर्विदधे तथाट्टहासम् ।
निपतत्कबलैः क्षणं कराग्रै
र्मुमुहुः स्तम्भगता यथारिनागाः ॥ 70

इतरे मुदिताः स्वसिंहनादै
र्मुखरां भूपतयस्सभां वितेनुः ।
विगमे वनहस्तिनो घनानां
निजकण्ठस्तनितैर्गुहामिवाद्रेः ॥ 71

नुदितं मुखसंज्ञया विभुस्तं
नृपबृन्दं स विसृज्य विश्रमाय ।
नृपतिः प्रविवेश राजगेहं
भयमग्नं च जयद्रथस्य चेतः ॥ 72

दनुजारिरथोचितानुलापा
दनुजायास्सुसहं विधाय दुःखम् ।
भवनन्दितपौरुषस्य पुंसो
भवनं प्राप कृती कृपापयोधिः ॥ 73

स तमाह रुषा कृता किरीटि
न्नविचार्यैव मया सह प्रतिज्ञा ।
गुरुकर्णकृपादयः प्रवीराः
कुरुराजस्य बले न सन्ति किन्ते ॥ 74

चकितो भवतः श्रुतप्रतिज्ञः
शरणं द्रोणमगात्सुवीरनाथः ।
अभयं स च दत्तवानमुष्मै
सह वीरैः कुरुभूमिभर्तुरग्रे ॥ 75

स विहस्य जगाद दृष्टसारै
रलमेभिर्यदुनाथ सिन्धुराजम् ।
अपि दिक्पतिभिर्निहन्मि गुप्तं
ज्वलदस्त्रैर्भवतश्शपे पदाभ्याम् ॥ 76

सकृदाजिषु यस्य पादरेणो
स्स्मरणेन त्रिदशा जयन्ति दैत्यान् ।
त्वयि सन्निहिते सदैव तस्मिन्
मम हस्ते ननु विश्वमेतदास्ते ॥ 77

अथ विश्वमयस्स भूतभर्तुः
परिगृह्यात्मनि कल्पितां सपर्याम् ।
कुशतल्पगतो हरं स्मरेति
प्रभुरादिश्य तमासदत्स्वगेहम् ॥ 78

शयनं शुचि तत्र वासवेश्म-
न्यपरं शेषमिवाधिशय्य शौरिः ।
विजयस्य कृते विगाढचिन्तः
पदसंवाहकरं जगाद सूतम् ॥ 79

अयि दारुक दारुणप्रतिज्ञं
विजयं रक्षितुकाम एष बाहुः ।
कुरु मत्सविधे रथं युधि श्वः
कुरुनाशाय सदिव्यशस्त्रकेतुम् ॥ 80

सुखसुप्तजने ततो निशीथे
सुहृदं पाशुपतास्त्रमुष्टिलब्ध्यै
कुशतल्पगतं करे गृहीत्वा
सहसा शाम्भवमास्पदं प्रतस्थे ॥ 81

स विलङ्घ्य वियत्पथं सुदूरं
गुणमुक्तेषुजवो गुणैरमुक्तः ।
समदर्शयदर्जुनाय तांस्ता
नुङ्गचक्रभ्रमणोचितान्प्रदेशान् ॥ 82

एकैकदन्तमुसलक्षतिसूच्यमान-
हेरम्बकेलितटघातविधिं प्रपेदे ।
कैलासमिन्दुकिरणद्रवचन्द्रकान्त-
निष्यन्दकन्दलितनिर्झरपातमद्रिम् ॥ 83

इत्यगस्त्यपण्डितकृतौ[1] बालभारते महाकाव्ये पञ्चदशस्सर्गः

---

1. A omits पण्डित.

अथ षोडशस्सर्गः

कृष्णौ ततः क्षितिभृतः शिरसो विभूषां
प्राप्तौ पुरं प्रमथपौरजनेन जुष्टाम् ।
द्वारं विभोरभजतां धृतयामहस्ति
दिव्यत्रिशूलधरभैरवक्लृप्तराज्यम् ॥ 1

तौ नन्दिना द्रुतनिजागमनप्रहृष्टा-
वन्तस्ससम्भ्रममुभावपि नीयमानौ ।
बालातपद्युतिजुषां मणिदीपभासा
मापूरितं विविशतुर्भवनं भवस्य ॥ 2

रोमन्थफेनशबलाग्रभुवा चिराय
स्वापोपलम्भपरिवर्तितकन्धरेण ।
निश्वासभङ्गिभिरनुक्षणमूष्मलाभिः
क्षिप्तोपहारकुसुमेन सनाथमुक्ष्णा ॥ 3

श्लाघ्यं प्रभोरवसरं प्रतिपालयद्भिः
सौधाङ्गणेषु शयितैरुपधाय वीणाः ।
गीतं मुहुः किमपि वासनया रणद्भिः
सम्बाधितं क्वचन सिद्धवधूकदम्बैः ॥ 4

कक्ष्यासु सप्तसु कथंचन लङ्घितासु
ज्योतिर्विशेषकथितात्मनिवासदेशम् ।
देवं जगत्त्रितयरक्षणजागरूकं
कृष्णार्जुनौ ददृशतुर्दमनं पुराणाम् ॥ 5

भद्रासने महति सिंहसनाथपादे
गन्धर्वसिद्धसुरसंपदमुक्तपार्श्वे ।
देव्या सह स्फटिकशैल इवापरस्मिन्
निर्णिक्तरत्नरुचिभाजि निषेदिवांसम् ॥ 6

सङ्गीतमर्दलरवश्रवणोपयान्तं
निद्रायमाणमरुणाश्मनि पादपीठे
पादाम्बुजेन गुहवाहनबर्हिशावं
पक्षेषु पल्लवनिभेषु परामृशन्तम् ॥ 7

उत्तंसतामुपगतस्य तुषाररश्मे
रुत्सर्पिभिर्नवमृणालगुणावदातैः ।
आस्थानमण्टपमशेषमभीशुजालै
राबद्धनूतनवितानमिवादधानम् ॥ 8

सिन्दूरधूलिरुचिसिन्धुरवक्त्रमूर्ध्नि
बालातपद्युतिगुहाननपङ्कजेषु ।
शैलात्मजाकुचतटेऽपि च कुङ्कुमाभं
भूषाभुजङ्गफणरत्नमहो वहन्तम् ॥ 9

आवेदितं सविधगेन च नारदेन
श्रुत्वाभिजातमभिमन्युभुजापदानम् ।
सम्भावयन्तमसकृत्परिकम्पितेन
वल्गद्द्युसिन्धुलहरीमुखरेण मूर्ध्ना ॥ 10

आवेदितौ तदनु साञ्जलिबन्धनेन
शैलादिना पशुपतिः प्रणतोत्थितौ तौ ।
आलोकयद्बदरिकाश्रमबद्धवासौ
दिव्यौ मुनी जगति भूतहिताय जातौ ॥ 11

कृष्णाज्ञया च निजकार्यनिवेदनाय
सिंहासनं समुपसर्पति शक्रसूनौ ।
स्मृत्वा चिराय कुहनाशबरौ नियुद्धं
तौ दम्पती स्मितलवाङ्कमुखावभूताम् ॥ 12

बध्वाञ्जलिं कमलकोमलकोरकाभ-
मग्रे स्थितस्स विजयो विजयोर्जितश्रीः ।
आपन्नकल्पतरुणा तरुणामृतांशु
रेखा भृता त्रिजगदे जगदेकवीरः ॥ 13

जानामि पार्थ भवदागमनस्य हेतु-
मस्मिन् सुधारससरस्युपकण्ठभाजि ।
दैत्याहवोत्थमतिखेदमिवापनेतुं
मग्नं धनुस्सशरमानय मत्सकाशम् ॥ 14

जिष्णुस्तथेति कलयन्तरसा शिवाज्ञां
दिव्यं सरस्सह यदुप्रवरेण यातः ।
चापं शरं च नुतिसंहृतभोगिरूप
मादाय पारिषदसंसदमाप भूयः ॥ 15

भ्रूसंज्ञया सदसि कश्चन भूतभर्तु
रुत्थाय कुण्डलितकार्मुकसंहितेषुः ।
प्रादर्शयत्तदनु पाशुपतप्रयोग-
मुष्टिं सहस्रनयनप्रभवाय सम्यक् ॥ 16

आदाय तं मधुरिपुर्विभुना विसृष्टं
प्रत्यागतः कुशमये विनिवेश्य तल्पे ।
शय्यां यथापुरमवाप्य निजां निशान्ते
शुश्राव सूतजनबृन्दसुभाषितानि ॥ 17

उन्मेषवत्युषसि धर्मभुवो निवेशे
जन्यप्रयाणपटहध्वनिरुज्जजृम्भे ।
प्रत्यर्थिनः क्षितिभृतः कटके च तादृक्
तस्य प्रतिध्वनिरिवानुपदं गभीरः ॥ 18

स्नातो नृपः कृतपितृद्विजदेवपूजः
संग्रामभूविहरणोचितवेषचारुः ।
निर्गच्छति स भवनादवलोकनेन
सम्भावयन् क्षितिभृदञ्जलिकाननानि ॥ 19

युक्तं शशाङ्करुचिभिस्तुरगैश्चतुर्भिः
संशप्तकासृगनुरञ्जितचक्रनेमिम् ।
नृत्यत्कपिध्वजपटं रथमानिनाय
द्वारं सुराधिपसुतस्य रथाङ्गपाणिः ॥ 20

तं हेषमाणतुरगं मघवत्कुमारः
कृप्तप्रदक्षिणविधिः प्रथमं प्रणम्य ।
यन्तुर्जयेति वदतो मुखमम्बुजाक्षं
पश्यन्प्रमोदविकचाननमारुरोह ॥ 21

प्रग्राहतोदनपरिग्रहकर्कशेन
हस्तद्वयेन हरिणा सहसोपनीतम् ।
रोमाञ्चकञ्चुकिषु वर्म कथञ्चिदङ्गे
ष्वामुञ्चदासुरशरक्षतपूर्वभागम् ॥ 22

वल्मीकतामुपगतामिषुपन्नगानां
कर्तुर्निषङ्गयुगलीमपराङ्गभूषाम् ।
तस्यातिवीरविशिखोल्लिखितैकदेशं
मूर्ध्ना धृतं मुकुटमेव शिरस्त्रमासीत् ॥ 23

क्रीडाकिरातवपुषः पुरशासनस्य-
चूडातुषारकरखण्डसुधासुगन्धि ।
वैधव्यदायि विबुधद्विषदङ्गनाना
मादाय कार्मुकमधिज्यमसावकार्षीत् ॥ 24

व्यूहं द्विषामभियता तनयेन जिष्णो
रास्फालितस्य धनुषो दिवि जृम्भमाणः ।
विस्फार एव भवति स्म सुराङ्गनानां
वीरस्वयंवरणमङ्गलतूर्यघोषः ॥ 25

व्यूहस्य विश्रुतमहारथरक्षितस्य
द्वारस्थिताय गुरवे युधि दुर्जयाय ।
पार्थश्चकार मुरशासनशासनेन
पादान्तिकप्रहितबाणयुगप्रणामम् ॥ 26

द्रोणस्तु रोषकृतदुस्तरसन्धमेनं
संरक्षितुं गुणनिधिः प्रियशिष्यमिच्छन् ।
उद्यत्प्रसादवदनप्रकटानुकूल्य
क्लृप्ताहवः क्षणमनेन जितः किलासीत् ॥ 27

तं दक्षिणेन परिहृत्य गुरुं महीध्रं
विज्ञातदैवमरुदप्रतिकूलभावः ।
व्यूहो दधौ द्रुततरं रथयानपात्र
मन्तर्निनाय यदुनायककर्णधारः ॥ 28

व्यूहं बिभेद रथवेगवशेन शौरिः
पार्थेषुभिर्बिभिदिरे कृतवर्मसैन्याः ।
श्रुत्वा चमूकलकलं बहुलं तदानीं
दुर्योधनस्य हृदयं च भयेन भिन्नम् ॥ 29

शौण्डीर्ययौवनमदे शमिते शरौघै
वृद्धत्वजर्झरतनुं धृतकेतुयष्टिम् ।
निर्माय मोहतिमिरान्धदृशं च भोजं
पार्थो जगाम युधि काल इव द्वितीयः ॥ 30

आगत्य सम्मुखमुदञ्चितबाहुसारा
नासादितानमरभावममुष्य बाणैः ।
प्रत्येकमेव रणसीमनि तत्र नूनं
वीरान् शतंशतमगृह्णत नाकनार्यः ॥ 31

अप्यर्जुनेषुदलितारिकुलाकुलायां
वेगोत्तरां रथगतिं युधि वीक्ष्य शौरिः ।
सञ्चारिणो गगनवर्त्मनि निर्विबन्धे
पत्युर्जवं च पततां च तिरश्चकार ॥ 32

स्पर्धाजुषाविव मिथः प्रथितात्मकृत्यौ
पत्रोज्ज्वलेन जवनिर्जितमारुतेन ।
कृष्णौ रथेन च शरप्रकरेण चोभौ
सैन्याङ्गतोदमतिदारुणमादधाते ॥ 33

तं व्यूहमध्यगतमुग्रतरैर्मयूखै
र्मध्याह्नभानुमिव सर्वसरस्वदम्भः ।
बाणैरशेषरिपुजीवितमाहरन्तं
द्रष्टुं प्रभूतमहसं न शशाक लोकः ॥ 34

अश्वाञ्छशंस तृषितान्विजयाय शौरि
रस्त्रेण केन चिदसावपि गां विभिद्य ।
मूर्तं यशस्त्वमिव दैत्यजयार्जितं त
त्पातालतस्समुदपादयदच्छमम्भः ॥ 35

तस्यार्धमेव सरसः परितो विशाल
मुच्छ्रायशालिशरकूटमधो विधाय ।
विस्मापिते दिवि भुवि स्थितिभाजि लोके
वीरेण तेन पदगेन तदा बभूवे ॥ 36

तस्मिन्पतन्ति विवधायुधशिञ्जि राज्ञां
बृन्दानि बाधयति निर्दयमद्वितीये ।
स्मृत्वा रघूद्वहखरादिनिशाचराणां
धुर्यान्मुमोच मुदितस्तुरगान्मुकुन्दः ॥ 37

काम्बोजभोजयवनाङ्गकलिङ्गवङ्ग-
नेपालमालवमुखक्षितिपाङ्कभाजम् ।
उत्खाय मार्गणगणं निजपाणिपद्म-
स्पर्शाहृतव्रणरुजो विदधे स वाहान् ॥ 38

कृत्वा ततो विलुठनानि यथेष्टमुर्व्या
मुत्थाय पांसुलसटान्धुवतः स्वकण्ठान् ।
पाणिद्वयेन मृदितावयवान्क्रमेण
रथ्यानपाययत वारि रथाङ्गपाणिः ॥ 39

स्नातोत्थितैर्मधुरहेषितवद्भिरश्वै
र्युक्तं यथापुरमधिष्ठितमर्जुनेन ।
सञ्चारयन्युधि रथं मधुमर्दनोऽभू
न्मन्दारवर्षशरवर्षकृताभिषेकः ॥ 40

जिष्णोः प्रवृत्तिमरिमध्यगतस्य राज्ञा
जिज्ञासुना समिति सप्रणयं नियुक्तौ ।
भीमश्च सात्यकिसुतश्च गुरुं विजित्य
व्यूहं द्विषामविशतां रथिनौ रयेण ॥ 41

बाणैर्बभञ्जतुरुभौ हरिनन्दनेन
लूनावशिष्टमखिलं च बलं रिपूणाम् ।
वर्षासु सिन्धुरयपातितशेषमारा
द्वन्यद्विपाविव तलद्रुमषण्डमुग्रौ ॥ 42

दुश्शासनानुजशिरांसि सरोजलाव
मग्रे लुनानमतिदारुणमङ्गराजः ।
भूयिष्ठरोषकलुषः पवमानसूनुं
भूरिश्रवाश्च युधि सात्यकिमभ्ययाताम् ॥ **43**

हित्वा हताश्वमपरं रथमेत्य सज्जं
भीमं व्यधाद्रविसुतो विरथं विचापम् ।
भीमस्ततोऽयमपसृत्य गदी गजेन्द्रा
नन्यत्र वायुरिव वारिधरान्बभञ्ज ॥ **44**

कृष्णानुजं कृतमहासमरं चिराय
कृत्ताश्वसारथिशरासनमात्तचक्रम् ।
भूरिश्रवा भुजबलेन निपात्य भूमा
वुत्थाय खड्गमुदयुङ्क्त रुषाभिहन्तुम् ॥ 45

कृष्णेन दर्शितमुदग्रकृपाणयष्टि
दंष्ट्रोभयं करममुष्य भुजोरगेन्द्रम् ।
दूरे नरेण युधि योधयता नरेन्द्रा
न्मुक्तश्चकर्त चतुरं दिवि पक्षिवर्यः ॥ 46

अन्यत्र कृत्तसमितेर्विजय त्वया मे
कृत्तो भुजस्तव यशो धिगिति ब्रुवाणः ।
आचान्तवारिरथ संश्रितदर्भशय्यः
प्रायोपवेशनरतोऽजनि सौमदत्तिः ॥ 47

आघ्राय कालभुजगेन तथा विभक्त
मादाय मारुतिरमुं यदुराजपुत्रम् ।
आरुह्य तेन सह दारुकनीयमानं
यानं सुतस्य सविधं प्रययौ मघोनः ॥ 48

सेनाटवीं विविधराजमहीध्रदुर्गां
पार्थः कथंचन विलंघ्य ततस्सतर्षः ।
वीरप्रकाण्डमयपादपषण्डगुप्तं
सर्वत्र तोयमिव सैन्धवमन्विवेष ॥ 49

अस्ताद्रिमूर्ध्नि पतयालु सुदर्शनेन
स्वर्भानुनेव मिहिरस्य पिधाय बिम्बम् ।
वीरैः कृपप्रभृतिभिस्सह युध्यमान
मादिक्षदर्जुनममित्रवधाय शौरिः ॥ 50

अस्तंगतो रविरभूद्वितथप्रतिज्ञः
बीभत्सुरित्यरिभटेपु वदत्सु रोषात् ।
भास्वन्निरीक्षणसमुन्नमितं प्रवीरः
सौवीरभर्तुरलुनाद्विशिखेन शीर्षम् ॥ 51

सञ्चोदितेन हरिणा तनयेन जिष्णो
रस्त्रेण तन्नभसि पाशुपतेन नुन्नम् ।
छेदादधिक्षरितशोणितमेव शत्रोः
सन्ध्याञ्जलौ पितुरमुष्य शिरः पपात ॥ 52

सद्यः किमेतदिति सोऽपि जुगुप्समान
स्तत्पातयन्भुवि पपात विशीर्णमूर्धा ।
यः पातयिष्यति मदात्मजशीर्षमुर्व्यां
शीर्यच्छिरस्स भवितेति हराद्वरासद्या ॥ 53

पूर्वं पपात भुवि सिन्धुपतेः कबन्धं
पश्चान्नभः परिसरान्वनसिन्धुताम्रम् ।
अस्ताचलस्य विजयस्य च मूर्ध्नि तुल्यं
बिम्बं रवेर्दिविषदामपि पुष्पवर्षम् ॥ 54

शङ्खध्वनेः प्रथममेव सुरेन्द्रसूनो
राशा दशापि च यशःप्रसरः प्रपेदे ।
प्रागेव चेतसि रुषः कुरुभूमिभर्तु
रुत्सेकभाजि विललास पुनर्युयुत्सा ॥ 55

उद्युक्तपाण्डुधृतराष्ट्रभुवा भयेन
सैन्येन सैनिकमितः कलिताभयेन ।
भूयः प्रवृत्तमिभपातनतावनीकं
क्ष्वेलारवैर्गहनतां प्रययावनीकम् ॥ 56

आयोधनाङ्गणतलं द्विरदैः पतद्भि
राच्छादितं क्षतजकर्दमदिग्धदेहैः ।
तेषां च कुम्भमणिभिश्छुरितं बभासे
सन्ध्याभ्रशारमिव तारकितं विहायः ॥ 57

पक्षानिलेन पटुना मुखराऽपराशे
सञ्चारमम्बरतले चिरमाचरद्भिः ।
बाणैः पतद्भिरथ भूमिभृतां शिरोभि
र्लीनैरभावि रथकेतुवनान्तराले ॥ 58

विच्छायतामतितरां व्रजता क्रमेण
वीराननाब्जनिकरेण निरन्तराणाम् ।
भिन्नैरलक्ष्यत रथाङ्गयुगैर्लुठद्भि
स्संबाधिता सविधभूस्सगापगानाम् ॥ 59

शुण्डावतां मुखपटभ्रममादधानः
शूराग्रतो यवनिकानुकृतिं वितन्वन् ।
हस्तप्रदीपरुचिषु क्वचिदप्रगल्भः
संयद्भुवि प्रसरति स्म नवोऽन्धकारः ॥ 60

शुण्डाग्रवेष्टनविधौ विदितद्विपेन्द्रे
तत्तत्क्षतानुमितशस्त्रगणे तमिस्रे ।
अज्ञायि नेत्रकलुषीकरणेन सैन्यै
रुद्यन्ननुक्षणमनीकभुवः परागः ॥ 61

नीचोन्नतक्रममुषा तमसा घनेन
दूरीकृतस्वपरवर्मविभेदबुद्धिम् ।
भूतिं जनः क्षणमिव क्षणदामवाप्य
स्वच्छन्दवृत्तिरचिरेण घटोत्कचोऽभूत् ॥ 62

मायातिरोहितवपुर्गगनं विगाह्य
प्रौढाट्टहासरवमेदुरसिंहनादः ।
विद्वेषिणां विकिरति स्म बले बलीया
नुत्पातवारिद इवोपलवृष्टिमुग्राम् ॥ 63

उन्मीलितं विकटशाखमनोकहानां
जालं किरन्समिति जातु स यातुधानः ।
चक्रे भयाकुलभटं द्विषतामनीकं
संवर्तवात इव सागरमाकुलोर्मिम् ॥ 64

कर्णस्ततः कुरुपतेस्सुहृदो निदेशात्
कर्णान्तकृष्टगुणजृम्भितकालपृष्ठः ।
अक्षौहिणीरलघुभिश्शरतोरणीभि
र्घ्नन्तं घटोत्कचमभिद्रवति स्म वीरः ॥ 65

मायाविनं स बहुधा युधि योधयित्वा
शक्त्या ततश्शतमखार्पितया महत्या ।
वक्षस्तटे महति पातितया ससत्त्वं
क्रौञ्चं कुमार इव भीमसुतं बिभेद ॥ 66

सा बिभ्रती चमरवालमसृक्करक्तं
निष्क्रामति स्म वपुषो विमतस्य भिन्नात् ।
प्रायस्तया सह जवाद्धृतमत्सरेण
प्राणानिलेन निरगामि तथैव सद्यः ॥ 67

सा किङ्किणीरवमिषेण नभश्चरेभ्यः
प्रीत्येव पार्थमहृतं विनिवेदयन्ती ।
क्रव्यादपादपममुं भुवि पातयित्वा
वेगादगादशनिवत्पुनरिन्द्रपार्श्वम् ॥ 68

शोचत्सु पाण्डुतनयेषु सुते हतेऽस्मि-
ञ्छौरिर्निजं समिति पूरयति स्म शङ्खम् ।
पृष्टश्च तैः किमिदमित्यवगाढदुःखै-
राचष्ट वाचमथ हर्षजलाकुलाक्षः ॥ 69

अस्त्रं यदर्जुनवधाय सुरेन्द्रदत्तं
शल्यं विषाक्तमिव चेतसि नो विषक्तम् ।
दिष्ट्या तदद्य दिननाथसुतेन मुक्तं
हत्वा घटोत्कचमवाप यथापुरं स्वम् ॥ 70

तेनाधुना रहितमस्तमयूखमर्कं
शान्तार्चिषं शिखिनमात्तनखं मृगेन्द्रम् ।
आमूलभग्नरदनं मदगन्धनाग-
मुत्खातदंष्ट्रमुरगं कलयामि कर्णम् ॥ 71

शौरेरहारि वचसा मृदुशीतलेन
तेषां कृतस्थितिरसौ हृदि पुत्रशोकः ।
प्राच्यो गिरेरुदयता शशिमण्डलेन
स्त्यानस्तदा जगति नैश इवान्धकारः ॥ 72

सञ्छिद्य सर्वमपि शार्वरमन्धकारं
शस्त्रप्रहारचकिता इव चन्द्रपादाः ।
नाराचदुर्दिनभवं नभसः प्रदेशे
नालं बभूवुरिह नाशयितुं तमिस्रम् ॥ 73

सञ्चारिका इव तदा द्रुपदं विराटं
द्वावप्यमू विषमसायकविह्वलाङ्गौ ।
संप्रेषितास्सरभसं गुरुणाऽऽदरेण
स्वस्सुन्दरीभिरिषवोघटयाम्बभूवुः ॥ 74

स्वैरं नवासु नरशोणितदीर्घिकासु
स्नातोत्थिताभिरिभचर्ममयांशुकाभिः ।
पूर्णे हितैः प्रियतमैस्सह पूतनाभिः
प्रारम्भि नूतनवपासवपानगोष्ठी ॥ 75

श्रान्ति रणोद्धतविमर्दभुवं गतेन
वक्षस्सुरोपिततनूर्वहतासिपुत्रीः ।
भेजे निमीलितदृशा शरतल्पगेन
द्राघीयसी नृपकुमारगणेन निद्रा ॥ 76

उद्वेलवैरदृढबद्धरुषां बलानां
रात्रिः क्रमेण विरतिं प्रययौ न संयत् ।
राज्ञां निरीक्ष्य निधनं निजवंशजानां
विच्छायतामुपजगाम शुचेव चन्द्रः ॥ 77

दन्तक्षतैश्च करिणां नखरव्रणैश्च
वीरश्रिया विरचितैरिव भोगचिह्नैः ।
सम्भाविता नवयवाङ्कुतिनो विभाते
वीरा विलोक्य युधि विस्मयिनो बभूवुः ॥ 78

वर्माणि शस्त्रलुठितान्यवमुच्य गात्रे
ष्वामुञ्चतामभिनवानि चमूचराणाम् ।
यद्वा विलम्बनमभूत्प्रतिवीरवर्यैः
तत्कैश्चिदच्छिदुरयत्नपरैर्न सेहे ॥ 79

व्यापारिताः प्रतिभटावयवेषु योधै
र्ये हस्तलाघववशादविषक्तरक्ताः ।
ते दिग्धमूर्तय इव क्षतजेन रेजु
र्बालातपप्रसरकिञ्चुरिताः कृपाणाः ॥ 80

पाञ्चालमात्स्ययदुनायकसौमुकानां
वीरायितानि विविधानि पुरो बभूवुः ।
आसारतामपि वहन्ति वलाहकानां
सेरम्मदे शिखिनि किन्नु पयांसि कुर्युः ॥ 81

क्रुद्धेन तेन तदहश्शरताडितेषु
वीरेषु दिव्यतनुषु प्रचुरादसाभ्यः ।
प्रायस्सुपर्वतरवोऽपि सुराङ्गनाभ्यः
क्रान्तिं ययुर्वरणमाल्यसमर्पणेन ॥ 82

स्वैरं युगव्युपरतौ दहतस्त्रिलोकीं
कालानलस्य तुलया परिचुम्ब्यमाने ।
द्रोणे विशृङ्खलगतावतिवेलमाशां
प्राणेषु पाण्डुतनया विजहुर्वनेषु ॥ 83

पवनतनयेनाश्वत्थाम्नस्सनाम्नि हते द्विपे
चकितमनसा द्रोणादभ्यर्थितो मुरवैरिणा ।
पतति समिताविश्वत्थामा हतः परवारणः
स्फुटमिति गिरं राजा धर्मात्मजस्स्वयमब्रवीत् ॥ 84

स सत्यवचसो गुरुर्गिरमजातशत्रोस्तदा
निशम्य सुतवत्सलस्सपदि हा सुतेति ब्रुवन् ।
विसृज्य सशरं धनुः प्रबलशोकमुह्यन्मनाः
रथोपरि निषेदिवानभवदश्रुधौताननः ॥ 85

धृष्टद्युम्नेन सद्यस्समुपगतवता वाहिनीशस्य रोषा
दुन्मुक्तप्राणवायोः करकलितकचेनासिना मूर्ध्नि कृत्ते ।
सङ्क्षुब्धे सैन्यसिन्धौ श्रुतपितृनिधनः क्ष्मामपाञ्चालकृष्णां
कर्तुं निष्पाण्डवां च व्यसृजदरिबले द्रौणिराग्नेयमस्त्रम् ॥ 86

दग्धैकाक्षौहिणीके ज्वलितदशदिशा पार्थमुक्तेन तस्मिन्
ब्रह्मास्त्रेण प्रशान्ते सपदि गुरुसुतं रोषसंन्यस्तशस्त्रम् ।
व्योम्नः कृष्णावतारस्तरलतरजटाविद्युदुद्योतदीप्तो
द्व्यासः कान्तारवासव्यवसितमुचितैर्वारयामास वाक्यैः । 87

पुनरपि समराय व्यापृतं तं निवार्य
स्वमतिचिरसमीकक्लान्तमादाय सैन्यम् ।
नृपतिरथ निकेतं प्राविशत्सप्रकाशः
पतिरपि दिवसानां पश्चिमं वारिराशिम् ॥ 88

इत्यगस्त्यपण्डितकृतौ[1] बालभारते महाकाव्ये षोडशस्सर्गः

1. A omits पण्डित.

अथ सप्तदशस्सर्गः

अथ गुरुतनयाज्ञया परेद्यु
मुदितमनाः पृतनाधिनाथभावे ।
शुचिभिरभिषिषेच धार्तराष्ट्र
स्तपनसुतं तपनीयकुम्भतोयैः ॥ 1

अरिबलहननेन भानुसूनु
र्भरमवनेर्लघयिष्यतीति वार्ताम् ।
गदितुमिव हरिन्मतङ्गजेभ्य
स्समरमृदङ्गरवो दिशः प्रपेदे ॥ 2

वदति जयजयेति राज्ञि कर्ण
स्तदनुजधारितचामरातपत्रः ।
रथवरमधिरुह्य सञ्चचाल
क्षणकृतसन्नहनैर्बलैस्समेतः ॥ 3

किमपि कुरुचमूरनेन शोभा
मभजत हारलतेव नायकेन ।
रुचिरिव शुचिना निदाघरश्मे
र्द्रुतमतिदुस्सहतामगात्परेषाम् ॥ 4

यमवरुणनिभौ वरूथिनीशौ
यमकुरुतां दशपञ्चवासराणि ।
रिपुबलवधमेक एव युद्धे
तदधिकमह्नि चकार तत्र कर्णः ॥ 5

तपनतनयचोदितोऽपरेद्यु
बलयुगले रणभूमिभाजि भूपः ।
विजयनिधनमिच्छतोऽङ्गभर्तु
र्भव युधि सारथिरित्युवाच शल्यम् ॥ 6

स तु नृपमवदत्सरोषकम्पः
कुरुवर मामभिजातवंशजातम् ।
कथमिव सकलाभिनन्द्यसारं
कलयितुमिच्छसि सूतपुत्रसूतम् ॥ 7

अहमवमतये ध्रुवं प्रयत्ना
त्पथि कृतसत्कृतिना त्वयोपनीतः ।
न तु भवदहितप्रवासनार्थे
त्युदितगिरं तमुवाच धार्तराष्ट्रः ॥ 8

मम सुहृदमवेहि देवपुत्रं
महति महारथलक्षणोपपन्नम् ।
न भवति रथकारवंशजोऽयं
शुचि किमु शङ्खनखादुदेति रत्नम् ॥ 9

अयमतिरथसम्भवो यदि स्या
त्किमुपदिशेद्भृगुसूनुरस्त्रमस्मै ।
दनुसुतदमनाय शक्रदत्तं
धनुरपि किन्नु ददाति कालपृष्ठम् ॥ 10

तदतिशयितविक्रमस्य पार्था
त्प्रहसितगाण्डिवसारकार्मुकस्य ।
नरकजिदधिकं भवन्तमस्य
त्वरयति सारथिकर्मणे मनो मे ॥ 11

सरसिजभववत्पुरा पुरारे
भर्वति नियन्तरि मामकस्य सख्युः ।
प्रकटयितुमलं न शौर्यमग्रे
हरिरपि किं पुनरात्मजस्तदीयः ॥ 12

समुदितहृदयो जगाद राजं-
स्त्वदनुनयेन करोमि सूतकृत्यम् ।
यदहितमभिधीयते मयाऽऽजौ
तदखिलमङ्गनृपेण मर्षणीयम् ॥ 13

अथ विजयवधोत्सुकस्तदीयां
गिरमुररीकृतवांस्तथेति कर्णः ।
प्रवहण मचिरेण तस्य तेजो-
हननविधौ विहितादरश्च शल्यः ॥ 14

रथमहिमकरात्मजस्य दृष्ट्वा
रणभुवि मद्रमहीशचोदिताश्वम् ।
कुरुभिरधरवल्गादङ्गुलीकैः
प्रमुदितवद्भिरकारि सिंहनादः ॥ 15

ध्वजपटपवनावधूतपांसु
स्थगितमवेक्ष्य....पार्थसैन्यम् ।
दिवसकरसुतेन कार्मुकज्या
मभिमृशता जगदे स मद्रराजः ॥ 16

प्रथितबहुमहारथे रणेऽस्मि
त्सपदि रथं नय सूत यत्र कृष्णौ ।
अभिभवति विहाय पुष्पवन्तौ
ग्रहमपरं किमु सिंहिकाकुमारः ॥ 17

इह रणभुवि यः प्रदर्शयेन्मे
बलगहनान्तरितं प्लवङ्गकेतुम् ।
सहकरितुरगं सकोशमस्मै
सकलमहं वितरेयमङ्गराज्यम् ॥ 18

नरकमथनसारथिर्मदीयं
नयनपथं यदि याति पाण्डुसूनुः ।
तमिव विषधरामिषं विदध्या
मपि परिरक्षितमन्तकेन साक्षात् ॥ 19

अथ तमुपहसन्नुवाच शल्यो
नियतमसि स्वपरान्तरानभिज्ञः ।
त्वमतिरथसुतः क्व फल्गुसारः
क्व च सुरपुङ्गवसूनुरेकवीरः ॥ 20

द्रुपददुहितृशुल्कतां प्रयातं
पुलकितदोर्युगलेन तेन पुंसा ।
विनमितमवच्छरासनं त
त्सहशिरसा ननु मञ्चवर्तिनां नः ॥ 21

क इव विजयमन्तरेण वीरः
कबलितखाण्डवकाननं कृशानुम् ।
इह हि जगति निर्वृतिं विना यः
त्रिदशपतेश्च युधि प्रतापवह्निम् ॥ 22

तव तु भृगुसुतो गुरुस्तदीयो
गुरुरभवत्त्रिजगत्पतिर्गिरीशः ।
निजमदिशदुदग्रमस्त्रमस्मै
पटुतरगाण्डिवताडनप्रहृष्टः ॥ 23

रणधरणितलात्पलायिते प्रा-
क्त्वयि रभसेन निबध्य नीयमानम् ।
तव सुहृदमुदूढयुद्धकेलि
स्स खलु विमोचयति स्म चित्रसेनात् ॥ 24

स्वपनकरतदस्त्रलब्धमोहै
स्सह कुरुभिस्त्वयि मुक्तशस्त्रपाणौ ।
स्वपिति नियतमुत्तराजिभूमा
वधिषत यामिकतां शिवा रसत्यः ॥ 25

मणिपिटकगतं दिने दिने यं
भुजगवरं कुसुमाङ्गरागभोज्यैः ।
परिचरसि वधार्थमिन्द्रसूनो
स्स च विषसः खलु तस्य सायकानाम् ॥ 26

अयमवनमितः प्रतीपवातैः
पिशुनयतीव निवर्तनं ध्वजस्ते ।
दधति दृशममी च साश्रुमश्वा
स्तव भवितैव तदर्जुनेन भङ्गः ॥ 27

गलति हृदयतो न यावदस्रं
तव विजयाङ्कितकङ्कपत्रभिन्नात् ।
धृतिरपि महती गलिष्यति द्रा-
ङ्निशमितगाण्डिवनिस्वनस्य तावत् ॥ 28

तदतिभुजबलोष्मणा न शक्य
स्सिततुरगेण विधातुमाहवस्ते ।
किमभिभवति जम्बुको मृगेन्द्रं
मदकरिणं मशकस्तमश्च तेजः ॥ 29

इति परुषगिरं निरीक्ष्य शल्यं
समयवशादपमन्युरङ्गराजः ।
अलमिह वचसाद्य सूत जिष्णो-
र्मम च बलं कलयिष्यसीत्यवोचत् ॥ 30

अथ युधि बलयोर्विजृम्भितायां
स खलु रथी विशिखैरतीतसंख्यैः ।
अभिनदलघु राजकस्य सत्त्वं
वसुभिरिवार्थिजनस्य दुर्गतत्वम् ॥ 31

तदनु विजितवीरकुञ्जरस्य
क्षतजपयांसि चिराय पातुमिच्छोः ।
ह्रद इव पवनात्मजस्य दिष्ट्या
द्विषदनुजो विषयं दृशोर्जगाहे ॥ 32

द्रुपददुहितृवेणिबन्धमोक्षं
पिशुनयति प्रधनोत्सवे प्रवृत्ते ।
रथगिरिशिखरादवप्लुतोऽसौ
हरिरिव रङ्कुमरिं हठादगृह्णात् ॥ 33

दृढतरभुजयन्त्रमध्यभाजं
द्विषमवलोक्य जगाद भीमसेनः ।
अतिथिरसि चिरान्मदीयबाह्वो
रिह किमितःपरमाचरिष्यसीति ॥ 34

स रिपुरमुमभाषतातिवीरः
कथयसि सम्प्रति निस्त्रपः किमेवम् ।
अभिभवति मयि प्रियां त्वदीयां
सदसि न किं भवता स्थितं तदानीम् ॥ 35

रणभुवि विमतान्निरस्य सर्वा-
न्भुवमवतो नृपमौलिलालिताङ्घ्रेः ।
अभिमुखनिहतद्विषोऽस्तभीते-
र्युधि निधनं विजयाद्वरं हि पुंसः ॥ 36

इति निगदितवन्तमेनमुच्चै
स्समरभुवि प्रहसन्निपात्य भीमः ।
नरहरिरिव दानवं नखाग्रै
रुरसि विदारयति स्म धार्तराष्ट्रम् ॥ 37

शमयितुमिव संभृतं चिराय
ज्वलनममर्षमयं ज्वलन्तमन्तः ।
रिपुरुधिरजलं सुतेन वायो
रसकृदपीयत पाणिसंपुटेन ॥ 38

रस इव भुजगेन्द्रसद्मपीतः
स्वदत इति क्षतजं द्विषः प्रशंसन् ।
सभयमपसरद्भिरालुलोके
युधि कटपूतनभूतयातुधानैः ॥ 39

हतरिपुरुधिराततात्तचर्चा
परिचयताम्रवपुस्सवीरवर्यः ।
कुरुकुलविजयोद्यतेन रेजे
बहिरिव रोषकृशानुनोपगूढः ॥ 40

रुधिरमधुमदारुणाक्षमेनं
मदकरिणो गदया विदारयन्तम् ।
नभसि दिविषदां सविस्मयानां
परिषदमन्यत वीरभद्रमन्यम् ॥ 41

तदनु मृदितसर्ववीरगर्वं
विजयहतं वृषसेनमाजिभूमौ ।
अहमहमिकया शिवा व्यलुम्पं-
स्सुरवनिता अपि रक्तदोहदिन्यः ॥ 42

निजसुतहननेन रोषभाजि
प्रचलति संमुखमर्जुनस्य कर्णे ।
स बलकलकलो ययौ यदोर्ध्वं
दिवि मिलितं द्युसदां तदा विमानैः ॥ 43

सकुतुकरणदेवताकटाक्ष-
व्यतिकरितेषु परम्पराकरालम् ।
ध्वनितविजयशङ्ख्योरुदग्रं
हरिसुतयोरुभयोरभूदनीकम् ॥ 44

गगनमपि हि तं तदा पृषत्कै-
र्वलयितगाण्डिवकालपृष्ठपातैः ।
अलभत स यथा रवं वितन्व-
न्नपि निजपक्षसमीरणावकाशम् ॥ 45

झटिति निजविलोकनागताना-
मभिलषितान्यनिमेषसुन्दरीणाम् ।
विस्मृमरशरदुर्दिनावृताभ्यां
विजघटिरे हरिशल्यसारथिभ्याम् ॥ 46

मिततुरगममर्षवर्धनाय
स्मरयति पूर्वकृतान्बहून्निकारान् ।
मधुभिदि सरुषा सुतेन भानो-
र्विचकरिरे कतिचित्पृषत्कवर्याः ॥ 47

विशिखशकलितं विसृज्य वर्म
प्रतिकलमन्यदुभौ समुद्वहन्तौ ।
मुहुरुदवहतां मुखैर्व्रणानां
वपुषि रुषोन्तरदित्सयेव रक्तम् ॥ 48

तिमिरमिहिरवह्निवारिवाह-
द्विपहरिपन्नगवैनतेयरूपैः ।
हरितहयसुतौ महद्भिरस्त्रै
रतिचिरमाहवकेलिमादधाते ॥ 49

अनियतजयभङ्गमात्तजन्यौ
मुहुरभजच्च जहौ च तौ जयश्रीः ।
उभयत एव गतौ सरोजषण्डौ
ह्रद इव हंसवधूः श्रितोर्मिडोला ॥ 50

इममहिमकरात्मजो हनिष्य-
त्यमुममराधिपनन्दनो मिथस्तौ ।
इति वियति गिरो नभश्चराणां
रणमुभयोरपि पश्यतामभूवन् ॥ 51

रणमरणमिषादभिप्रवीरै-
स्सह चिरविस्मृतमण्डलावभेदैः ।
निजसुतभुजचेष्टितानि पश्यन्
न रविरबोधि रथं नभोवतीर्णम् ॥ 52

तदनु धनुषि सूनुरुष्णभानो-
श्चिरधृतशक्रसुतासुपानतृष्णम् ।
समधित गरलाग्निधूमरेखा
निभरसनायुगभीषणं भुजङ्गम् ॥ 53

विभ्रमरविषवह्निकीलजाल
द्विगुणितमौलिमणिद्युतिप्ररोहे ।
ज्वलति शमनदण्डधाम्नि तस्मिन्
खमखिलमाकुललेखलोकमासीत् ॥ 54

प्रहतविजयतूर्यघोषभिन्नं
कुरुषु तदा रचयत्सु सिंहनादम् ।
सितहयसुतकामुना हतोसी-
त्युरगमयं शरमुत्ससर्ज कर्णः ॥ 55

वियति तमवलोक्य वृष्णिवर्यो-
विजयशिरोहरणार्थमापतन्तम् ।
अतनुत शरणागतैकबन्धु-
र्भुवि रथमाक्रमणेन मग्नचक्रम् ॥ 56

अहरदथ भिया सहामराणां
मकुटमहिर्महदर्जुनस्य मूर्ध्नः ।
परिवहपवनः पुरेव शृङ्गं
फणिपतिना कृतमत्सर: सुमेरोः ॥ 57

स तमवनितले निपात्य वेगा
त्पुनरपि शीर्षजिहीर्षयाऽऽपतन्तम् ।
मधुरिपुवचसा विवृत्य बाणै-
श्शकलयति स्म मुदं च शात्रवाणाम् ॥ 58

तपनतनयसायकेन सद्य-
स्सिततुरगस्य धनुर्गुणे विलूने ।
ग्रहणघटनकर्षणान्यपश्य
त्पुनरपरस्य न कोऽपि वेगयेगात् ॥ 59

सितहयशरखण्डिताङ्गभर्तु-
ध्र्वजशिखरान्निपपात हस्तिकक्ष्या ।
मणिकिरणभरानुबन्धिनीं तां
सभयममंसत सैनिका महोल्काम् ॥ 60

क्षयरविरिव मण्डलान्मयूखं
जलनिधिशोषकरं कुरुप्रवीरः ।
द्विषदसुहरमञ्जसा निषङ्गा
दुदहरदञ्जलिकं पृषत्कवर्यम् ॥ 61

ज्वलति धनुषि तेन संहतेऽस्मि-
न्प्रकुपितकालकटाक्षजालमिले ।
निजसुतकुशलस्मृतिप्रसक्तौ
दशशतरश्मिविलोचनावभूताम् ॥ 62

रणभुवि निपपात लूनकण्ठं
सिततुरगप्रहितेन सायकेन ।
दिनकरतनयस्य मौलिभूषा-
मणिरुचिसंवलितासृगुत्तमाङ्गम् ॥ 63

विबुधकुसुमवृष्टिभिः परीतं
गलधमनिक्षतजच्छटानुयातम् ।
प्रतिहतजनदृष्टि तत्कबन्धा-
दुदितमहर्पतिबिम्बमाप तेजः ॥ 64

अथ नयनसहस्रोद्गीर्णहर्षाश्रुबिन्दु-
द्विगुणितमकरन्दस्यन्दसौरभ्यबन्धुः ।
शिरसि मकुटशून्ये कर्णशत्रोः पपात
त्रिदशपतिविसृष्टा तत्क्षणं पुष्पवृष्टिः ॥ 65

सुतनिधनशुचेव क्षीणधाम्नि प्रयाते
सवितरि चरमाद्रिं कूप्तसैन्यापहारौ ।
शिबिरमवनिपालौ शीतरोचिःकुलीनौ
ययतुरवकिरन्तौ हर्षशोकाश्रुवर्षम् ॥ 66

इत्यगस्त्यपण्डितकृतौ बालभारते महाकाव्ये
सप्तदशस्सर्गः

अथाष्टादशस्सर्गः

प्रगे हतानुजसुहृदापि भूभुजा
पृथासुतैस्सममथ सन्धिमिच्छतः ।
कृपस्य नाद्रियत वचो युयुत्सुना
विपत्स्वपि स्थिरधिय एव मानिनः ॥ 1

अयं कृती गुरुतनयस्य शासना
चमूपतिं व्यतनुत मद्रनायकम् ।
स चाद्दतस्समगिरताधिविक्रमः
ससारथिर्युधि हननं किरीटिनः ॥ 2

बलैस्ततः कृतघनहर्षनिस्वनैः
प्रकम्पयन्निव चलितैर्वसुन्धराम् ।
अधिष्ठितः कुरुपतिराहवाजिरं
यथापुरं विमतचमूमयोधयन् ॥ 3

समीरिता बलवदमर्षवायुना
वरूथिनीपतिमभिगम्य कौरवम् ।
चमूर्भृतो दिशि दिशि भङ्गमाययु
स्तटक्षमाधरमुदधेरिवोर्मयः ॥ 4

चमूरजःपरिवृतखे नभश्शिखां
ध्रुवं गते सवितरि धर्मसूनुना ।
स जित्वरो रणभुवि शक्तिपाणिना
न्यहन्यत ज्वलनभुवेव तारकः ॥ 5

महीभुजा प्रकटितहस्तकौशलम्
स्वशक्तितस्सुमहति शल्य उद्धृते ।
उपागतप्रचुरतराङ्गपीडया
प्रहृष्टया समजनि पाण्डुसेनया ॥ 6

अनायकं गतमतिकान्दिशीकता
मनाविकं प्लवमिव मारुताकुलम् ।
न्यवारयन्निजबलमाश्रितद्विपः
पतिर्विशां प्रकटितपन्नगध्वजः ॥ 7

विशृङ्खलं विशसितशेषमर्जुने
निवर्हयत्यलघुबलं सुशर्मणः ।
शरोत्करैस्समिति यमोपमौ यमौ
निजघ्नतुश्शकुनिमुलूकमप्युभौ ॥ 8

समानतां प्रथममवाप कौरवी
वरूथिनी युगविगमाम्बुराशिना ।
अनन्तरं त्रिपथगया तुलामया-
त्तपागमह्रदसमतां ततो ययौ ॥ 9

किरीटिना युधि निहतेषु यन्नृषु
स्वयं समाकलिततदीयकर्मभिः ।
भयाकुलैर्दिशि दिशि दत्तदृष्टिभिः
प्रदुद्रुवे कृपगुरुसूनुसात्वतैः ॥ 10

हते बले महति भयेन विह्वलः
पलायितस्सरसि ममज्ज कौरवः ।
निपातिते कुलिशभृता गिरिव्रजे
निधावपामिव हिमभूधरात्मजः ॥ 11

क्रुधाकुलः कुरुकुलपद्मकुञ्जरो
मधुद्रुहा सह सहजैश्च मारुतिः ।
गवेषयन्प्रतिभटमभ्रमद्रथी
समन्ततस्सपदि समन्तपञ्चकम् ॥ 12

कृतानतिस्त्वरितमुपेत्य कश्चन
न्यवेदयत्पवनसुताय वासिकः ।
सरस्तटे नरपतिलक्षणाङ्कितां
निरूपितां नवपदपङ्क्तिमात्मना ॥ 13

निशम्य तद्वचनमतिप्रहृष्यता
पुरस्कृतं तदनु यथा बकारिणा ।
सलक्षणान्यहितपदानि पश्यता
सहापरैस्त्वरितमवापि तत्सरः ॥ 14

तदन्तरस्थितमवगम्य वैरिणं
वृकोदरः कृतघनगर्जितोऽवदत् ।
हतानुजश्शमयसि शोकपावकं
सरोऽम्भसा न तु शितशस्त्रधारया ॥ 15

इति ब्रुवञ्छकुनियुतं विगाह्य त
न्मानस्विना कुरुपतिना सनाथितम् ।
व्यलोडयद्बहलहरिप्रचारव
न्महाभुजो बलमिव शात्रवं सरः ॥ 16

द्विषा मधोरिव पवमानसूनुना
विलोडितं ह्रदमपहाय निर्ययौ ।
अमर्षतः कुरुपतिरुद्धतं श्वसन्
कलिन्दजागत इव कालियोरगः ॥ 17

सरस्वतीसविधतपोवनागतं
हलायुधं गुरुमभिवन्द्य सादरम् ।
बकारिणा कुरुपतिना च दारुणं
गदारणं त्रिदशनुतं प्रचक्रमे ॥ 18

तयोस्तदा दृढतरबद्धकक्षयो
रुदञ्चितभ्रमितगदाकरालयोः ।
प्रकम्पितक्षिति चरतोश्च मण्डलै
र्वपुर्ययौ सुभटजनैकदृश्यताम् ॥ 19

मिथोगदायुगलविघट्टितोत्थिता
खराहतिर्ज्वलनकणानुषङ्गिणी ।
क्षणद्युतिव्यतिकरतोऽशनिध्वनि
व्यडम्बयद्भयचकिताप्सरश्श्रुता ॥ 20

यदा यदा नृपमजयद्वृकोदर
स्तदा तदा हलहलितं चमूचरैः ।
यदा यदा व्यजयत तं सुयोधन
स्तदा तदा न चमदकारि चारणैः ॥ 21

निजप्रियानिकृतिविधेस्सभान्तरे
रणक्षितावनुजवधस्य चोभयोः ।
अतिक्रुधौ सदृशमनीककौशलं
विवव्रतुस्तुहिनकरान्वयावुभौ ॥ 22

गदाहतिस्रवदसृगाप्लुताकृतिं
चमूचरा गतमभिभावनीयताम् ।
वृकोदरं प्रबलतया विजज्ञिरे
सुयोधनं समधिकया च शिक्षया ॥ 23

जितश्रमक्षितिपवधे पटीयसे
निजं मुखं पवनसुताय पश्यते ।
असूच्यत प्रतिभटसक्थिभञ्जनं
मधुद्विषा करपुटताडितोरुणा च ॥ 24

उपेयुषा प्रहरणमोहविप्लवं
खमुत्पतन्नथ गदया तरस्विना ।
अभज्यत क्षितिपतिरूरुदण्डयोः
पतत्त्रयोस्सुरशिखरीव वज्रिणा ॥ 25

बकद्विषा क्षणदलितोरुमण्डलः
क्षितौ पतन्ननुहरते स्म पार्थिवः ।
गरुत्मता फणधरमर्धखण्डितं
सुरद्रुमं क्षयमरुता च मोटितम् ॥ 26

अशेषभूवलयविभुत्वसम्भृतैः
पवित्रिते भृशमभिषेकवारिभिः ।
गते परप्रणतिकलानभिज्ञतां
पदेन तं शिरसि जघान पाण्डवः ॥ 27

गदाहवेष्वनुचितमूरुभञ्जनं
पदा शिरस्यभिहननं च भूपतेः ।
अमर्षयन्ननिलभुवो जिघांसया
समुद्यतो हलभृदवारि शौरिणा ॥ 28

अथासकृत्कृतजयशङ्खनिस्वना
भुजाबलादधिगतराज्यसम्पदः ।
बलैस्समं विजयिभिरुच्छ्रितध्वजं
पृथासुताशिशिबिरमभिप्रतस्थिरे ॥ 29

गते दिने परिणतिमागतः कृती
गुरोस्सुतः कृपकृतवर्मसङ्गतः ।
रणाङ्गणे हतनरवाजिकुञ्जरे
गवेषणं कुरुवसुधापतेर्व्यधात् ॥ 30

ततस्सरस्तटभुवि तं व्यलोकयद्
द्विषद्गदामुखदलितोरुमण्डलम् ।
त्विषां पतेरवतरतो नभःपथा
ध्रुवं रथात्पतितमिवारुणं क्षितौ ॥ 31

उपेयुषामुपरि मृषातपत्रतां
पतत्त्रिणामविरतवारणाकुलम् ।
शुनां पुरः परिजनवन्निषेदुषां
विभर्त्सनं विदधतमग्रपाणिना ॥ 32

सुहृत्सुतानुजगुरुबन्धुभिर्हतैः
शिवाशताकुलितवपुर्भिराचिते ।
उदश्रुवाःकणनिचिताग्रपक्ष्मणी
विलोचने विदधतमाहवस्थले ॥ 33

त्रिभिश्च तैर्निकटगतैरुदश्रुभिः
पतिः क्षितेरनुशुशुचे तथाविधः ।
अलं शुचा सुभटवरा इति ब्रुवन्
व्यधत्त तान्विदितगदायुधक्रमान् ॥ 34

निशम्य तामनुचितकारितां द्विषो
रुषा दृशौ दधदधिकं कषायिते ।
स्फुटाधरस्फुरणविसंस्थुलाक्षरं
वचोऽवदद्गुरुतनयः कुरूद्वहम् ॥ 35

अयं जनः क्षितिप भवन्निदेशभा
गिमौ भुजाविव कलयन्महारथौ ।
प्रविश्य तच्छिबिरमुदग्रविक्रमो
निशि ध्रुवं तव निहनिष्यति द्विषः ॥ 36

निशम्य तद्वचनमतिप्रहृष्यतो
निदेशतः कनकशिरस्त्रसम्भृतैः ।
सरोजलैरतनुत तस्य गौतमः
पताकिनीरमणपदेऽभिषेचनम् ॥ 37

द्विषद्वधश्रवणसुखादनन्तरं
विभूषयेर्दिवमिति भूपतिं ब्रुवन् ।
रथी ययौ सहकृपभोजपुङ्गव
श्चमूपतिर्विमतनिवेशसम्मुखः ॥ 38

लयस्पृशि स्वकिरणबन्धुसन्ततौ
नभस्स्थलीं रणवसुधामिव त्यजन् ।
पतिस्त्विषां सपदि ममज्ज पश्चिमे
पयोनिधौ सरसि यथा सुयोधनः ॥ 39

अनेहसा धृतनवसान्ध्यतेजसा
तमश्छटा दिशि दिशि भृङ्गकान्तयः ।
बबन्धिरे रिपुरुधिरार्द्रपाणिना
बकारिणा द्रुपदवधूकचा इव ॥ 40

पथि व्रजन् गुरुतनयः पृथाभुवां
जिघांसयाभिमुखयितुं पुरान्तकम् ।
प्रभावतस्समुपनते सकार्मुकं
निजं वपुर्ज्वलति जुहाव पावके ॥ 41

प्रसेदिवान्पुररिपुरस्य साहसा
स्कृपानिधिः कमपि कृपाणमुद्वहन् ।
स्वविग्रहान्तरमपि तेजसानलं
हतप्रभं विदधदधत्त सन्निधिम् ॥ 42

पुरस्फुरन्मुकुटमृगाङ्कचन्द्रिका
जलप्लुतोऽनलपरितापिताकृतिम् ।
कृताञ्जलिं कृतिनमुदीरितस्तुतिं
जगाद तं जगदधिभूर्जयैषिणम् ॥ 43

अनेन ते मुदमविधत्स्वकर्मणा
गतोऽस्म्यहं द्युतिमहतामुनासिना ।
विना जगत्प्रथितगुणांस्तु पाण्डवान्
द्विषोऽखिलांत्सपदि निबर्हयिष्यसि ॥ 44

इति ब्रुवन्नसिमुपनीय धूर्जटि
र्गलप्रभाभरमिव खड्गतां गतम् ।
तिरोदधे स च मुदितस्तदायुधं
करस्थितं सफलममंस्त काङ्क्षितम् ॥ 45

जितद्विषामिह निशि वस्तुमत्र वो
न युक्तमित्यसुररिपुस्ससात्यकिः ।
निनाय तान्छिबिरभुवो बहिः क्वचि
द्दूरं हि तत्सुतनिधनं तु तद्वधात् ॥ 46

स विस्मयाकुलकृपसात्वतान्वितः
स्वपज्जनं शिबिरमपश्यदग्रतः ।
उपेक्षितं मधुरिपुणापि रक्षिणा
युगात्यये जगदिव कालभैरवः ॥ 47

विनिर्यतां हननविधौ नियुज्य तौ
शिखण्डिमच्छिबिरमविक्षदुद्धतः ।
सहेतिमान्यदुकुरुवीरपुङ्गवौ
पुरा हुताशन इव खाण्डवं वनम् ॥ 48

समुद्वहन्पशुपतिदत्तमायुधं
बहु क्षमारमणकुलक्षयोद्यतः ।
स रेणुकासुत इव हैहयप्रभोः
पितृद्विषः प्रथममवापदास्पदम् ॥ 49

स रोषणः पटमयवेश्मनि क्वचि
द्वितानिते सुखशयितं विरोधिनम् ।
व्यलोकयन्मृगमदपङ्कचर्चितं
वनद्विपं मृगयुरिवाद्रिकन्दरे ॥ 50

उपस्थिते तव मयि जीवितान्तके
कथं त्वयापशद सुखेन सुप्यते ।
इति ब्रुवन्पदहननेन वक्षसि
प्रबोधितं सुचिरममुं न्यपोथयत् ॥ 51

गुरुद्रुहो भवति मृतिर्न शस्त्रत
स्तवेत्यमुं यमकरपाशकल्पया ।
धनुर्ज्यया सुदृढनिपीडिताद्गला
त्कथंचन व्यपगतजीवितं व्यधात् ॥ 52

कृतार्थतां कलयति वैरशुद्धित
स्ततो विनिर्गतवति सिंहनादिनि ।
विनिद्रतां शिबिरजनाः प्रपेदिरे
वनौकसः श्रुतघनगर्जिता इव ॥ 53

तरस्विनि त्रिपुरभिदाज्ञयोद्धते
निजागमं कलयति वीरभद्रवत् ।
दधुर्भयं कतिचन केचिदायुधं
प्रजापतिक्रतुमिलिता इवामराः ॥ 54

ससम्भ्रमाः कतिचन तत्र सैनिकाः
शिरस्त्रमित्यदधत मूर्ध्नि कञ्चुकम् ।
दधुर्धनुर्धनुरिति वादिनो गदां
रथभ्रमादधिरुरुहुर्मतङ्गजान् ॥ 55

समागतान्द्रुतमथ पञ्च वर्मिता
नुदायुधान्द्रुपदसुतात्मजन्मनः ।
द्विषत्कुलं ग्रसनपरोऽयमादधे
धृतोष्मणा गुरुतनयासिराहुतीः ॥ 56

तरस्विना दिशि दिशि खड्गधारया
व्यभिद्यत प्रतिभटशस्त्रसंहतिः ।
युगावधाविव कपटेन पोत्रिणा
स्वघोषया जलनिधिवीचिसंहतिः ॥ 57

निरन्तरं निशितमुखैर्निजं वपुः
शिलीमुखैरपि दधतश्शिखण्डिनः ।
स निम्नगातनयरिपोर्वधाद्यथा
मुदं दधौ न खलु तथा गुरुद्रुहः ॥ 58

बहिःस्थितौ कृपहृदिकात्मजावुभौ
धनुर्गुणध्वनिभृतविश्वदिङ्मुखौ ।
भयाकुलानपि शिबिराद्विनिर्यतः
शितैः शरैः प्रविदलयाम्बभूवतुः ॥ 59

तरस्विभिस्त्रिभिरनघैर्निजायुधै
    र्विदारितद्विरदतुरङ्गसैनिकात् ।
निवेशतः खरकिरणालि केवलं
    विनिर्गतं रुधिरतरङ्गिणीशतम् ॥ 60

त्रिभिश्च तैरिति गजवाजिपङ्क्तिभि
    र्निरन्तरे रिपुशिबिरे निबर्हिते ।
विलोकितं न किमपि तत्र सञ्चर
    त्कुलं विना पिशितभुजां तु रक्षसाम् ॥ 61

परामृशन्नसकृदसृग्भिराचितां
    कृपाणिकां कृपहृदिकात्मजस्सुतः ।
पुनस्सरस्तटभुवमेत्य स व्यधा
    च्छ्ताहितक्षयसुखिनं सुयोधनम् ॥ 62

महारथास्समिति भवद्भिरद्य मे
    कृतं प्रियं न गुरुपितामहादिभिः ।
रणश्रमव्यपनयनाय गम्यता
    मिति ब्रुवन्व्यसृजदसावसूनपि ॥ 63

कृपे वधूकरुणविलापि कौरवं
    पुरं गते हृदिकसुते च यादवम् ।
पराशरप्रभवतपोवनं गतः
    शमं व्रजन् गुरुतनयोऽस्त्रमत्यजत् ॥ 64

गता पृथासुतबलकालरात्रिताम्
    महारथत्रयचरितैकसाक्षिणी ।
रणक्रतोरवभृथतामुपेयुषी
    क्रमेण सा क्षयमगमन्निशीथिनी ॥ 65

उषस्यथ द्रुपदसुतस्य सारथे
रुपागतादधिगतबन्धुतावधः ।
सहानुजैरशुचमवहन्महीपति
र्न कस्य वा नियतिरुपैति वक्रताम् ॥ 66

उपेत्य तच्छिबिरमुदीक्ष्य पार्षती
हताखिलाग्रजसुतबन्धुमूर्छिता ।
पुलोमजा दनुजवरूथिनीगजै
र्विमर्दितद्रुममिव नन्दनं वनम् ॥ 67

विबुध्य सा व्यजनमरुत्किशोरकै
श्चिरादुरोहननपरेण पाणिना
प्रमार्जयन्त्यतिशयरोदनारुणां
जलप्लुतं दृशमवदन्मरुत्सुतम् ॥ 68

सुतद्विषस्समिति जितस्य जीविता
दपि प्रियं हर सहजं शिरोमणिम् ।
न चेद्व्रतं निरशनमाश्रिता हता
नयं जनो नियतमसून्विमोक्ष्यति ॥ 69

अथास्थितस्स नकुलसारथिं रथं
धनुर्धरो रिपुरथवर्त्मना ययौ ।
तमन्वगात्तदनु तदग्रजानुजौ
निजं रथं द्रुतमधिरोप्य माधवः ॥ 70

त्रिभिस्स तैर्गुरुसुतशौर्यभीतिभि
र्निवारितोऽप्यसकृदमर्षचोदितः ।
रथस्वनश्रुतिकुतुकापयन्मृगं
वृकोदरो महितमवापदाश्रमम् ॥ 71

स तत्र तं बहुदिवसाहिताहवं
विरोधिनं धृतकुशचीरवाससम् ।
स्वहेतिभिः कबलितविष्टपत्रयं
युगक्षयानलमिव शान्तमैक्षत ॥ 72

तमभियान्तमुदीक्ष्य तरस्विनं
परुषवाचमसौ तरसान्वितम् ।
प्रकटमन्युरपाण्डवमस्त्विति
प्रयुयुजे परमास्त्रमिषीकया ॥ 73

ज्वलदाप तदाशु तद्विलोक्य
त्रसता दानववैरिणा नियुक्तः ।
विजयः प्रशमार्थमस्य धीमा
नमुचद्ब्रह्मशिरोऽभिधानमस्त्रम् ॥ 74

द्रुहिणतनयो व्यासश्चोभौ विलोक्य महास्त्रयो
र्विहितवसतिमध्ये मत्तेभयोरिव देशिकौ ।
तदनुनयतः पार्थेनास्त्रं निजं प्रतिसंहृतं
न खलु महतामाज्ञां सन्तो विलङ्घयितुं क्षमाः ॥ 75

द्रौणिस्तु नारदपराशरनन्दनाभ्या
मभ्यर्थितस्सुकृतिनः परिवर्ज्य पार्थान् ।
गर्भे विराट्सुतया विधृते तदीये
मोक्तुं चकाङ्क्ष निजमप्रतिघातमस्त्रम् ॥ 76

तं तु प्रत्युज्जीवयिष्यन्प्रभावा
त्तस्मिन्छौरिर्द्रोणिनोऽस्त्रं निपात्य ।
भ्रूणघ्नस्ते शून्यकान्तारवासः
शश्वद्भूयादित्यदाच्छापमस्मै ॥ 77

शापोपसृष्टमहसो मणिमस्य हृत्वा
मन्त्रक्षतौजस इवाहिपतेः शिरस्तः ।
सभ्रातृकस्सह यदुप्रवरेण भीमः
प्रत्यागतश्शुचमनेन जहार पत्न्याः ॥ 78

इत्यगस्त्यपण्डितकृतौ बालभारते महाकाव्ये
अष्टादशस्सर्गः

अथैकोनविंशस्सर्गः

निशम्य पुत्रान्निहतान्नृपांश्च
विगाढशोकं विलपन्तमुच्चैः ।
व्यासो वचोभिर्विदुरश्च तैस्तै
राश्वासयामासतुराम्बिकेयम् ॥ 1

प्रतिष्ठमाने रणभूमिमस्मि
न्दिदृक्षवो बन्धुजनं रुदत्यः ।
पुरान्निरीयुः प्रविकीर्णकेशा
गान्धारपुत्रीं परिवार्य नार्यः ॥ 2

वीणानिनादानुकृतिप्रवीणै
रापूरयन्त्यः करुणैर्दिगन्तान् ।
हा नाथ हा मातुल हा तनूज
हा तात हा भ्रातरिति प्रलापैः ॥ 3

उरोहढास्फालनजायमानं
प्रत्यप्रकाश्मीरविलेपकल्पम् ।
करारविन्देभ्य इव स्तनेषु
लग्नं वहन्त्यः परिपाटलत्वम् ॥ 4

निरञ्जनक्लेदनितान्तशुभ्रैः
पयोधराग्रेषु निपत्य शीर्णैः ।
कदुष्णतामश्रुभिरश्नुवानै
र्मार्गेषु पांसुप्रशमं नयन्त्यः ॥ 5

तमापतन्तं पथि पाण्डुसूनुः
पितृव्यमालोकयितुं चचाल ।
पाञ्चालमुख्यक्षितिपालदारै
रात्तप्रलापैरनुगम्यमानः ॥ 6

अजातशत्रो नृप धर्मपुत्र
लब्धेन सर्वांश्च निहत्य बन्धून् ।
राज्येन किं नाम फलं तवेति
क्रन्दद्वधूबृन्दमपश्यदग्रे ॥ 7

विलङ्घ्य तत्सोऽतिविषण्णचेता
ददर्श तं पुत्रविहीनपार्श्वम् ।
निकृत्तशाखानिवहेन साम्यं
स्तम्भावशेषेण गतं द्रुमेन ॥ 8

तं भ्रातरः शोकविलुप्तधैर्यं
पञ्चापि पञ्चाननशौर्यभाजः ।
निजानि नामानि निवेदयन्तः
शिरोभिराश्लिष्टभुवः प्रणेमुः ॥ 9

अजातशत्रुं परिरभ्य पूर्व
मन्विष्यतः पुत्ररिपुं मुरारिः ।
विकृष्य भीमं प्रतिमां तदीया
मयोमयीमस्य पुरो वितेने ॥ 10

तां भीमबुध्या भुजमध्यभाजं
भङ्क्त्वा परिष्वङ्गनिभेन शान्तम् ।
हा भीमसेनेति कृतप्रलापं
जगाद पृथ्वीपतिमम्बुजाक्षः ॥ 11

अलं शुचा त्वत्सुतकारितोऽय
मयोमयो वायुसुतो न साक्षात् ।
तव क्रुधः पुत्रवधोत्थितायाः
शान्त्यर्थमानायि मया नियोज्यैः ॥ 12

श्रुत्वा वचस्तस्य परं प्रहृष्टः
पुत्रान्परिष्वज्य वृकोदरादीन् ।
अजातशत्रुं सुबलात्मजायां
विलोकनायादिशति स्म भूपः ॥ 13

सा तेन राज्ञी ददृशे परीता
कृतार्तनादेन वधूजनेन
वृन्देन चक्राह्वयसुन्दरीणां
दिनावसाने नलिनीव दीना ॥ 14

तां च क्रुधा पुत्रवधाज्ज्वलन्तीं
समुद्यतां शप्तुमजातशत्रुम् ।
न्यवारयत्तत्सुतवृत्तशङ्की
तपोधनो गन्धवतीतनूजः ॥ 15

कुरूद्वहस्तां कुपितां विदित्वा
भीतः पुरः प्राञ्जलिराबभाषे ।
क्रूरं हतभ्रातृसुहृत्सुतं मां
शापोचितं मातरि मा शपेति ॥ 16

तां मन्दमन्युप्रसरां प्रणम्य
स्थितामदूरे जननीं जनेशः ।
शोकप्रमोदौ दधती ददर्श
द्यां पर्वणीवोष्णहिमांशुबिम्बौ ॥ 17

वीरप्रसूरानमतः क्रमेण
सङ्ग्रामलक्ष्मीपरिरम्भधन्यान् ।
प्रवीरशस्त्रव्रणभूषणेषु
पस्पर्श गात्रेषु चिराय पुत्रान् ॥ 18

तत्रोभयेषामपि भूपतीना
मन्तःपुराण्याहितमण्डनानि ।
अकङ्कणाभिः करवल्लरीभि
राश्लिष्टकण्ठानि मिथो विलेपुः ॥ 19

आर्तप्रलापाक्षरगर्भितानि
बाष्पायमाणारुणलोचनानि
ननन्द पश्यन्नरिसुन्दरीणां
मुखारविन्दानि समीरसूनुः ॥ 20

ततः पुरस्कृत्य सुजातकीर्ति
विशाम्पतिं वृद्धमजातशत्रुः ।
यूनामरातिक्षितिभृत्पशूनां
घोरामनीकक्षितिमाससाद ॥ 21

गृहाङ्गणे सप्रसवोपहारे
स्त्रीणामदूयन्त पदानि यासाम् ।
ता बभ्रमुश्शस्त्रशतावकीर्णे
रणाजिरे बन्धुजनं विचेतुम् ॥ 22

स्वेनप्रवासावसरे वितीर्णं
नखक्षतं वक्षसि वीक्ष्य नव्यम् ।
निरन्तरास्त्रव्रणदुर्निरूपं
निजं प्रियं काचन निश्चिकाय ॥ 23

शस्त्रव्रणेषु ग्रसितुं यकृन्ति
खगैर्विशद्भिश्चलिताङ्गमन्या ।
सजीव इत्यासददात्मनाथं
पदैः प्रहर्षेण परिस्खलद्भिः ॥ 24

कबन्धभावं गमितः परेण
विहङ्गदूरापहृतोत्तमाङ्गः ।
निजः कयाचिन्निपुणं विजज्ञे
नामाङ्ककेयूरयुगेन नाथः ॥ 25

मुग्धा परा जीवितवल्लभस्य
वामेतरे दोष्णि शिवोपभुक्ते ।
तच्छङ्कया वारणहस्तदण्डं
निवेशयामास यथाप्रदेशम् ॥ 26

विलूनगात्रं लवशः पृषत्कै
राराददृष्ट्वा हृदयेशमेका ।
उत्खाय मातङ्गशिरोनिखातं
प्रासं तदीयं दृढमालिलिङ्ग ॥ 27

गजेन्द्रशुण्डावलयान्तरस्थं
परेयिवांसं पतिमीक्षमाणा ।
सस्मार काचित्सुरतान्तरेषु
निजोरुसंवेष्टनमध्यभाजम् ॥ 28

भर्तारमेका गजपुङ्गवस्य
दन्तद्वयप्रोतभुजान्तरालम् ।
खड्गप्रहारोत्थितकुम्भमुक्ता
जालाभिवृष्टाननमभ्यनन्दत् ॥ 29

देवेन पङ्केरुहलोचनेन
वितीर्णया दिव्यदृशातिघोराम् ।
रणक्षितिं वीक्ष्य तमन्तिकस्थं
गान्धारनाथस्य जगाद पुत्री ॥ 30

पश्याग्रतः पङ्कजनाभ ताव
दसौ हतः शन्तनुनन्दनेन ।
अधोमुखत्वं गतवानिरावा
न्पातालगर्भं विशतीव भूयः ॥ 31

इतो यदुश्रेष्ठ विलोकयैनं
विसृत्वरैरस्त्रशिखाकलापैः ।
विरोधिसेनाविपिनानि दग्ध्वा
शान्तार्चिषं शान्तनवं कृशानुम् ॥ 32

सुयोधनावर्जितमेष हित्वा
निषेव्य पार्थास्त्रवितीर्णमम्भः ।
सुखेन शेते शरतल्पमध्ये
बाणां स्तदीयानुपधाय वीरः ॥ 33

पुरन्ध्रयः पुण्ड्रकभूमिभर्तुः
शरीरखण्डान्विशिखै र्विकीर्णान् ।
विचिन्त्य भक्त्या विनिवेशयन्ति
सीमन्तशून्येषु शिरस्सु बालाः ॥ 34

कुलाङ्गना स्कन्धगतं गजस्य
कालिंगमालिङ्गितुमुत्सुकेयम् ।
विभाति विन्यस्तपदा रदाग्रे
गतेव भूरादिवराहदंष्ट्राम् ॥ 35

पिशाचिका काचन काशिभर्तु
नींतं शिरो विभ्रमकन्दुकत्वम् ।
अभ्यर्थिने तत्प्रमदाजनाय
ददाति भूयो दयमानचेताः ॥ 36

मध्ये गजानां मगधाधिनाथं
गवेषयन्तीं महिषी तदीया ।
क्वचिच्च दृष्टा क्वचिदप्यदृष्टा
विद्योतते विद्युदिवाभ्रवृन्दे ॥ 37

पराङ्मुखतां प्राप्तवतोऽधुनापि
प्रफुल्लपद्मद्युतिलक्षणस्य ।
गृध्रैरवेक्ष्याननमर्धजग्धं
यात्यष्टमीयामवतीशसाम्यम् ॥ 38

आपुङ्खमग्नामुरसः कथंचि
दुत्खाय बाणावलिमुत्तरेयम् ।
आजिघ्रती सस्पृहमाननेन्दौ
त्वदीयमालिङ्गति भागिनेयम् ॥ 39

विन्दानुविन्दौ विजयास्त्रमग्ना
विमौ धरित्रीगतबाहुशाखौ ।
त्वया पुरा शैशवपातिताभ्यां
तुलां दधाते यमलार्जुनाभ्याम् ॥ 40

अमी तु भूरिश्रवसोऽवरोधा
विमोच्य मुष्टेः प्रसभं कृपाणम् ।
प्रत्येकमुद्यत्पुलकेषु भर्तुः
कुर्वन्ति हस्तं कुचमण्डलेषु ॥ 41

सीमन्तनिर्मातृनखाग्र एष
व्यग्राङ्गुलीकस्तिलकक्रियायाम् ।
आमोदितश्चागरुणो विलेपा
द्वक्षोजयोर्धन्यतरो वधूनाम् ॥ 42

ममात्मजा माधव दुश्शलेयं
पार्श्वे शिरस्सिन्धुपतेरदृष्ट्वा ।
अन्यानि सन्धाय मुहुः कबन्धे
नैतान्यमुष्येति विषादमेति ॥ 43

निजं कुमारं निहतं हिडिम्बा
निरीक्ष्य मूर्छाकुलिताकुलाक्षी ।
निशाचरीभिः क्षतजोक्षितेयं
संवीज्यते कुञ्जरकर्णतालैः ॥ 44

केशेष्वभेदं पलितेन याते
सवेगमादाय निरूप्य सम्यक् ।
स्वभर्तृशीर्षे परिवर्तयन्ति
मिथो विराटद्रुपदावरोधाः ॥ 45

पादौ गुरोरत्र परार्ध्यभूम्नः
कदम्बकं कर्षति जम्बुकानाम् ।
अजातशत्रुप्रमुखेन पूर्वं
यौ शिष्यवर्गेण शिरोभिरूढौ ॥ 46

पराभिमर्शप्रभवेन नूनं
व्रीडेन सम्मीलितलोचनान्तम् ।
प्रक्षालयत्यश्रुभिरस्य पत्नी
रजोभिराधूसरमुत्तमाङ्गम् ॥ 47

पर्यस्तदेहो विजयद्विपस्य
कुम्भस्थले दृश्यत एष पाण्ड्यः ।
द्रोणात्मजेषुत्रुटितस्य मूर्ध्नो
जिघृक्षयेव प्रविलम्बिबाहुः ॥ 48

दुश्शासनस्येदमुरो विशालं
विदारितं मारुतनन्दनेन ।
हाराश्मरश्मिच्छुरणच्छलेन
निपीतशेषं क्षरतीव रक्तम् ॥ 49

करावमुष्य द्रुपदात्मजायाः
केशाम्बराकर्षणदुर्विदग्धौ ।
पृथासुतानां हितकारिणेव
च्छित्वा शकुन्तप्रकरेण कृष्टौ ॥ 50

आशङ्क्य यस्माद्विपदं सचिन्तो
लेभे दश त्रीणि च हायनानि ।
न जातु संवेशमजातशत्रुः
स एष कर्णो निहतोऽत्र शेते ॥ 51

इयं तु वीरा वृषसेनमाता
शिरो निधायाङ्कभुवि स्वभर्तुः ।
करेण कम्पाङ्गुलिपल्लवेन
प्रमार्ष्टि पांसुच्छुरितं कपोलम् ॥ 52

त्रासाकुला मन्दिरबर्हिणीनां
क्रीडामृगाणामुपसर्पणेऽपि ।
स्नुषा ममैताः प्रियगात्रलग्ना
नुत्सारयन्तीह खगान्सृगालान् ॥ 53

इतश्च दुर्योधन एव शेते
सुपर्वमुक्तप्रसवाभिवृष्टः ।
सरस्तटे लोहितचन्दनार्द्रां
प्रियामिवालिङ्ग्य गदां प्रवीरः ॥ 54

पुरा निबद्धाञ्जलयो नरेन्द्रा
यत्पार्श्वयोरासत चाटुकाराः ।
तदन्तिके हन्त सृगालसंघा
वसन्ति हृष्टा विरसं रसन्तः ॥ 55

मोहावसाने विविधं विलप्य
धैर्यं व्रजन्त्या किल भानुमत्या ।
अङ्के धृतस्य क्रियतेऽस्य भर्तुः
स्वेनैव चेलाञ्चलमातपत्रम् ॥ 56

ध्रुवं व्यथादुःखपरम्पराहाँ
मां वज्रसारेण सरोजयोनिः ॥
यदेनमेवंविधमद्य पापा
दृष्ट्वा विशीर्ये न सहस्रधाहम् ॥ 57

उपेक्षया ते भरतान्ववायाः
मिथो यथैते निधनं प्रपन्नाः ।
तथा भजन्तां यदवोऽपि सर्वे
भवांश्च भूयाद्वनसीम्नि मुक्तः ॥ 58

शप्त्वैवमेनं शतपत्रनाभं
गांधारपुत्री विरराम वाचः ।
सोऽपि प्रसादं मनुते स्म शापं
भारावताराय भुवोऽवतीर्णः ॥ 59

क्षत्त्रा नियुक्तो नृपपुङ्गवेन
धौम्यं पुरस्कृत्य सभृत्यवर्गः ।
न्यवेशयत्सागरुचन्दनेषु
चिताहुताशेषु हतानशेषान् ॥ 60

दग्धेषु देहेष्वनलेन राज्ञां
क्षयाग्निनेवाद्रिषु तादृशेषु ।
वृद्धं पुरस्कृत्य नृपं नरेन्द्रो
गङ्गापगां स्नातुमनाः प्रतस्थे ॥ 61

आक्रन्दसन्नस्वरमारटन्त्यो
नरेन्द्रपत्न्यस्तमनुव्रजन्त्यः ।
पदैरनीकक्षितिशोणितार्द्रै
रलक्तकाङ्कामिव गां वितेनुः ॥ 62

शान्तिं गते शान्तनवे शुचेव
विलापिनीं सारसनिस्वनेन ।
अवापुराश्वासयितुं किलैते
भागीरथीं भारतवंशधुर्याः ॥ 63

स्त्रीणां तदा मज्जनतत्पराणा
मायामिनीभिः कबरीभिरासाम् ।
कलिन्दजाया इव वेणिकाभि
र्दिव्यापगाऽदृश्यत कर्बुरोर्मिः ॥ 64

निवापकर्म स्वजनाय कुर्व
न्नृपो ददाति स दृढानुतापः ।
मिथः पृथाया विदितोद्भवाय
कर्णाय तोयाञ्जलिमग्रजाय ॥ 65

यातः पुरं सोमकुलीनपाल्यं
गतिं गतेभ्यो युधि शस्त्रपूताम् ।
स बान्धवेभ्यः परलोकयोग्यं
सत्यं वितेने विभवानुकूलम् ॥ 66

धौम्यस्तु तं सौम्यगुणं पुरोधा
हैमादुदीर्णैः कलशान्पयोभिः ।
एकातपत्रीकृतभूतधात्री-
चक्रोपभोगोत्सुकमभ्यषिञ्चन् ॥ 67

उपेयुषो जातु निरीक्षणेन
निश्शल्यपीडातिशयो मुरारेः ।
उपस्थितं सायकतल्पशायी
नरेन्द्रमाचष्ट नदीतनूजः ॥ 68

अप्यस्तु ते भद्रमजातशत्रो
भुजङ्गराजप्रतिमस्य बाहोः ।
पुंसामुना संहृतभारखेदां
बिभर्ति यस्स्वैरमिमां धरित्रीम् ॥ 69

पूर्णप्रतिज्ञस्सुकृती चिराय
मरुत्सुतः कच्चिदुपैति साम्यम् ।
निर्व्यूढकार्येण विचक्षणेन
सांयात्रिकेणार्णवपारगेण ॥ 70

तदुत्कटज्यातटिदुग्रघोष
मुपर्युपर्युज्झितबाणवर्षम् ।
निपातितास्त्राशनि कच्चिदास्ते
शान्तं कच्चित्संप्रति गाण्डिवाभ्रम् ॥ 71

कच्चिच्छुभैरुज्झितवेणिरूपै
श्चिराय वध्वाश्चिकुरैरलैः ।
माल्यं प्रविष्टं यमुनापयोभि
र्गङ्गापगास्रोत इवोर्मिमद्भिः ॥ 72

श्रुत्वैवमादीन्कुशलानुयोगान्
पितामहं व्याहरति स्म भूपः ।
स्वश्रेयसं तात मया यदाप्तं
त्वदाशिषामेव विवर्त एषः ॥ 73

भूयस्सरित्सूनुरुवाच भूपं
पाञ्चालपुत्र्या इव भूतधात्र्याः ।
अजातवैरस्य कथाप्रसङ्गे
सहानुजैर्वत्स यतस्व भोगे ॥ 74

सम्भूय ये भूपतयस्त्वदर्थं
प्राणांस्तृणानीव रणेष्वमुञ्चन् ।
तदात्मजान्स्वेषु पदेषु कृत्वा
कृतज्ञवर्गस्य भवाग्रगण्यः ॥ 75

शक्तोऽप्यशेषैश्च भवांस्सहैव
प्रवर्ततां मन्त्रविधावमान्यैः ।
बिभर्ति भारं भुवनस्य सार्ध
माशागजेन्द्रैरधिभूरहीनाम् ॥ 76

परस्परापादितवृद्धिभाजो
र्धर्मार्थयोः कल्पय नातिसक्तिम् ।
ताभ्यामुभाभ्यां सुलभानुबन्धे
कामे च मात्यन्तकृतादरो भूः ॥ 77

फलन्ति वृक्षा निज एव काले
तथा पयोदाश्च सृजन्ति पाथः ।
सदर्थिसन्तर्पणतत्परेण
त्वया तु तद्वत्समयोऽनुकार्यः ॥ 78

दानाम्बुराशेरुदयं प्रपन्न
मासाद्य पूर्णं सुकृतेन्दुबिम्बम् ।
अजस्रमामोदय राज्यलक्ष्मीं
कुमुद्वतीं शुक्ल इव प्रदोषः ॥ 79

विसृत्वरैरध्वरधूमजालै
रथ्यासु दिग्भित्तिषु लम्बितासु ।
यशांसि चित्राणि पुरातनानां
महीपतीनां मलिनानि कुर्याः ॥ 80

तथेति तच्छासनमानतेन
स्वीकृत्य मूर्ध्ना मकुटाङ्कितेन ।
पतिः कुरूणां सह माधवेन
प्रत्यासदत्पौरवराजधानीम् ॥ 81

अथायनं दक्षिणमर्यमेव
प्रवीरवर्यस्स विहाय देहम् ।
प्रत्युद्गतोऽन्यैर्वसुभिः प्रहृष्टै
र्वैमानिको धाम निजं प्रपेदे ॥ 82

सरेषुदूरं विजयेषुदूनं
वपुस्तदग्नेर्विषयं विधाय ।
पितामहस्य स्तिमिताश्रुवृष्टि
श्चकार पृथ्वीपतिरिष्टिमन्त्याम् ॥ 83

मत्स्यात्मजागर्भभवं सुभद्रा
परीक्षितं वीक्ष्य महास्त्रदग्धम् ।
पौत्रस्त्वयं मे मृत एव जात
इत्यग्रतो दैत्यरिपोरवादीत् ॥ 84

तप्तां शुचा तामनुकम्पमान
स्तथागतं जीवयितुं कुमारम् ।
पस्पर्श पादेन निदाघतप्तं
सायं तदा कैरवकोशमिन्दुः ॥ 85

प्रत्यागतासावभिमन्युसूनौ
वंशाङ्कुरे तादृशि वर्धमाने ।
महीशमुख्येन मखाय मुक्तं
गाण्डीवधन्वा हयमन्वयासीत् ॥ 86

अलक्ष्यताम्बोनिधिमेखलाया
मितस्ततो वाजिखुराङ्कुरालिः ।
अनन्यसाधारणभोगचिह्ना
नखक्षतालीव नरेन्द्रदत्ता ॥ 87

स बभ्रुवाहाहवलब्धमोहः
संज्ञामुलूप्यागमितः प्रभावात् ।
पार्थोऽभिनन्दन्पथि तीर्थयात्रां
पुरीं निवृत्तस्तुरगानुसारी ॥ 88

विधिवदवसितेऽस्मिन्नश्वमेधे महीय
स्यवभृथपरिपूतं भूपमापृच्छ्य शौरिः ।
रथवरमधिरूढो दारुकेणोपनीतं
मुनिजनविहिताशीर्द्वारकामभ्ययासीत् ॥ 89

इत्यगस्त्यपण्डितकृतौ बालभारते महाकाव्ये
एकोनविंशस्सर्गः

अथ विंशस्सर्गः

अथ स्वशौर्यार्जितराज्यभाज-
श्छायैव तस्यातपवारणस्य ।
आह्लादयामास भुजावलम्बा
मष्टादशद्वीपवतीं धरित्रीम् ॥ 1

आशुक्लवह्निर्मकुटानि वोढु
माप्तोपदिष्टाञ्जलिबन्धचिह्नैः ।
स काकपक्षैस्सततं नरेन्द्रा
शिशरोभिरेनं शिशवः प्रणेमुः ॥ 2

स्वयं प्रभुः प्राज्ञतमोऽपि मान्यं
मन्त्रे पुरोधाय निजं पितृव्यम् ।
सभक्तवर्णं चतुरर्णवान्तां
शशास पृथ्वीं पृथुतुल्यसारः ॥ 3

अजातशत्रोरभिजातकीर्तेः
शुश्रूषया सूनृतसत्यवाचः ।
वर्षीयसा यादृगनेन लेभे
हर्षः पुरा पुत्रशतान्न तादृक् ॥ 4

भ्रातुर्विदग्धा हृदयानुवृत्त्या
सहावरोधैर्विजयो यमौ च ।
भीमाहते शश्वदमुक्तवैरा
दाराधयन्ति स्म सदानमेनम् ॥ 5

धृतावलेपा युधि धार्तराष्ट्रा
　　स्सर्वेऽपि यस्मिन्विलयं प्रपन्नाः ।
सुजातरत्नांगदकङ्कणाद्यैः
　　प्रसाध्यतां तद्भुजदण्डयुग्मम् ॥ 6

वक्त्रेण येनामृतवन्निपीतं
　　दुश्शासनासृग्धृतविस्रगन्धम् ।
तस्याधिवासाय यशोवदात
　　मानीयतां मे घनसारखण्डम् ॥ 7

भग्नोरुदण्डस्य सुयोधनस्य
　　बाढं शिरस्ताडनसम्भ्रमेण ।
वामस्य मे जातरुजः पदस्य
　　सम्पाद्यतां चन्दनपङ्कलेपः ॥ 8

इत्थं गिरो मारुतनन्दनस्य
　　गान्धारपुत्र्या सह शुश्रुवानः ।
विगाढमन्युप्रसरो बभूव
　　तरुर्यथा कोटरलीनदावः ॥ 9

भक्त्या नृपस्याहितलक्षणस्य
　　कटूक्तिभेदेन वृकोदरस्य ।
आप्यायत्यतातप्यत सोऽतिवेलं
　　ज्योत्स्नातपोभ्यामिव जीवलोकः ॥ 10

निर्विण्णचेतास्स बहुप्रकार
　　मभ्यर्थ्यमानोऽपि युधिष्ठिरेण ।
तत्याज नैवाश्रमवासबुद्धिं
　　भवन्ति सन्तस्समयानुसाराः ॥ 11

शुभे मुहूर्ते भवनाद्वनाय
स धर्मपत्न्या सह निर्जनाय ।
स्कन्धावसक्तः करमुद्वहन्त्या
वन्यद्विपो वाशितयेव कुञ्जात् ॥ 12

निवर्त्य पौरैस्सह पाण्डुपुत्रान्
मनोभिरेषामनुगम्यमानौ ।
तौ दम्पती सञ्जयनीयमानौ
वन्वक् प्रतस्थे विदुरस्सहायः ॥ 13

कुन्ती च तावेव मुदान्वयासी
न्नशेलब्धराज्यान् स्वसुतान्निवृत्तान् ।
स्त्रीणां विशेषेण सुखानपेक्षं
वृत्तं हि रक्ष्यं वचनीयतायाः ॥ 14

तीरे नरेन्द्रे त्रिदशापगायाः
नीत्वा निशां बन्धुवियोगदीर्घाम् ।
ततः कुरुक्षेत्रमगादुदीच्यै-
रुदश्रुभिर्जानपदैः प्रहृष्टः ॥ 15

तस्मिन्नपोढा व्यसनप्रसङ्गं
तपोवनं तापसबृन्ददृश्यम् ।
प्रत्युद्गतोऽसौ शतयूपनाम्ना
राजर्षिणा तत्पदमध्युवास ॥ 16

तपो जटावल्कलवांश्चकार
सहैव पत्न्या पृथया च तीव्रम् ।
अनेहसाल्पेन चिराय लभ्यां
लेभे च राजर्षिरिति प्रसिद्धम् ॥ 17

दुरापमन्यैर्विदुरस्तपोभि
रलङ्करिष्यन्नपवर्गमार्गम् ।
पर्यन्तकान्तारचरः प्रपेदे
सख्यं मृगैः संयमिनां स मुख्यः ॥ 18

यदृच्छया जातसुजातकीर्ति
रनुप्लवैस्स्वैरमनुप्रयातैः
गङ्गातरङ्गानिलसेव्यमान
श्चचार पर्यन्तवनस्थलेषु ॥ 19

स तत्र राजा विदुरं ददर्श
दिग्वाससं दीर्घजटाकलापम् ।
कृशं वहन्तं क्षितिरेणुदिग्धं
सारङ्गकण्डूयनशारमङ्गम् ॥ 20

समं कुरङ्गैः पदशब्दभीतैः
स्वयं च भीतः किल धावमानः ।
नाम स्वमुच्चैर्वदतो नृपस्य
कृतानुयानस्य पुरस्स तस्थौ ॥ 21

योगेन मुक्तादमुना शरीरा
ज्ज्योतिर्मयेनाविशता नरेन्द्रः ।
अयुज्यतांशेन निजेन धर्मो
राकामुखे चन्द्र इवान्तिमेन ॥ 22

कृशानुसात्कर्तुमनास्तदङ्गं
निवारितो व्योम्नि गिरा स्फुरन्त्या ।
युधिष्ठिरः प्राप्य तपोवनं त
च्चित्रं पितृव्याय शशंस वृत्तम् ॥ 23

द्वैपायनः प्राप्य मुनिः कदाचित्
प्रज्ञादृशं प्राञ्जलिमन्तिकस्थम् ।
स्पृशन्करेण श्रशिमास्पदांश
मुवाच कृच्छ्रादमुमुज्जिहीर्षुः ॥ 24

बिभर्षि राजर्षिवरेण्य नूनं
समाधिविघ्नं कमपि त्वमाधिम् ।
नचेत्त्वमेवं तपसैव शुष्ये
न्नागायुतप्राणभृतस्तवाङ्गम् ॥ 25

आचक्ष्व तस्य प्रतिकारमाशु
ध्रुवं विधास्यामि शपे तपोभिः ।
किं नाम लोकत्रितये महिम्ना
तपस्विनां दुष्करमस्ति किंचित् ॥ 26

अथोपगूढस्य शुचा महत्या
विज्ञाय भावं मनसा स्वभर्तुः ।
जगाद गान्धारसुताऽऽर्द्रयन्ती
बाष्पाम्भसा नेत्रदुकूलपट्टम् ॥ 27

अयं सुतस्ते भगवन्वचोभि
राश्वास्यमानोऽपि भवद्विधानाम् ।
अद्यापि नैवोज्झति पुत्रशोकं
शोषप्रदं सिन्धुरिरौर्वमग्निम् ॥ 28

जपापदेशाद्गणयत्यजस्रं
नामान्ययं केवलमात्मजानाम् ।
शुभानि च ध्यानमिषेण तेषां
विभावयत्याननपङ्कजानि ॥ 29

पूजासमाप्तौ पुरशासितारं
वरं वृणीते भगवन्तमेवम् ।
अमुत्र वा देव मुहूर्तमात्रं
पुष्णातु मां पुत्रशतस्य योगः ॥ 30

गुरुश्च बन्धुश्च परं च दैवं
त्वमेव नः कल्पितसन्निधानः ।
प्रकाश्यतां पुत्रशतस्य राज्ञो
मनोरथं पूरयितुं प्रसादः ॥ 31

स तामवादीन्मुनिरद्य यूयं
भागीरथीतीरभुवं भजध्वम् ।
तत्रोपनेष्यामि शतं सुताना
मन्यांश्च जन्येषु हतानशेषान् ॥ 32

तथेति तस्य प्रतिगृह्य वाचं
दिदृक्षुराश्चर्यमदृष्टपूर्वम् ।
त्रिस्रोतसस्तीरभुवि क्षितीश
श्चकार वासं सहबन्धुपौरैः ॥ 33

दिव्यस्तपस्वी दिवसे परस्मि
न्निमज्ज्य पुण्याम्भसि निम्नगायाः ।
ये ये हतास्स्वर्गनिवासभाज
स्तांस्तानशेषानयमाजुहाव ॥ 34

उत्तूलपाथःप्रसराद्द्युसिन्धो
रुद्भ्रान्तनक्रादुदरादुदीर्णः ।
बृंहितहेषितसिंहनादः
कोलाहलः कोऽपि जगज्जगाहे ॥ 35

आच्छादयन्फेननिभानि गङ्गां
पूर्वं पताकापटपल्लवानि ।
कुन्तास्ततो नीलसरोजशोभा
श्छत्राणि पश्चात्सदृशानि पद्मैः ॥ 36

अष्टादशानामधिकां विभूति
मक्षौहिणीनामवलोकयन्तः ।
उत्तस्थुरुर्वीपतयः प्रवाहा
दुत्सृज्य वैराण्युभयत्र वीराः ॥ 37

अथाम्बिकेयस्सुबलात्मजा च
तपोबलात्तस्य मुनेरवाप्ता ।
दिव्यां दृशं पुत्रशतं सपौत्रं
बन्धुव्रजं सम्मदविस्मयौ च ॥ 38

प्रभूतया बन्धुतया समेता
दिवोवतीर्णा जनता विरेजे ।
सविस्मयं सर्वसुपर्वदृष्टा
भागीरथीवेतरसिन्धुपङ्क्त्या ॥ 39

ऋषिप्रभावोपनतेषु सर्वे
निर्विश्य हर्म्येषु निशां वधूभिः ।
सहैव ताभिर्विरहासहाभि
र्यथागतं जग्मुरमी विभाते ॥ 40

आपृच्छ्य तस्मिन्नपनीतशोके
तिरोहिते दिव्यमुनौ नरेन्द्रः ।
सहोमधूमं पदमाप कश्चित्
प्रभूतकालागुरुधूममन्यः ॥ 41

तपोविशेषेण कृशं कदाचित्
पत्न्या च भोजात्मजया च सार्धम् ।
ददाह वन्यो धृतराष्ट्रमग्नि
र्द्रुमं लताभ्यामिव धर्मदूनम् ॥ 42

श्रुत्वा मुनिभ्यस्तदुदन्तमन्तः
शोकानलेन प्रभुरात्तगन्धः ।
यथाविधि भ्रातृयुतो वितेने
निवापतोयाञ्जलिनिर्वृतांस्तान् ॥ 43

अथैकदा नारदकौशिकादीन्
दिव्यानृषीन्द्वारवतीं प्रपन्नान् ।
स्त्रीवेषभाजं प्रणमय्य साम्ब
ममूनपृच्छन्युयुधानमुख्याः ॥ 44

भूतं च भव्यं च भवच्च सर्व
मेतद्भवद्भिर्विदितं महद्भिः ।
तत्कथ्यतां वृष्णिवरस्य बभ्रो
र्वधूरपत्यं किमियं सवित्री ॥ 45

तैर्विप्रलब्धा मुनयो मदान्धै
रमर्षकम्पाधरमेवमूचुः ।
अमुष्य गर्भान्मुसलः प्रसूतो
युष्मत्कुलं नेष्यति सर्वमन्तम् ॥ 46

शप्त्वैवमन्तर्हितवत्सु तेषु
क्षणादयोदण्डमसूत साम्बः ।
अन्ये तु सम्भ्रान्तधियस्तमाशु
न्यवेदयन्यादवनायकाय ॥ 47

शापं मुनीनां समयोपपन्न
मीशोऽपि संहर्तुमुपेक्षमाणः ।
सञ्चूर्ण्य सम्यक्किल शौरिरब्धौ
प्राक्षेपयत्तं मुसलं नियोज्यैः ॥ 48

ध्रुवं निजोपद्रवशङ्कितेन
क्षिप्तं समुद्रेण बहिस्तरङ्गैः ।
कूलं प्रपन्नः क्वचिदायसोऽयं
क्षोदोऽभवत्काननमेरकाणाम् ॥ 49

मुक्तं च सिन्धौ मुसलस्य शेषं
जालाहृतोत्कृत्तझषोदरास्थम् ।
निशातमेको निजसायकस्य
व्याधः प्रहृष्टो विततान शल्यम् ॥ 50

दिवं प्रयातेषु निजायुधेषु
प्रभासयात्रामपदिश्य शौरिः ।
क्षयं निनीषुर्निखिलांश्च बन्धू
न्निनाय नीराकरतीरभूमिम् ॥ 51

पात्रैस्सरोजैरिव शीधुपूर्णै
रलङ्कृतां केसरगन्धगर्भैः ।
आपानभूमिं नलिनीमिवारा
द्भृङ्गा इवापुर्यदवोऽङ्गनाभिः ॥ 52

कंसारिरंसाहितरक्तमाल्यां
सदाडिमीपुष्पमयावतंसान् ।
मुख्यैश्च कश्मीरविशेषकाङ्कै
रमंस्त वृष्णीन्कृतवध्यचिह्नान् ॥ 53

मध्ये सभाया मधुपात्रहस्ता
मदोद्धतास्तालवयानुकूलम् ।
नतभ्रुवो नर्तयतां यदूना
मापानमासीदवलोकनीयम् ॥ 54

रागं दृशोरारचयन्क्रमेण
स्खलद्वचोभंगिरुदीर्णहासः ।
हनिष्यतां हन्त परस्परेण
तेषां मधो रोष इवाविरासीत् ॥ 55

मदोद्धताः स्वैरमधिक्षिपन्तः
समत्सराहङ्कृतयो रुषान्धाः ।
शस्त्रीकृताभिर्द्रुतमेरकाभि
र्मिथो हतास्ते यदवो बभूवुः ॥ 56

दृष्ट्वा विरक्तो निजवंशनाश
माद्यस्य पुंसः प्रथमांशभूतः ।
हली च वेलाभुवि योगयुक्ता
दात्मानमुन्मोचयति स्म देहात् ॥ 57

नीहारशैलादिव तच्छरीरा
द्दरीनिभव्यात्तमुखादुदीर्णः ।
शेषस्सहस्रेण मुखैर्जगाहे
भागीरथीपूर इवाम्बुराशिम् ॥ 58

ततो हरिर्मध्यमलोकवर्ती
चिरं विमुक्तां दिवमारुरुक्षुः ।
निक्षिप्तमुष्णांशुमिव प्रभाते
धनञ्जयादाहरतिस्म तेजः ॥ 59

स्वेनोज्झितां द्वारवतीं समुद्रः
पुरा रुणद्धीति ततस्सपौरान् ।
आनाययिष्यन्भुवमर्जुनेन
तदन्तिकं दारुकमुत्ससर्ज ॥ 60

क्वचिद्वनान्ते वनदेवताभि
स्तल्पं तमालच्छदभङ्गक्लृप्तम् ।
सयोगनिद्रो हरिरध्य शेते
पत्रं वटस्येव पयोधिपूरे ॥ 61

व्याधस्तदा तच्चरणं शरेण
विव्याध दूरे मृगशङ्कितेताः ।
स तेन भिन्नस्सुतरां बभासे
विभाकरस्येव करेण पद्मः ॥ 62

धारी च चापं स्वभुजैश्चतुर्भि
रुद्भासमानं धृतदिव्यशस्त्रैः ।
तमुन्मिषत्कौस्तुभरत्नभासं
ददर्श पीताम्बरमम्बुजाक्षम् ॥ 63

उत्खाय बाणं परिमृष्टरक्तं
पदारविन्दं शिरसा दधानः ।
अज्ञातक्लृप्तं तु ममापराधं
क्षमस्व देवेति जगाद भीतः ॥ 64

शरापदेशेन मुनीन्द्रशापो
मामस्पृशन्मा भयमुद्वहेति ।
आश्वासितं तं विससर्ज विष्णु
रन्ते पदं प्रापयिता परार्ध्यम् ॥ 65

भारावताराय वसुन्धराया:
स्वां मूर्तिमङ्गीकृतवान् मुरारिः ।
तां षोडशान्तःपुरिकासहस्रै
निर्विष्टलावण्यसुधां मुमोच ॥ 66

अथानुभूतामरपुष्पवृष्टि
रारुह्य नागान्तकसोपवाह्यम् ।
दिक्पालसेवाञ्जलिदन्तुरेण
पथा निजं धाम जगाम देवः ॥ 67

द्यां पारिजातद्रुमवत्प्रपन्न
मशक्नुवत्यस्तमनुप्रयातुम् ।
सहस्रशो भृङ्ग्य इवार्तनादैः
पूर्णां व्यधुर्द्वारवतीं पुरन्ध्र्यः ॥ 68

ततो विषण्णस्सह दारुकेण
पुरं यदूनां पुरुहूतसूनुः ।
प्रागेव तोयाक्रमणात्पयोधेः
पौराश्रुपूराप्लुतमाससाद ॥ 69

सभां सुधर्मामवगाह्य तां तु
गुहामिवाद्रेर्हरिणा वियुक्ताम् ।
स वृष्णिवृद्धैः परिवार्यमाण:
शुचं समस्तम्भयदात्तधैर्यः ॥ 70

अनेकभेदं यदुरत्नराशिं
कालेन सर्वं हरता क्षणेन ।
अलक्षितं वीक्ष्य सवज्रमेकं
प्रसाधकं भूवलयस्य मेने ॥ 71

स हास्तिकारोपितकोशजातः
परेद्युरुच्चारितपौरलोकः ।
यानाधिरूढैर्यदुवीरदारै
रन्वीयमानः स्वपुरं प्रतस्थे ॥ 72

क्रमेण वेलाभुवमागतेन
सविस्मयं पौरजनेन दृष्टः ।
पुरं जगाहे जलराशिपूर
स्तदीयसौन्दर्यदिदृक्षयेव ॥ 73

प्रतिप्रयाणं सुलभोदकेषु
मार्गे लतामण्टपमन्दिरेषु ।
सुखं वसन्तो विपिनेषु पौरा
विसस्मरुर्द्वारवतीनिवासम् ॥ 74

स्त्रीबालशेषं पथि वृष्णिचक्रं
धनुष्मतः पश्यत एव जिष्णोः ।
रुरोध रोधोभृतशृङ्गघोषा
धनानि लिप्सुः प्रतियोधसेना ॥ 75

शिलाकरासारमुचां समन्तात्
मलिम्लुचानां नदता गणेन ।
आचुक्रुशुः फल्गुन फल्गुनेति
सर्वेऽपि वित्तेषु बलाद्धृतेषु ॥ 76

अनेकराजन्यपुराहृतं त
दनर्घमासीच्चिरमात्मगुप्तम् ।
चोरा युवानः प्रसभेन जह्रु
र्धनं यदूनामवरोधनं च ॥ 77

धनञ्जयस्तावदुपेत्य वीरो
धनुः कथंचिन्नमयाञ्चकार ।
शिरस्तदीयं त्रिजगत्युदग्रं
व्रीडाभरेण स्वत एव नम्रम् ॥ 78

अस्त्रेषु हन्त स्मृतिदूरगेषु
स केवलैरेव शरैर्विषण्णः ।
पिनद्धमौलीनि शिरांसि पिञ्छै
स्स दन्तपत्राण्यलुनादरीणाम् ॥ 79

निषङ्गयुग्मेऽपि पृषत्कशून्ये
चापेन हंसानिव वारिवाहः ।
पर्यस्तलोष्टान्परितो वनेषु
बीभत्सुरुत्सारयति स्म दस्यून् ॥ 80

ततः पुलिन्दापहृतावशिष्टं
स्त्रैणं हरिप्रस्थमसौ निनाय ।
चोलेषु कुल्याहृततोयमोघं
घनागमस्सह्यभुवो यथाब्धिम् ॥ 81

सवज्रमस्मिन्नधिकर्द्धिभूमौ
शूरस्य सन्तानतरोः प्ररोहम् ।
नवाभिषेकाधिकरूढमूलं
विधाय राज्ञस्सविधं जगाम ॥ 82

कृष्णे गते जीवितमुक्ततृष्णाः
पञ्चापि पत्न्या सह पाण्डुपुत्राः ।
प्रस्थानमुर्व्यां महदाचरन्तो
देहान्विहातुं समयं वितेनुः ॥ 83

परीक्षितश्चक्रुरनन्तरं ते
राज्याभिषेकाम्बुभिरार्द्रमूर्तिम् ।
वल्कानि वासांसि ततो वसाना
बाष्पाम्बुवर्षेण च पौरलोकम् ॥ 84

वृकोदराद्यैरनुजैः क्रमेण
पत्न्या च केनापि शुनानुयातः ।
प्रदक्षिणीकर्तुमना धरित्रीं
प्राचीं नरेन्द्रः प्रथमं प्रतस्थे ॥ 85

सशङ्खचापध्वजपङ्कजानि
मनःपदैश्शुद्धतरीकृतानि ।
पदानि तेषां पथि पाण्डवानां
सिद्धा निबद्धाञ्जलयः प्रणेमुः ॥ 86

अश्रान्तमाक्रान्तमहीभृतस्ते
निस्तीर्णनानाविधवाहिनीकाः ।
यात्रां पुनर्दिग्विजिगीषयेव
कुत्राप्यकुण्ठप्रसरां वितेनुः ॥ 87

मूर्ताय मार्गे स निषङ्गयुग्मं
कृशानवे गाण्डिवमर्पयित्वा ।
ततः पथैनैव पयोनिधीनां
प्राचीमवाचीं प्रययुः प्रतीचीम् ॥ 88

उदङ्मुखास्ते तदनु प्रयान्तो
विलङ्घ्य पुण्यानि वनस्थलानि ।
स्रोतःपरीतं सुरनिम्नगाया
हैमं च शैलप्रवरं व्यतीयुः ॥

अथोपवासव्रतकर्शिताङ्गी
पपात पूर्वं पथि याज्ञसेनी ।
ततो यमौ शक्रसुतश्च पश्चा
दनन्तरं सोऽपि समीरसूनुः ॥ 90

तेषां क्रमात्स्वस्य च पातहेतुं
भीमेन पृष्टो नृपतिश्शशंस ।
पार्थातिसक्तिं मतिरूपगर्वौ
राज्ञामवाज्ञाममिताशितां च ॥ 91

सार्धं शुनैवानुगतेन यान्तं
शुभंयुचारित्रमजातशत्रुम् ।
अवोचदग्रे नमुचे विजेता
रथेन मार्गे कृतसन्निधानः ॥ 92

श्वानं नृप स्वर्गतिविघ्नमेनं
सन्त्यज्य यानेन दिवं भजेथाः ।
ततोऽनुजांश्चित्रपदापदानान्
दिव्याकृतीन्द्रक्ष्यसि पार्षतीं च ॥ 93

स चैनमाचष्ट चिराश्रितेन
शुना शुनासीर विनामुना मे ।
न रोचते नाकविहारसौख्यं
श्लाघ्यं परभ्रातृसमागमो वा ॥ 94

विहाय कौलेयकरूपमग्रे
मूर्तेन धर्मेण सह क्षितीशः ।
आरोपितो मातलिचोदिताश्वं
रथं मघोना दिवमारुरोह ॥ 95

आन्दोलयन्नभ्रनदीतरङ्गा
न्मदोदयो नन्दनगन्धवाहः ।
नृपाय कल्पद्रुमपुष्पगन्ध
मुपायनत्वं गमयाम्बभूव ॥ 96

पाञ्चाल्या सममुत्थितैर्निरयतः कर्णादिभिर्भ्रातृभिः
स्वं स्वं धाम गतैरभिष्टुतयशो दिव्यैश्च तैर्भ्रातृभिः ।
सिन्धोर्दिग्गजदानदिग्धपयसि त्यक्त्वावपुर्मानुषं
सर्वासां दिवषद्दृशां स विदधे शर्माणि धर्माकृतिः ॥ 97

इत्यगस्त्यपण्डितकृतौ बालभारते महाकाव्ये
विंशतितमः सर्गः

बालभारतमहाकाव्यं संपूर्णम्

INDEX